नं: ४ घ-ग

काशिकावृत्तिटीका

पदमञ्जरी (व्याकरणम्)

३ यो ऽध्यायः) (खण्डितः)

पत्राणि ८१

नं० ४-घ-ग
काशिकावृत्तिटीका
पदमञ्जरी
(व्याकरणम्)
(३योऽध्यायः)
(खण्डितः)
पत्राणि ८१

नं॰ ४



601·40 to 47
missing.

नं. ४-ग

काश्मीर ...

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः ॥ ॥ प्रत्ययः ॥ ॥ इह यदि सर्वाण्येव संज्ञिनः स्वरूपेणानिर्दिश्य संज्ञा विधीयेत तत्र प्रत्ययः कश्च प्रत्ययः कश्च प्रत्यय इति तल्लोगौ
रवं स्यात् अथ मत प्रत्यय इति सति नः स शब्दारम्भकम् यः पकारेणाप्रत्याहारग्रहणेनात्र वा प्रदेशान्तरे वा संज्ञा विधीयेत तदानेकस्य पकारस्य संभवात् संदे
हः स्यात् तथा हि प्रत्ययसन्निमाय आश्रीयमाणोऽपि पः पकारेणास्य तत्प्राप्तौ तु न पृतन न पृतनन यनाश्चेति तन्त्रयः स्यादेतत् आदिरेणाश्रयिष्यते अथ
वत्प्रत्ययः पकारेण प्रत्याहारेण भविष्यतीति ज्ञापकं न पदपरिचरणकाचोऽप्रत्यय ग्रहेत्समः प्रत्ययग्रहणं शास्ति अन्यथा सहेऽपि प्रत्ययसंज्ञा प्रापादि

श्रीगणेशाय नमः ॥ ॥ प्रत्ययः ॥ ॥ अधिकारोऽयं ॥

मोऽपि स्वत एव प्रत्ययत्वाच्च द्वन्द्वाद्वा वोनातिदेश्यः स्यादिति तन्मतत्रत्यमिति द्विरावर्त्तिते तत्र आप्रत्ययप्रतिबद्धमोतोम् शसो रित्यादि विशेषकार्य
यथा स्यादिति सोऽतिदेशः स्यात् न चैवमपि प्रत्ययग्रहणमनर्थकं अस्त्विति वक्तव्यं अतः प्रत्ययग्रहणात्प्रत्ययप्रयुक्तमपि कार्यमतिदेशपमि
तिप्रतीपतेन ज्ञापकमुक्तार्थसंभविष्यति एवमथम आगमत्वात् नुगादिवद्भावैः प्रत्ययत्वातिदेशः स्यात् अस्तु वा ज्ञापकमेवमपि कृतम् एतद्वा सि
द्धश्रीयतेन पुनः प्रत्ययसंज्ञितिरिति किं च यथा मासाङ्गेऽवं स्थितमेव सवित्प्रसाधिकस्य करणान् अतो गौरवातिप्रसंगपरिहाराय अधिकारेणोपसंज्ञावि
धीयते तदाह ॥ ॥ ७ ॥ ॥

प्रत्ययशब्दः संज्ञात्वेनाधिक्रियत इति कारकशब्दवत् इति द्विशेषणमधिक्रियते स्वादिषु कर्म्यर्थेषु प्रकृतिरियमधिक्रियत इति वृत्तप्रत्ययशब्दः संज्ञाधिक्रि
यत इति वक्तव्ये संज्ञात्वेनेति वचनमनर्थभेदात् तथाह्ययमत्र कर्मकारत्वेनाधिकृतः अयमत्र कर्मकरोधिकृतः नार्थभेदोस्ति किंतु कर्मकरोधिकृत इत्यु
क्तेयः कर्मकरः सोधिकृतो न्येषां नरोपोत्यधिगम्यते कर्मकरत्वेनेति पुनरुच्यमाने तस्यैवाकारस्याधिकृतत्वं गम्यते अधिक्रियते विनियुज्यते सूत्रकारेण
यास्तनादीननुक्रमिष्यामः अनुक्रमेण विधास्यामः सूत्रकारायमाणस्य इति कार्येतद्वचनं पठितत्वेधिकारेण संज्ञा क्रियते प्रतियोगमुपस्था
नाप्रकृत्युपपदेोपाधिविकारागमानामपि प्राप्नोति हरतेर्दृतिनाथयोः पशौ हरतेरिति प्रकृतिः दृतिनाथयोरित्युपपदं पशाविति उपाधिः इनस्तत्वे
त्यादिर्विकारः त्रपुजतुनोः षुगित्यागमः सर्वेषां च संज्ञायां प्रकृतिप्रत्यययोः पर्यायेण परस्पराये क्षं परापेक्षत्वं स्यात् शब्दांतरापेक्षं वा प्रकृतेः प्रकृत
पेक्षं तु प्रत्ययस्य उपपदस्यापि परत्वादुपसर्जनं पूर्वमित्येतद्राजपुरुषादिषु सावकाशं बाधित्वा परत्वं स्यात् पत्र सेमासाभावादुपसर्जनं पूर्वमित्य

॥ प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते आपंचमाध्यायपरिसमाप्तेर्यादित ऊर्ध्वमनुक्रमिष्या

मः प्रत्ययसंज्ञास्ते वेदितव्याः प्रकृत्युपपदोपाधिविकारागमान्वर्जयित्वा ॥ १ ॥ छ ॥

स्याप्रसंगः तत्रोपपदस्य परत्वस्यात् एवं च सति भोक्तुं व्रजतीत्येवमेव नित्यं स्यान्न तु व्रजति भोक्तुमिति उपाद्येरप्यर्थस्य परत्वासंभवेपि तद्वावि
नः प्रयोगानियमे माशेपाश्वेति नियमः स्यात् आद्युदात्तत्वं च यथायथं स्वरांतरं बाधित्वा स्यात् अंगसंज्ञानुविधानप्रतिबद्धानचेह प्रकृत्याद
यः कृतास्त्रिविधिरीयंत इति न सा प्रकृत्यादिषु परत्वः पूर्वस्य प्राप्नोति ननु च प्रतियोगमुपस्थाने पि नामभेदप्रसंगात्प्रकृत्यादीनां संज्ञा न भवि
ष्यति तथाहि हरतेर्दृतिनाथयोः कर्मण्युपपदयोः पशौ कर्तरीन प्रत्ययो भवतीत्येकं वाक्यं तेच हरत्यादयः प्रत्ययसंज्ञका इति द्वितीयं सं
भवत्येकवाक्यत्वे वाक्यभेदस्तु नेष्यते नैतदस्ति सनादीनामप्यसतां संज्ञानुपपत्तेर्वाक्यभेदेनैव संज्ञाविधेयात तत्र सनादीनामेकेन वाक्ये
न विधिः अपरेण संज्ञाविधिः एवं प्रकृत्यादीनामपि प्राप्नोति तत्राह प्रकृत्युपपदेत्यादि अयमभिप्रायः प्रकृत्यादीनां सनाद्युत्पत्तौ निमित्तत्वे
नोपादानात्पर्णात्वसंस्कारं प्रति प्रयोजकत्वाभावः यथायः पीठमंदेवदत्त इति यो पीठस्य देवदत्तसंज्ञा न भवति ॥ १ ॥ ॥ ॥

।ननु सनाद्युत्पत्तिवाक्ये प्रथमे तेषां पाराथ्यं निष्ठितीये संज्ञासं निर्मं बंधप्रतिपादनपरे वाक्ये तताध्व संज्ञासंवेध प्रतियत्नो मत्सा स्वार्थितापिसंभवत्से
वतन्निष्ठितीयम प्रिवाक्ये संज्ञाविधानपर मेवं रूपमेव गृह्यते न्निजं किंच्च: सन प्रत्ययइति तत्रश्च तत्रापि भूत विभक्ता निर्दिष्टा न्निमित्तत्वात् पाराथ्यं स्थि
तमेव· किंच योग्य विभक्त्यभावाच्च। नप्रकृत्यादीनां संज्ञा प्रथमांत स्याषष्ठ्यंतस्य वा संज्ञासंबंध: द्व हिरा दैचवृद्धि रुपं शब्दस्ये तिनिचद्वितीयेवाक्ये यो
ग्यविभक्त्य आहारो ए ग संज्ञाभवितुमर्हति योग्य विभक्ति निर्दिष्टेषु सनादिषु वरितार्थत्वात् उपपद संज्ञातु सप्तमीनिर्दिष्टस्य विधीयमानापुर्क
पद्दाकाभेदे न योग्य विभक्त्य आहारेणा च भवतीति किंच प्रधानेतरसं निधौ प्रधाने कार्यसंप्रत्ययो भवतीति यस्य चात्र पूर्वविधानं तत्प्रधानं अत: प्र
थमवाक्ये तावत्स नादीनामेव प्राधान्यं द्वितीये पि संज्ञाहि जिनमये स्वमाणायत्पूर्ववाक्ये प्रधानतया वगतं तत्रैव गृह्येत तेनतु पारतंत्र्यात्प्र
धानमिति सिद्धमिष्टं एवमपि दिका रागमानां प्रत्ययो तिनैष दोष: महती संज्ञा क्रियते अन्वर्थसंज्ञा यथा विज्ञायेत प्रतियंत्य नेनार्थमिति

वक्ष्यतितव्यत्व्यानीयर:॥ ॥श्री॥ ॥१॥ ॥

प्रत्यय इति नच विकारागमाभ्यामर्थप्रतीयंतीय घेवमवे: कद्रुपादीनां समासांतानां च न स्यात् नह्ये षामन्वयव्यतिरेकाभ्यां कश्चिदर्थोव
धार्यते तत्स्वभावेपि केवला याएवम कृतेत्त्वर्थावगमात् यद् ग्रह्युअते अनिर्दिष्टार्था: प्रत्यया: स्वार्थे भवंतीति स्वार्थ एवैषामर्थ इति तद्यपि क
ल्पनामात्रं अन्वयव्यतिरेकाभ्यत्वादर्थवत्त्वस्य इतरेतराश्रयत्वं च भवति सति प्रत्ययत्वे स्वार्थे विधानं स्वार्थे विधानाच्चार्थवत्वे सति प्र
त्ययसंज्ञेति। एवं तर्हि प्रयोजनाभावान्न भविष्यतीति तथा हि तेषां स्यान्नषष्ठ्या संबंधस्य अवयव संबंधस्य च प्रतिपादनात्परत्वं ता
वल्ल संभवति आगमानां चानुदात्तत्वविधानादाद्युदात्तत्वस्यासंभव: सतितु प्रयोजने आगमस्यापि भ्रम: डाकारस्येत्संज्ञार्थं भव
तेव संज्ञा। अथ षष्ठ्यन्यबध: नाभिन्नमं च विरागविरंगच्चे त्यादेरेव धात्रादीनामनेकाल्लामादेशानां संज्ञा कस्मान्न भवति संभवति हि तेषु परत्वे
प्रयोजनं पघयिष्यानि न आदेशे न निर्वर्तेत लान्तल टप्रेक्षं परत्वं शब्दांतरापेक्षयास्यादेव परत्वं पथो कं प्राक् तुपादिषु अर्थवत्वं च
तेषामस्ति विधेयत्वात्प्राधान्यं च योग्या च विभक्ति: अत: सर्वथाव धात्रादिषु संज्ञा निवृत्तये पल: कर्तव्य:॥ ॥ ॥छ॥ ॥

कर्त्तव्यं करणीयमिति अत्र प्रत्ययसंज्ञा यो धातोरेव संज्ञात्वेनाऽऽसन्नः अनंतरमपि सनादिकमतिक्रम्य व्यवहितोपि तव्यदादिः तदा तत्र
धुदाद्यादेरपि प्रत्ययकार्यस्यासंभवात् सनादौ तु नित्यत्वेनैव धातुस्वरेणैव तद्बाध्यते॥ ॥परश्च॥ ॥अयमर्थाधिकार इति न केवलं प्रत्ययः
प्रत्ययमेवेत्यपि शब्दार्थः। योगे योगे उपतिष्ठत इति अनेन परिभाषातोऽधिकारस्याभेदको धर्मो दर्शितः परिभाषा हि न प्रतियोगमुपतिष्ठते
किं त्वेकदेशस्थितैव सर्वशास्त्रमभिप्रपत्ते परश्च सम्भवतीत्यादि। अनेनेह स्थायायाः स्वास्याः परिभाषायाः प्रत्ययविधौ सर्वत्रैवोपस्थानं दर्शितं। लिं

॥ कर्त्तव्यं करणीयं तैत्तिरीयं प्रत्ययप्रदेशाः प्रत्ययलोपे प्रत्ययलक्षणमित्येवमादयः॥ ॥परश्च॥
॥ अयमर्थाधिकारो योगे योगे उपतिष्ठते परिभाषा वा परश्च सम्भवति धातोर्ङ्याप्प्रातिपदिकाद्वा यः प्र
त्ययसंज्ञः कर्त्तव्यं तैत्तिरीयं॥ ॥२॥ ॥श्रीकृष्णाय नमः॥ ॥छ॥ ॥

गवती चेयं परिभाषा प्रत्ययसंज्ञा च लिंगं धातोर्वेति क्रियावाचिन्याः प्रकृतेस्तिङ्तादेरण्पुत्यलक्षणमेतत् प्रातिपदिकाद्वेति अक्रिया
वाचिन्याः प्रकृतेरिह मुपलक्षणं तेन ङ्याप्पोरपि ग्रहणं तैत्तिरीयमिति तित्तिरिणा प्रोक्तमधीते तित्तिरिवरतन्तुखण्डिकोखाच्छण् छंदो
ब्राह्मणानि च तद्विषयाणीति रधीते तद्वेदेत्यो काल्लुक् ब्राह्मणकुलस्याभिधेयत्वान्नपुंसकत्वं॥ ॥२॥ ॥छ॥ ॥

का॰प॰२१

२ ञ

चकारः पुनरस्यैव समुच्चयार्थ इति। अन्यथा एषः समुच्चीयेत अस्याभावात्। तेनेति। अन्यथा बहुलवचनस्य सर्वोपाधिव्यभिचारार्थत्वादुणादि
षु परत्वस्यापि विकल्पः संभाव्येत इह गुप्तिज्किद्भ्यः सन्नित्यादौ दिग्योगलक्षणपञ्चमीनिर्दिष्टः पर इति वार्तिककारवचनस्याश्रवणादनियमेना
श्राहारे सति नियमेन प्रयोगप्रसंगे नियमार्थमिदं पर एव प्रत्ययो न पूर्व इति। नायोऽप्यशिष्टः सा षष्ठी निर्दिश्यमानं तदर्थसंबन्धे षष्ठी विज्ञाना
दानन्तर्यस्यैव एवं त्वेऽपि भावादनियमप्रसंग एवेति तत्रापि नियमार्थमेव नेतदस्ति प्रयोजनं विभाषा सुयो बहुच् पुरस्तात्तु इत्येतन्नियमा
र्थं भविष्यति बहुजेव पुरस्तादकतिनाम्नः प्रत्यय इति तत्तश्च बहुचि पूर्वत्वस्यानियतत्वादन्यः प्रत्ययः पर एव भविष्यति षष्ठी निर्दिष्टो सुप
श्च शब्दाद्याहारोऽस्य मध्येऽपि प्रसंग इति चेन्न अव्ययसर्वनाम्नामकच् प्राक् टेरिति नियमात् अकजेव प्रकृतिमध्ये भवति नान्य इति नैतदेवं

चकारः पुनरस्यैव समुच्चयार्थः तेनोणादिषु परत्वं न विकल्प्यते॥ २॥ ॥

यदि तावदेवं नियमः बहुजेव पुरस्तादकजेव मध्य इति ततो बहुजकचो र्नियमो न स्यात् अथ बहुच् पुरस्तादेव अकज्मध्य एवेति ततो दे
शस्यानियतत्वादन्यप्रत्ययान्तरस्यादेवेति सर्वथा निष्टप्रसंगः किंच अकजेव प्राक् टेरित्येवं नियमे प्राक् टेः प्रत्ययान्तरं माभूत् मध्यान्तरे
तु स्यादेव मध्यविशेषाश्रयत्वान्नियमस्य न च तत् स्यादिति तु नरस्येत्यस्य नयायपरिभाषया अयरत्वं सिद्धमिति यत्राहेऽप्राग्वस्तः कस्यचित्किं
चिद्विधीयते यथा पदास्यरयोरयादावेव नम्यानयोर्पुष्यदस्य दोर्वा नावौ भवत इति सतस्याविषमः इह तु प्रागसंतत एव प्रत्ययानादयो विधी
यन्ते न तेषां संबन्धि किंचित् प्रत्ययसंज्ञैव तेषां कार्यमिति चेत् एवमपि भागुरस्त्रिरनिवारितास्यात् तथाहि। असतां सनादीनां संज्ञाविधि
नुपपन्न इत्येके न वाक्येन सनादीनां विधिः किं तु तेन च तेषामेव संज्ञाविधिरिः। संगीकरणीयं तत् तस्माद्द्वितीये वाक्ये सतः कार्यमिति कृत्वा
परिभाषोपस्थानेन प्राक्प्रसुक्तानां संज्ञेच केवलं न स्यादुत्पत्तिस्त्वनियतदेशैव स्यात् प्रथमवाक्ये परिभाषानुपस्थानात्॥ ॥ ॥

रामः
३

स्यादेतत् गुप्तिज्किद्भ्यः सन्नित्याद्यावेकैकं पंचमी साचैकमेवादिकशब्दमध्याहरेत् तत्र पूर्वः परो वेति संशये पूर्वशब्दाध्याहारे द्वितीयस्य वा
क्यस्य स्वरसभंगः स्यात् गुप्यादिभ्यः परः सन् प्रत्ययसंज्ञो भवतीति हितस्य स्वरसतः प्राप्तोऽर्थः स च पूर्ववाक्ये पूर्वशब्दाध्याहारे सति भग्नः स्यात्
अतस्तत्संरक्षणाय पर इत्युक्तम् एवं चाहरिष्यते भवतु वोत्पत्तिरनियतदेशा पश्चात्तु सन्नरेवपरस्य यत्कृत्य प्रत्ययसंज्ञादि शास्त्रकार्यं तन्ना
न्यदेशस्य यद्देशस्य च शास्त्रीयं कार्यं तद्देशोत्पन्ने नो निवर्तिष्यति विशेषशास्त्रान्वितत्वेन तस्यैव साधुत्वादिति अस्त्वेवमथ येषु प्रत्यय
संज्ञैव न भवति शमेः खः शंखः कलोष्टः कंठः इत्यादिषु तेषु कथं परत्वं द्वितीयवाक्यव्यापाराभावान्न भवन्तो वा कथं भवान् पि हियः प्रत्ययः स
परश्चेति प्रत्ययपूर्वकं परत्वं परिभाषसे तेन परिभाषाबाधप्रसंगेन स्यात् परत्वं अधिकारपक्षे तु प्रत्ययत्वपूर्वकं परत्वं न भवति किंतु परत्वविशि
ष्टस्यैवोत्पन्नस्य पश्चात् प्रत्ययसंज्ञा रहतु बहुलवचनात् प्रत्ययत्वाभावेपि परत्वमविरुद्धं । एवमपि नार्थ एते न बहुलवचनादेव परत्वमेवा
त्र व्यवस्था स्यात् एवं तर्हि प्रयोगनियमार्थमिदं पर एव प्रत्ययो न केवल इति अन्यथा प्रत्ययार्थमात्रविवक्षायां केवलोपि प्रत्ययः प्रयुज्ये
त यथा किमस्य छ्यसं किमस्य मात्रमिति यथा वा प्रकर्षविवक्षायां तरप्तमभावः तारतम्यमिति ननु सर्वत्र प्रकृतिविशेषं निर्दिश्यैव प्र
त्ययो विधीयन्ते तत्र शब्दोक्तयानीत्या परत्वविशिष्टस्यैव विधानमिति नास्ति केवलस्य प्रयोगः एवमपि प्रकृत्यर्थमात्रविवक्षायां केवलायाः
प्रकृतेः प्रयोगः स्यात् एवमथापचवृक्षे इति यत्र पुनरुभयं विवक्षितं प्रकृत्यर्थः प्रत्ययार्थश्च न तत्र केवलायाः प्रकृतेः प्रयोगप्रसंगः न
केवला प्रकृतिः प्रत्ययार्थमभिधातुं समर्थेति लक्षणाया असमर्थेति चेत् नो खल्वाक्ष्यमप्यशामत्यन्त लक्षणया प्रयोगं निवारयितुमर्हति
अतः केवलप्रकृत्यर्थविवक्षायां केवला प्रकृतिर्मा प्रयोजीति सूत्रारंभः वक्ष्यते च श्वावधारणं प्रत्ययः परो भवत्येव न तु कदाचिन्न भवतीति व
चनव्यक्तिः आ परत्वनिष्पत्तेश्चायं नियमः निष्पन्ने तु पदे तावदेव प्रयुज्यते अयं साधयंतिरिति विवक्षायां तु तस्मादपि प्रत्ययांतरं भवति ॥३॥

॥७॥ ॥७॥

॥आद्युदात्तश्च॥ ॥इहाप्येकस्याचउच्चारणोपसंभवात्सर्वेषां वाच्चां स्वरविधिर्नियमार्थः तत्र चितएवांतउदात्तः रित्येवमध्यउदात्तः तिदेव स्वरितः सुप्पितावे वानुदात्तौ दृष्टान्तेनुदात्तावेवैकश्रुत्यमिति स्वरांतराणामत्रानियमात्सारि शिष्यादाद्युदात्तस्य प्रत्ययो भविष्यतिना त्वरकोनाप्यनेकस्वरक त्त्वाह अनियतस्वरप्रत्ययप्रसंगादिति। अनियतः स्वरोयस्यासौ नियतस्वरः स चासौ प्रत्ययश्चानियतस्वरप्रत्ययः तस्य प्रसंगे प्रत्ययोः नियतस्वरो माभूदित्येवमर्थमित्यर्थः अनियतस्वरप्रसंगादितिपाठे त्वनियतस्य स्वरस्य प्रसंगादित्यर्थः अयमभिप्रायः आद्युदात्तत्वमपि ञ्नित्यादिर्नित्यमित्यादौ नियतत्वान्नस्यात् अस्मात्रानियमः स्यादेव यत्रापि नियमो नास्ति किंचित्वदुक्ते नियमे चिदादीनामनियमः स्यात् अतश्चितो नस्यवतिस्वरितएवेत्यादि किंतत्र तत्रानियमस्वरूपमाश्रयणीयं ततश्च प्रत्ययस्यानियतस्वरत्वमेव स्यात् किंच रित्येवोणेत्रमध्युदात्तमित्यपि नियमे अमत्रोपोत्तममध्युदात्तं माभूत् मध्यांतरं तु स्यादेव मध्यविशेषाश्रयत्वान्नियमस्य तस्मादेप

॥ ॥आद्युदात्तश्च॥ ॥अयमप्यधिकारः परिभाषा वा आद्युदात्तश्च स भवति यः प्रत्ययसंज्ञः अनियतस्वरप्रत्ययप्रसंगे अनेकाक्षु च प्रत्ययेषूद्देशस्यानियमे सति वचनमिदमाद्युदात्तार्थं कर्तव्यं तैत्तिरीयं ॥४॥

काचः प्रत्ययास्तेष्वनियतस्वरप्रसंगाद्वैञ्नित्यादिर्नित्यं प्रत्ययस्य च लसार्वधातुकमनुदात्तं सुप्पितौ चेति स्वरप्रकारणएवोच्यते एवं हि प्रकरणमभिन्नं भवति किंच हिराद्युदात्तग्रहणं छिश्वानुदात्तग्रहणं + वचनमिदमुदात्तार्थं ये पुनरनेकाचः प्रत्ययास्तेषूद्देशस्याप्यनियमः प्राप्नोति कदाचिदादेः कदाचिन्मध्यस्य कदाचिदंत्यस्येति तेषु वचनमिदमुदात्तार्थं तत्राप्याद्युदात्तार्थमिति किमर्थं पुनः प्रत्ययसंज्ञासन्नियोगेनायं स्वर उच्यते न + नकर्तव्यं भवति स्यादेतत् तत्र क्रियमाणे प्रत्ययग्रहणं परिभाषया तदंतस्य स्वरः प्राप्नोति इह तु क्रियमाणे नायं दोषो भवति उत्पन्नो हि प्रत्ययस्तदाश्रयाणां दंतविध्यादीनां निमित्तं भवति न तत्र घमानः न खलत्पद्यमानो घरउत्कहरणादीनां निमित्तमवकल्पते ततश्चाद्युदात्तश्चेत्यस्य प्रतियोगमुपस्थानेसति उत्पद्यमान एवतमसादिराद्युदात्तो भवति एवं तिवादिरनुदात्त इति दोषाभावः॥ ॥छ॥ छ॥ ॥छ॥ ॥छ॥ ॥

अतः प्रत्ययसंनिपातसंयोगेन स्वरो विधीयत इति । तज्ज्ञापकात्सिद्धं यदयं चित्त्वादिरुदात्तो भवतीत्याह । तज्ज्ञापयति प्रत्ययस्य चेत्स्व
रितं तद्विधिर्भवतीति । अनुदात्तत्वमपि तदितं तस्य न भविष्यतीति धातोरन्त उदात्तो भवतीत्यादेः प्रकृतिस्वरस्य विधानसामर्थ्यात् । यत्र त्वनु
दात्तः प्रत्ययः पातिवृक्षाभ्यामित्यादौ तत्र प्रकृतिस्वरः । अथ यतेर्यातो यो नित्त्व इत्यादौ स्यादिति शिष्टेन प्रत्ययाद्युदात्तत्वेन बाध्यते
यदि च प्रत्ययस्यान्तस्यानुदात्तत्वं स्यात् । निर्विषयं धातुप्रातिपदिकान्तोदात्तत्वं स्यात् । इदं तर्हि प्रयोजनं लवितव्यमित्यादौ प्रत्ययो सति का
लस्य वाद्युदात्तत्वे कृते पश्चादिड्वन्निरनुदात्तो यथा स्यात् । अन्यथा लूतम इति स्थिते आद्युदात्तत्वं शहं तस्य स्यात्ततः अनितिस्वरं नुस्वरभिन्नस्य
प्राप्नोति उभयोर्नित्ययोः परत्वादिटि कृते तस्य प्रत्ययग्रहणेन ग्रहणात्सति शिष्टत्वादाद्युदात्तत्वं स्यात् । एतदपि ज्ञापकात्सिद्धं यदयं यासु
ट्परस्मैपदेषूदात्तो ङिच्चेत्याह तज्ज्ञापयति आगमा अनुदात्ता इति । अन्यथा चिनुयातामित्यादौ यासुटः प्रत्ययादित्वात्सिद्धमुदात्तत्वमि
त्यनर्थकं तत्स्यात् । ननु पिदर्थमेतत्स्यात् । अन्यथा चिनुयादित्यादौ पिद्वचनो यासुडनुदात्तः स्यात्तद्यथेतावत्प्रयोजनं स्यात्तदा यासुट्परस्मै
पदेषु भवति आपिच्च लिङ्वृत्तीति पित्त्वमेव प्रतिषेधेत् । अवश्यं चैतज्ज्ञापकमाश्रयणीयं अन्यथा प्रत्ययसंज्ञासंनियोगेनाद्युदात्त
त्वविधावपि लवनीयमित्यादौ लवस्थायामनन्तकत्वात्सति स्वरे विशेषविहितत्वात्सार्वधातुकसीयुटि कृते पश्चाल्लादेशे प्रत्ययाद्युदात्त
त्वमित्यानुपूर्व्यां सीयुट एव स्यात् । ज्ञापकाश्रयणे तु सीयुडनुदात्तः इतोदित्यस्य उदात्तो भवति कथं भवति यावता सीयुटि कृते अ
कारस्य विच्छिन्नत्वादित्येष दोषः । यासुट उदात्तवचनं ज्ञापकं प्रत्ययाद्युदात्तत्वे कर्तव्ये आगमा अविद्यमानवद्भवन्तीति अन्यथा
चिनुयातामित्यादौ यासुटः प्रत्ययादित्वात्सिद्धमुदात्तत्वमित्यनर्थकं तत्स्यात् । किं च लवितव्यमित्यादौ एकस्मिन्नाद्युदात्तत्वे सत्यपि

प्वाङ्ग्वन्निवृत्किमित्यनुदात्तो भवति शेषनिघातेन नायं शेषनिघातस्य विषयः स्वरविधिशेषत्वात् अस्य यस्मिन्पदे यस्यामवस्थायां यस्माच्चउदात्तः स्वरि
तो वा विधीयते तस्य तस्मिन्पदे तस्यामवस्थायां सन्निहितमजंतरं निहन्यर्थः न चायं प्रकारोऽत्र संभवति· इह तर्हि स्नुघ्नो भवान् स्नौघ्नी प्रत्ययसन्नियोगेना
द्युदात्तत्वे प्रतिङीपउदात्तनिवृत्तिस्वरः सिद्धो भवति अन्यथा स्नौघ्न ई इति स्थिते प्रत्ययस्य चेत्याद्युदात्तत्वं बाधित्वा परत्वाद्यस्येति लोपे कृते उ
दात्तनिवृत्त्यभावात्स्यात् न वा बहिरंगलक्षणत्वात्· लोपो हि ङीपउत्पत्तिमपेक्षते स्वरस्तु निरपेक्षः अवश्यं चात्रांतरंगत्वमेवाश्रयणीयं अ
न्यथा कंसेन क्रीता कंसाद्धि ठन् इति ङीप् कंस ठ ई इति स्थिते ञ्नित्यादिरित्याद्युदात्तत्वं बाधित्वा परत्वाद्यस्येति लोपः स्यात् ततश्च ञित्स्वरे लोपे
न बाधिते प्रत्ययसंज्ञासन्नियोगेन विधीयमानमाद्युदात्तत्वमकारस्य स्थितमिति तस्य लोपे ङीपउदात्तनिवृत्तिस्वरः स्यात्· न नु च बहि
रंगत्वात्सर्वमिकादेशस्ततः प्रत्ययाद्युदात्तत्वमिति नास्तु दात्तलोपः इह तर्हि उत्से जाता उत्सादिभ्योऽञ् ङीप्र उत्स अ ई इति स्थिते ञित्स्व
रं बाधित्वा परत्वाद्यस्येति लोपे पूर्वोक्त्या नासा ङीपउदात्तनिवृत्तिस्वरः स्यात्· नैष दोषः ञित्स्वरो हि प्रत्ययस्वरस्यापवादः न चापवादवि
षय उत्सर्गोऽभिनिविशते तन्न तावदत्र प्रत्ययाद्युदात्तत्वं भवति अपवादं ञित्स्वरं प्रतीक्षत इति कुत उदात्तलोपः इह तर्हि अत्रेरपत्यं स्त्रीआ
तिजर इति ढक् आयन्नादिष्वपदेशिवचनं स्वरसिद्ध्यर्थमिति प्रत्ययस्वराद्धर्मियादेशः ङीप्र ॥ ॥ छ ॥ ॥ ॥

अत्रे परइति स्थिते तद्धितस्य कित इति स्वरं बाधित्वा परत्वाद्यस्येति लोपे कृते उदात्तनिवृत्तिस्वर ईकारस्य न प्राप्नोति तस्मादंतरंगत्वमेवाश्रयणीयं एवं
च हौत्रं प्रत्यत्रापि अंतरंगत्वादेव सिद्धमिति नार्थ एतदर्थेन प्रत्ययसंज्ञासंनियोगेनाद्युदात्तवचनेन· इदं तर्हि प्रयोजनं गोपायति धूपायति उभ
त्रिसंनियोगेनाद्युदात्तत्वे कृते पश्चात्सनाद्यंता धातव इति धातुसंज्ञायां धातोरित्यंतोदात्तत्वं भवति यदि तु त्रिसादिर्निसंप्रत्ययस्य चेतु चेतपरत्वा
द्धातुस्वरं प्रत्ययस्वरो बाधेत· स्यादेतत् अनुदात्तस्य तर्हि यत्र मदेशो कारलोपः किं प्रयोजनं स्यादेतत् कार्यशब्दाः पिस्वरितत्वात्माद्येकादेशो हू तेत स्यपूर्वं
प्रसंतवद्भावात् स्वरितत्वं प्राप्नोति परं प्रत्यादिवद्भावात्स्वरितत्वं च· परत्वात्स्वरितो भवति यदि तु लस्सार्वधातुकमनुदात्तं सुप्पितौ चेतु चेतपर
त्वात्तु अनुदात्तत्वं स्यादिति तन्न· अत्र हि द्वित्रिबुत्यत्तेः पिप्यासे स्वरितो भवति अत्र सत्यपि पित्स्वरितैकादेशयोरुभयोरनित्ययोः परत्वात्स्वरितत्वं

॥ ॥ अनुदात्तौ सुप्पितौ ॥ ॥ पूर्वस्यायमपवादः सुपः पितश्च प्रत्यया अ
नुदात्ता भवंति· दृषदौ दृषदः तल्वपि पचति पठति ॥ ॥ श्री ॥ ॥ श्री ॥

तेभ्यांत यते· स्वरितानुदात्तयोरेकादेशः स्वरितो भविष्यति· इदं तर्हि श्रौं बध्यापङ· स्थाप्येकादेशे कृते पित्स्वरः प्राप्नोति चित्स्वरः परत्वाच्चित्स्वरो भव
ति अन्तत्र क्रियमाणेपि स्वरः स्यात्· अत्रापि चापस्थितकरणसामर्थ्यादेव चित्स्वरो भविष्यति सामान्यग्रहणाविघातार्थं हकारो ऽकरणं
वषङ् श्लापं विदधीतस्वंत हि तेदेव तस्मिन् प्रयोजनः तदेतद्विधिर्माभूदिति पडुकं प्रकृतिस्वरस्य विधानसामर्थ्यादिति तत्र मात्सेत्तस्मादेल
सार्वधातुकमात्रस्यानुदात्तत्वे सति धातुस्वरस्य नका शतात् प्रातिपदिकांतोदात्तत्वमपि अग्निमान् वायुमान् अग्नीनामित्यादौ सनुड्ग्रहणम
नुप्रत्ययस्य तरस्यामिति स्वरस्यामिति स्वरसिद्ध्यर्थं स्यात् अत्र त्र्येतो दात्तादिति वर्त्तते तत्स्थलमतिककैरोन शोदेन ॥ ४ ॥ ॥ अनुदात्तौ ॥ ॥ सुपि
ति प्रत्याहारस्येदं ग्रहणं न सप्तमीबहुवचनस्य पित्वादेवानुदात्तत्वस्य सिद्धत्वात् अत एव हृन्तो सुप इति बहुवचनं पित एतत्र प्रक्रमानुरोधेन बहुव
चनं सुपश्च पकारेण प्रत्याहाराणकपः राबादीनांपि लकारेण ता पचति इति शब्बैत्रो दाहरणमिति पश्चात्त्वडुपदेशात् सार्वधातुकमपि स्यैव सिद्धं ॥ ॥

॥गुप्तिज्किद्भ्यः॥ ॥गुपगोपनइति॥गुपगोपनइति॥गुपव्याकुलत्वेगुपरक्षणे॥इत्येतयोस्तुग्रहणंनभवतीति जिनासमणेऽपठितस्यानुदात्तेतएवगुपेर्ग्रहणात्॥प्रत्ययसंज्ञाचाधिक्रियते॥तिकापुनरत्रविस्मरणाशंका॥किं स्वचर्थाप्रत्ययसंज्ञानर्थकस्यगुपादिसनोनस्यादिति॥शंकानेननिवार्यतेऽविकाऽसामर्थ्यादनर्थकस्यापिभवतीत्यर्थः॥अन्वर्थतात्वर्थवदनर्थकसंभवेऽर्थवतोग्रहणाद्धेतुः॥निंदाद्यपस्तुगुपादीनामर्थाः॥नसनः॥अन्यथागुपादीनामानर्थक्यप्रसंगात्॥धातूनांचानेकार्थत्वात्तत्रतत्रदृश्यतेप्रत्ययास्तुस्वार्थिकाअपिभवंतिसमासांतादिवत्॥जुगुप्सतइति॥धातोरित्येवमनभिधाना इत्यसनोनाऽर्धधातुकत्वादिड्भावः॥निंदाक्षमेति॥प्रापिकमेतदुपाधिवचनंतथाचक्षेत्रियचपरक्षेत्रेचिकित्स्यइत्यत्रग्रंथः॥अथवाक्षेत्रियाणीतृणानिनस्यार्थेक्षेत्रेजातानिचिकित्स्यानिविनाशयितव्यानि॥अथवाक्षेत्रियः॥पारदारिकः॥परदाराः॥परक्षेत्रंतत्रचिकित्स्योनिग्रहीतव्यइति॥संशयेपिदृश्यते

॥गुप्तिज्किद्भ्यः सन्॥ ॥गुपगोपनेतिजनिशानेकितनिवासेएतेभ्योधातुभ्यः सन्प्रत्ययोभवतिप्रत्ययसंज्ञाचाधिक्रियते॥जुगुप्सतेतितितिक्षतेचिकित्सति॥निंदाक्षमाव्याधिप्रतीकारेषुसन्निष्यतेऽन्यत्रयथाप्राप्तंप्रत्ययाभवंति॥गोपयतितेजयतिसंकेतयति॥गुपादिष्वनुबंधकरणमात्मनेपदार्थं॥ ॥

तमचिकित्सतयएवंविद्वान्विचिकित्सतितिचक्षुश्रुवान्विधिर्विचिकित्सदितिच॥अन्यत्रेति॥अर्थांतरवृत्तेर्धातोरित्यर्थः॥एतच्चप्रर्ववित्सनइत्सत्रनिपुणतरमुपपादितं॥गुपादिष्वनुबंधकरणमात्मनेपदार्थमिति॥एतदपितत्रैवोपयादितं॥गुपादिष्विति बहुवचनंमाच्वधादिस्त्राभिप्रायंकितिस्तुपरस्मैपदीतयाचानंतरमेवप्रयोगाद्दर्शितः॥सनोऽनकारः स्वरार्थः निलकरणसामर्थ्याद्धातुस्वरेणनभवतियस्तोतामंजिघांसतिसरवार्यः विशेषणार्थश्च॥अमतनगमांसनिहनेः सः हंसइत्यत्रमाभूत्॥तस्तोतितथोरेवधमप्यभ्यसात्सुखुपिस्वंइमिसत्रमाभूत्॥समइजोरिसत्रापिलिटिधातोरित्सतोधातोरित्यनुवृत्तेर्यघपित्सणिरिप्यः से॥अमगोहंसोवत्सरइत्यादौतुसप्तादेवोपणादीनांबुसन्निपक्षे॥अकारस्तुप्रतीषिषतीत्यत्रप्रतिस्वरार्थेरणःसन्निविहितेऽजादेद्वितीयस्येतिसण्हस्यद्विर्वचनंयथास्यात्॥एवंयथेहंनामथातनामितिवक्रमपुत्रीपिपिषतिअमनत्वाद्धधातुकेऽतोलोपः सार्वधातुकेशपामहेकादेशइतिनास्तिविशेषः॥ ॥छ॥ ॥

॥ ॥मान्बधदान॥ ॥अत्र मान्बधी अनुदात्तेतौ शेषावुदात्तेतौ। अभ्यासस्य चेकारस्य दीर्घो भवतीति स्मृत इतीत्वे दीर्घो भवतीत्यर्थः। ननु विशे-
षविहितो दीर्घः सामान्यविहितमित्वं बाधित्वा अवकाशे एव प्राप्नोतीति ज्ञापकात्सिद्धं यत्पत्यर्दाषोकित इत्यत्राकित इत्याह तज्ज्ञापयति नाभ्यासविकारेषु बाध्य-
बाधकभाव इति तद्विषयमेतत् इत्यादौ नुकि कृते मा भूदिति यदि चाभ्यासविकारेषु बाध्यबाधकभावः स्यात्तदा विशेषविहितत्वान्नुकि कृते अनजन्तत्वादेव न भ-
विष्यति दीर्घः किं प्रतिषेधेन अत एव डोढौकत इत्यादौ ह्रस्वे कृते गुणो भवति अन्यथा बबाधद् इत्यादौ चरितार्थो ह्रस्वः पश्चात् इत्यादौ चरितार्थो दीर्घः प-
रत्वाद्बाधेत। अपर आह सूत्रेण पञ्चम्येकवचनार्थो वृत्तिकारेणोक्त इति कथं अभ्यासस्येति पदच्छेदः अभ्यासस्य विकारोऽभ्यासः स चेत्त्वं भवति तथा हि लोपस्य

॥मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य॥ ॥मान पूजायां। बध बंधने। दान अवखंडने। शान अवतेजने। इत्येते-
भ्यो धातुभ्यः सन्प्रत्ययो भवति अभ्यासस्य चेकारस्य दीर्घादेशो भवति। मीमांसते। बीभत्सते। दीदांसते। शीशांस-
ते। उत्तरसूत्रे वाग्रहणात्सर्वस्य शेषो विज्ञायते तेन क्वचिन्न भवत्यपि। मानयति। बाधयति। दानयति। निशानय-
ति। अत्रापि मन्वर्थविशेष इष्यते मानेर्जिज्ञासायां बधेर्वैरूप्ये दानेरार्जवे शानेर्निशाने॥ ५ ॥ ॥

तावदभावरूपत्वादादेशो विधातुमशक्यः यदि चेकारस्य दीर्घत्वं स्यात्तत्र ङितङितनिर्देशोऽनर्थकः स्यात् दीर्घश्रुत्यैव चाभ्यासे उपस्थानादिजन्तस्य दी-
र्घविधानाद्दीर्घस्य ह्रस्वस्यैवादीर्घविशेषाभावात्तस्मादित्वमेवात्र ङिते न प्रसाध्यते। अथवा सन्ना ह्रस्वविहितस्य विकारस्य ग्रहणात्तदाह अभ्यासस्य चेका-
रस्येति। सर्वशेष इति न केवलं तस्मिन्नेवापि तु पूर्वयोरपि द्वयोरित्यर्थः। तेन क्वचिन्न भवतीति। अर्थान्तरे हि तेभ्यो धातुभ्यो णिच् इत्यर्थः एतच्च पूर्ववत्सन-
इत्यत्रोपपादितं मानयतीत्यादिरयं चुरादिषु पठितः निशान इति एते तावदवयवार्थ च मानेर्जिज्ञासायामिति। यद्येवं ज्ञानार्थत्वात्तेर्मानेरुत्तरसूत्रेणैव
सन् सिद्धः सत्यं दीर्घविधानार्थं मन् सिद्धभावार्थं च बधेर्वैरूप्य इति चित्तस्य दुर्गाधानुभवनिमित्तो विकारो वैरूप्यं शानेर्निशाने तीक्ष्णीकरणेऽपि त्रैवायो
पठितः शान तेजन इति तत्रैवेत्यर्थः॥ ५ ॥ ॥

धातोः कर्मणः॥ ॥कर्मत्वसमानकर्तृकत्वयोः क्रियायेस्वत्वादिच्छायाश्चप्रत्ययार्थत्वेनान्वयितावच्छेदकत्वात्तद्यपेक्षेणवंतेविः ज्ञापेतेइत्याह इषिकर्मणो धातुरिषिणैवसमानकर्तृक इति अर्थद्वारकमितिधात्वर्थस्यकर्मत्वात्समानकर्तृकत्वाच्चधातुस्तथाभ्युपदिश्यतेनस्वरूपेणेत्यर्थः किंकारणमसंभवात् यथ पिकरोतिमिच्छतीत्यादौधातोः स्वरूपेणापिकर्मत्वसंभवस्तथापिनतस्यस्वरूपेणार्थद्वारेणवासमानकर्तृकत्वंसंभवतिकिंचात्र क्रियानिर्देशात्स्वरूपपर त्वेसत्यकृतेस्तुलोकव्युत्पत्त्यनुसारेणार्थपरत्वमेवातः सुब्धातोरर्थद्वारकेविशेषणमितिइच्छायाः क्रियायाः कर्मभूतइच्छयैवसमानकर्तृकोर्थोयस्य धातोस्तस्मात्सन्प्रत्ययोभवतीत्यर्थः चिकीर्षतिजिहीर्षतीतिकृहृ सन्योरिकोझलितिकित्वंअज्झनगमांसनीतिदीर्घः ऋतइद्धातोःहलिचेतिदीर्घः सनःष त्वेद्विर्वचनेहलादिःशेषः ह्रस्वः कुहोश्चुरितिचुत्वंककारस्यचकारः हकारस्यजकारः अभ्यासेचर्चेतिजश्त्वंजकारः सनाद्यंताधातवइतिधातुसंज्ञालोलडा दि॰ धातुग्रहणंकिमितिकर्मणःसमानकर्तृकादितिविवचनाद्वाक्यान्नभविष्यतिनत्वेतदुभयंवाक्यार्थस्यसंभवति॰ सुबन्तादपिपुत्रमिच्छतीत्यादौअस

॥ ॥धातोःकर्मणःसमानकर्तृकादिच्छायांवा॥ ॥इषिकर्मयोधातुरिषिणैवसमानकर्तृकस्तस्मादिच्छा यामर्थेवासन्प्रत्ययोभवति॰ कर्मत्वंसमानकर्तृकत्वंचधातोरर्थद्वारकं कर्तुमिच्छतिचिकीर्षतिजिहीर्षति॰ धा तुग्रहणंकिं॥ ॥श्रीः॥ ॥

मानकर्तृकत्वान्नभविष्यतियत्रापिसमानकर्तृकत्वंगमनमिच्छतिआमनमिच्छतीत्यादौतत्राप्विकाच्चबाधकोभविष्यतिन्यद्यपिपुत्रमिच्छतीत्यादौत्र समानकर्तृकेषाच्याप्रकाणःतथापिचिकीर्षतिमारावसुबंतेषाप्रकाशेस्वंतेयुसमानकर्तृकेषुपरत्वाद्बाधिष्यतेयत्रापिक्यचोप्रसक्तिर्भविष्यतेकाचित्का तावयप्रतिषेधइतिकर्तुमिच्छतीतितत्रापिकाम्यच्बाधकः स्यात्प्रातिपदिकेष्वपिवृद्धाकुमारीपुत्रादिषुनसमानकर्तृकत्वंआसनशयनादौत कर्मत्वनहिस्याप्रातिपदिकंकर्माभिधायिविभक्त्याभिधेयत्वात्कर्मादीनांधातोरपितर्हिनस्यात् अथतत्रमुक्ततोधात्वर्थस्येच्छयामाप्यमानत्वात्क र्मत्वंप्रातिपदिकादपिस्यात्। अथात्रकर्मत्वप्रधानाभिधानान्नस्याद्वातोरपिनस्यादितिसमानंवचः एवंतर्हिसमानकर्तृकत्वादेवात्रनभविष्यतिशयना सनादौहिप्रकृत्यर्थस्यैवसमानकर्तृकत्वंक्रियान्वयत्वात्नप्रत्ययार्थस्याक्रियान्वयस्याक्रियात्वयस्यसिद्धानामयोधर्मस्तत्रवजादयइतिस्मरणात्। तिङः तादपियत्तएवहेतोः याकमिच्छतीत्यत्रार्थेयच्छतीतिभवतितत एवहेतोःसन्नपिनभविष्यतितदेवंनधातुमपहायकश्चिदपिप्रसंगइतिप्रश्नः॥

रामः
७

॥सोपसर्गादुत्पत्तिर्मा भूदिति॰ अन्यथा संघातस्य विशिष्टक्रियावचनत्वात्तत एव सन्स्यात्ततश्च सनंतत्वेन तस्यैव धातुत्वात्ततएव लङुपसर्गात्स्वर्वो-
त्पाम: प्राप्नोति॰ ननु लघ्वप्युपसर्गस्यद्विर्वचनप्रसंगो दोष: शक्यो दर्शयितुं सत्यं अस्य प्रसंग्यामप्यपरं दोषं दर्शयितुं लङ् दाहृत:॥ ननु धातुरेव विशिष्टक्रि-
यावाची उपसर्गस्त्वसान्निध्यमात्रेणोपकारक: ननु कस्याचिद्वर्थस्याभिधानेन॰ यथा भुंक्त इत्यत्र भुजिरेवाभ्यवहारे वर्त्तते आत्मनेपदं तु कर्तृरि अ-
र्थचोतरेणात्मनेपदं नाभ्यवहारोऽगम्यतेतद्वदुपसर्गसान्निध्यान्धातुरेव विशिष्टां क्रियामाह तत्र श्वार्थेह्राएकेकर्मत्वसमानकर्तृकत्वे अपि धातोरेव न
संघातस्य अवश्यं चैतदेवं विज्ञेयं धातुरेव क्रियावाची कथ्यते हि प्रयते संघात: क्रियावाचीति क्रियमाणेपि तस्य धातुग्रहणे योत्र धातुर्न तस्माद्वुत्पत्ति: प्रा-
प्नोति अकर्मत्वादसमानकर्तृत्वाच्च॰ एवं मन्यते प्रशब्दसान्निध्यान्नावत्प्रकर्षाख्यो विशेषो गम्यते तेन च प्रकर्षमपि धातुरेवावष्टे प्रशब्दे स्यवे यथाप्रसंग॥

॥सोपसर्गादुत्पत्तिर्मा भूत्॰ प्रकर्तुमैच्छत प्राचिकीर्षत॰ ६ ॥ ॥१०

त॰ क्रियावाचीति सति चैवं समुदायस्यैव कर्मत्वं न तस्य सो करोत्यर्थमात्रेणासंतु अतिनापि प्रकर्षमात्रेणान्वेवेयोत्र धातुस्तस्मादतुत्पत्तिप्रसंग: तस्मा-
पि कर्मत्वात्॰ तथा च करं करोति भीष्म मुदारं दर्शनीयमिति समुदायविशेषायामपि भीष्मादिभ्यो द्वितीया भवितितेषामपि कर्मत्वात्॰ न त्वेवमपिय-
था ज्ञनयद स्मा मुदायो ज्ञ नपदहरोन नग स्यते तथा कर्म समुदायस्या कर्मत्वात्समुदायादुत्पत्तिर्न भविष्यतियत्र ताहि समुदायस्यैव कर्मत्वं तत्र कथ
यथा प्रस्थातुमिच्छति प्रतिष्ठासत इति अत्र हि तिष्ठतौ तिष्ठतिनिवृत्ति: प्रतीयते प्रशब्दसान्निध्यो तु गति: तत्र यथा जिगमिषती सेक मेककर्म तद्वदत्रापि
तत श्च समुदायादेव स्यात्॰ यद्येवं योत्र धातु: कथं तत: सन् स्यस्यो कर्म॰ कर्मण इति नेष धातुसमानाधिकरणा यंचमी किंतर्हि षष्ठी कर्मणोवयवाद्धा-
तोरिति तिष्ठतेर्षती सादावयिके वस्यापिव्यपदेशिवद्भावेन कर्मवियवत्वं। एवमप्यसमानकर्तृकत्वान्नप्राप्नोति धातुमात्रस्याक्रियावाचित्वात्। अन:
समानकर्तृकादिच्छायां धात्वर्थे पंचमीतिव्याख्येयेन तरेवं संघातनिवृत्त्यर्थं धातुग्रहणमिति स्थित:॥ ६ ॥ ॥७ ७॥ ॥

कर्मणइतिकिमिति जिगमिषतीत्यादौ प्रयोगे प्रत्ययवाच्यायाइच्छायाः कर्मापेक्षायां प्रत्यासत्याप्रकृत्यर्थएवकर्मप्रत्येष्यते· यद्यपिक्रियाकरणमप्यपेक्ष
ते स्फुटतरा त्विच्छायाः कर्मापेक्षेतिसैवप्रकृत्यर्थेनपरपिष्यतेनार्थः कर्मग्रहणेनेतिप्रश्नः गमनेनेच्छतीति· अस्योगिवक्षायांगमेर्माभूदित्यर्थः अस्तिहि
कर्मग्रहणेऽप्यस्यामपीच्छायाः कर्मापेक्षायांयथेतद्वाकोभवतिगमनेनेच्छतीतितथामन्त्रपिस्यादितिभावः इच्छायामितिकिमिति। शद्वेणहित्स्त्रेपकर्मणि
णइतितद्धिवास्तु अभिधानशक्तिस्वाभाव्याच्चकरणाविशेषइच्छायामेवसन्भविष्यतिनमुस्त्रभ्रंतिप्यः पूजादावितिकाजितिप्रश्नः। कर्तुंजानातीतिः
लक्षणेकहारणो नैवं प्रतिपद्येतेतिभावः। वाग्वचनाद्गम्यमपिभवतीति· ननुसमानकर्तृकेष्वतुमुन्नितितुमुन्विधानसामर्थ्यादेववासंभविष्यतिकृत
स्तितस्यावकाशः चिकीर्षितुमिच्छतीतिनहात्रसनः प्रसंगः सनंतात्समनिष्पन्नइतिवक्ष्यमाणत्वात· धातोरितिविधानात्स्यात्तिधातुग्रहणस्यप्रयोजनं

कर्मणइतिकिंकारणान्मामूत· गमनेनेच्छति· समानकर्तृकादितिकिंदेवदत्तस्यभोजनमिच्छतिपज्ञदत्तः इच्छा
यामितिकिंकर्तुंजानाति· गावचनाद्गम्यमपिभवति· धातोरितिविधानादत्रसन आ ई धातुकसंज्ञानपूर्वत्र· आशं
कायामुपसंख्यानं शंकेपतिष्यतिकूलंपिपतिषतिकूलंश्वामुमूर्षति· इच्छासनंतात्प्रतिषेधोवक्तव्यः चिकीर्षि [illegible]

नरंदर्शयति· नसूर्वत्रेति· तथाचजुगुप्सतइत्यादावपिभावः। आशंकायामिति· आशंकासंभावनाप्रयोजकधर्मः तद्विशिष्टक्रियावचनात्स्वार्थेप्रत्ययः। कू
लंपिपतिषतीति· कूलस्याचेतनत्वादिच्छायाअसंभवः। श्वामुमूर्षतीति· शुनश्चेतनत्वेपिजी· वितस्याप्रियत्वाद्वाधाभिभवेपितिर्यक्त्वान्मर्तुमिच्छानभ
वतीतिशंकेपतिष्यतिकूलंशंकेमरिष्यतिश्वेत्यत्रार्थः। अस्याख्यानेतुयोयदिच्छतिसतत्सपूर्वरूपाणिकरोतियथादेवदत्तः कटंचिकीर्षुः मलत्यतिरज्जुरज्जुकी
लमूलादिकंयदात्वेकूलस्यापिचसर्वत्रपाणिदृश्यतेलोष्टाः शीर्यंतेभिदाजायंतेश्वानः खल्वपिमुमूर्षवएकांतशीलाः शस्त्राक्षाश्चभवंतितद्धिपूर्वरूपद
र्शनादिच्छाध्यारोप्यतेइच्छासेवायंयएवमिच्छाविनाभूतानिपूर्वरूपाणिकरोतिगोमामुमूर्षपायश्चक्रविल्लस्यापेक्ष्यानाम्नीयतेतत्रश्चाध्यारोपितेच्छाश्रयः
प्रत्ययइति·॥ ॥

विशेषणं किमिति· रक्षणस्य ग्रहणं किमित्यर्थः शैषिकादिति· मत्वर्थसंगादस्मोऽप्यनिष्टः प्रत्ययो वा यति शेषाधिकारविहितः शैषिकः मतुबर्थे भवो मतुबर्थी
यः महादेराकृतिगणात्वाच्छः मतुपोर्थे मतुबर्थः सोऽस्यास्तीति मतुबर्थिकः अत इनिठनौ· शैषिकप्रत्ययान्ताच्छैषिकः स तु रूपमस्य योऽनिष्टः तद्यथा शा
लायां भवो घटः शालीयः तत्र भव मुदकं पुन रछो न भवति विरूपक भवसे वत्स अहिच्छत्रे भव माहिच्छत्रं तत्र भव माहिच्छत्रीयं अणं ता च्छो भवति· तथा
दंडोऽस्यास्तीति दंडिकः अत इनिठनौ सोऽस्यास्तीति पुनष्ठन्न भवति विरूपकभवत्येव दंडिमतीमेनेति· सनंतान्न सनिष्यत इति· सत्रपर सेव सारूप्येण

विशेषणं किं नु पुनरिष्यते मीमांसिषते· शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः सरू
पप्रत्ययो नेष्टः सनंतान्न सनिष्यते॥ ॥७॥ ॥श्री४॥ ॥श्री४॥ ॥

चात्मस्माद्दृश्यं लक्ष्यते· तच्चार्थद्वारकमिति इच्छाप्रसनंतादिति पूर्वोक्त एवार्थो भवति· एतत्त्वमाय सिद्धं तथा हि ज्ञातोपदार्थे समुदाये सकल लक्षणं प्रवर्तते
ततश्च तत्प्रवृत्तेः प्राकृतत्वस्य यान्तः प्रकृत्य संभवान्नदं ताच्छ्रा स्नित त्वस्य पप्रसंगः इह यो ग्रामं गंतुमिच्छति तस्य पद्यपि ग्रामो नस्व रूपेणोऽिष्टः ग्रामो मेस्या
दिति तथापि गम्यमानतारूपेणासौ पीष्ट एव ग्रामो जिगमिषितः जिगमिषितव्यः सुजिगमिषु इति इच्छावाचिनः सनन्तात्तत्र ग्रामे कर्मणि लादयो भवन्ति
गमिं तु प्रति कर्मत्वं ग्रामस्य स्पष्टमेवमत एव ग्रामं जिगमिषति ग्रामाय जिगमिषती जिगासथ कर्मणो द्वितीयाचतुर्थ्यौ भवतः॥ ॥७॥ ॥

का॰ प॰ ३१

८

॥ ॥सुप आत्मनः॥ ॥अत्रापीछायामित्यनुवृत्ते स्तद्ग्रहणमेव सुबंतस्य कर्मत्वं विज्ञायते तस्याह इषिकर्मण इति॰ आत्मशब्दोयं परस्माद्व्यतिरिक्तवचनः स्वशब्दपर्यायो गृह्यते नवे
तनद्रव्यवचनः सहि गृह्यमाणः इछायामात्मसंबध्येत सुबंतेन वा तत्रेछायाः संबंधे कर्तृविशेषिणी आत्मन इछायां आत्मकर्तृकायामिछायां आत्मानोपेरिछतीत्यर्थः स्यात॰ तत
श्चात्मग्रहणमनर्थकं स्यात सर्वैवहीछा आत्मकर्तृका तस्यास्तद्धर्मत्वात् सुबंतसंबंधे तु देवदत्तस्य पुत्रमिछति यज्ञदत्त इत्यत्रापि प्राप्नोति परस्यापि हीष्यमाणा आ
त्मन एवेष्टो भवति तस्याप्यात्मत्वात॰ अनर्थकं चात्मग्रहणं स्यात तथा व्यभिचाराभावात् वृक्षस्य जलमिछतीत्येवं छायायाः पादमिछतीत्यादौ यत्राचेतनार्थकं विशिष्यते तदा
वर्ण्यमिति चेत्॰ न तत्रापि चेतनस्यैव परमार्थिकत्वात् सर्वमेव हि भोग्यं चेतनानामेव शेषभूतं वृक्षछायायाः पादमिछतीत्यत्रापि यस्य तत्तरुछायादिकमुपभोग्यं तदर्थमेव तत्

॥ ॥सुप आत्मनः क्यच्॥ ॥कर्मण इछायां वेत्यनुवर्त्तते॰ इषिकर्मण एषितुरेवात्मसं
बंधिनः सुबंतादिछायामर्थे वा क्यच् प्रत्ययो भवति॰ आत्मनः पुत्रमिछति पुत्रीयति॰ ॥ ॥

दिष्यते तरुछायादिकं तत्तस्यैव छायामात्रं अतः परस्माद्व्यतिरिक्तवचन एवात्मशब्दः तत्रापि यदीछायाः संबंधः स्यात पूर्ववत्कर्तृविशेषणमात्मग्रहणमनर्थकं स्यात सर्वस्या एवेछा
या एषितृकर्तृकत्वादिति सुबंतेन संबध्यते न संबध्यते सुबंतात्कर्मण इछायामभिधेयायां क्यच् भवतीति तत्रेत्सुबंतमात्मनः स्वस्य संबंधि भवति॰ कस्य स्वस्य स्वस्येत्यपेक्षायामि
छाया एषितुः सन्निधापितत्वात् तस्यैवैषितुरात्मनः संबंधिन इति विज्ञायते। तदाह एषितुरेवात्मसंबंधिनः सुबंतादिति॰ नत्वेवमात्मनः पुत्रं परस्य दासमिछतीत्यत्रा
पि सुबंतस्यात्मसंबंधित्वात्प्रसंगः नात्र यथा कथंचिदात्मसंबंधित्वं विवक्षितं किं तर्हि तदिष्यमाणमेव रूपमात्मसंबंधित्वेन यदेष्यते तदा प्रत्ययः॥ पुत्रीयती
ति॰ क्यचि चेतीत्वं॰ ॥ ॥छ॥ ॥

राम॰

८

सुप इति किमिति। कर्मण इति वचनात्तिङन्तात् प्रसङ्गः। नहि तिङन्तं कर्म। धातोश्चाप्रसङ्गो विशेषविहितेन सनाबाधितत्वात्। ङ्याप्प्रातिपदिकादुत्स
त्तावपि न कश्चिद्दोषः। नः आद्य इति पदसंज्ञाविधानात् तच्च क्रियमाणे सुब्ग्रहणे नियमार्थं नान्तमेव केयदमिति तदेव ङ्याप्प्रातिपदिकादुत्पन्नो विध्यर्थं
भविष्यति। नन्वसति नियमग्रहणे ङ्याप्प्रातिपदिकात्सुबन्ताच्चोत्पत्तव्यमविशेषात्तत्र न काइस्ते तथैव नियमार्थमथापि विध्यर्थं उभयथापि दोषः
नियमार्थे हि वाच्ये तीसाद्योः प्रातिपदिकात्सुबन्ताच्चोत्पत्तौ यथापि दोषाभावः नकारान्तेषु प्रातिपदिकादुत्पन्ने क्यचि नलोपो न स्यात् अथ तेषु प्रातिपदि
कादुत्पन्नो विध्यर्थं एवं सति वाच्यतीवाच्यतीसाद्योः सुबन्तादुत्पन्ने क्यचि जश्त्वादि पदकार्यं स्यात् अतः सुबन्तादेव यथा स्यात् प्रातिपदिकान्मा भूदिति नियमा
र्थं सुब्ग्रहणं कर्तव्यमेव। एवं तर्हि किं कर्मग्रहणेन ङ्याप्प्रातिपदिकादप्रसङ्गः सुबन्तमेव हि कर्माभिधायि पंचकं यत्नेऽपि द्योतकविभक्तेः प्रेक्षितत्वात् तदे
वं सुबन्तमपहाय न कश्चित्प्रसङ्ग इति मत्वा प्रश्नः। वाक्यादिति पदसमूहादित्यर्थः। महान्तं पुत्रमिच्छतीति किं चस्मात्पदत्र स्यात् प्रत्ययार्थगुणभूतेऽसमर्थ

सुब्ग्रहणे किं वाक्यान्मा भूत् महान्तं पुत्रमिच्छति। आत्मन इति किं राज्ञः पुत्रमिच्छति॥ ८ ॥

स पुत्रशब्दे योऽस्ति पिरस्परसंबन्धे समासो न स्यात् तथा च तल्लिङ्गं धनमात्मनः स्यात्। किमिदानीं न भवति महापुत्रीयतीति भवति यदैतद्वाक्यं भवति महान् पुत्रो महा
पुत्रः महापुत्रमिच्छतीति। अथ क्रियमाणेऽपि सुब्ग्रहणे कस्मादेवात्र न भवति प्रत्ययग्रहणपरिभाषया समुदायस्य सुबन्तत्वात्। किंपुनरयं कर्मणोः समुदायः कर्म
हो स्वित् समुदायः कर्म किं चातः यदि कर्मणोः समुदायो न कर्मग्रहणेन गृह्येत इति समुदायाद् प्रसङ्गः। अथ समुदायः कर्म अवयवा द्वितीयान्ता आप्तो च कर्मत्वा
त्। एवं तर्हि कर्मण्ण्यरेवायं समुदायः सुब्ग्रहणानुपपन्नः कर्मतिसान्मा भूदिति। अथ क्रियमाणेऽपि सुब्ग्रहणे कस्मादेव तस्मान्न स्यात् सुबन्तमेव हि तत्त असा
मर्थ्यात् कथं समासमर्थ्यसापेक्षमसमर्थं भवतीति अक्रियमाणे पुनः सुब्ग्रहणे नायं पदविधिर्भवति यत्र हि पदस्यैवासाधारणं किंचिद्रूपमाश्रितं स पदविधिः
कर्मग्रहणं तु न पदस्यैवासाधारणं धातोः कर्मण इत्यपदेऽपि प्रवृत्तत्वात् अस्ये तावद् समुदायस्यापि कर्मत्वमवयवयोश्च महत्त्वविशिष्टस्य पुत्रस्येष्यमाणत्वा
दिति तेषां समुदायाद् वृषस्याच्च मा भूदिति सुब्ग्रहणं। राज्ञः पुत्रमिच्छतीति। ननु सामर्थ्यादेवात्र न भविष्यति कथमसामर्थ्ये सापेक्षमसमर्थं भवतीति यत्र तत्त्वात्
रेणापि कृत्यस्य पदस्य प्रयोगं परस्येनिगमयते तत्र मा भूद् यथा अश्वमिच्छति यस्तु न मिच्छतीति नहि कश्चिदात्मनो घमिच्छति॥ ८ ॥ ॥ ॥

ककार इत्यादि। स्यादेतत्। नः काउ इत्यत्र अपि भ्याकाशीकर्णम् अस्तु इति। यद्येवं साम सुपाः सुः सामस्य अत्रापि प्राप्नोतीति चकारस्तद्विघातार्थ इति स्वरस्तु प्रत्ययस्वरेणापि सिद्धो बा
तु स्वरेण वा अकारस्तु दृषद्य इच्छति दृषघति दृषघतेराचुल्। अतो लोपः। यस्य हलः। न स्य विभाषा दृषद्कः। अत्रातो लोपस्य स्थानिवद्भावाद् उपधाया इति हृद्धिर्म भूत्। मृद
मिच्छति मघति मघधेश्चोयत। अतो लोपादि पूर्ववत् मघंयतो गावस्साधुरानत्वं पथ्यात्यादितिः प्रत्ययतीलादेरेव अपास्यैकादेश उदात्तो भवति। काविभांतान्मयप्रति
षेध इति। मांतग्रहणं प्रातिपदिकस्य विशेषणं न सुबंतस्य तेन पुत्रमिच्छतीत्यादौ काज्य वृतिका विच्छति कानिच्छतीत्यादौ च न भवति। उच्चैर्नचैरित्यत्र अधिकरणप्रधान
योरव्ययोरापे पदात्प्रतिषत्तात्कर्मत्वं गौरमसमाना क्षरनांतत्वादिलेके गोशब्दात्समानाक्षरांतान्नात्वात्र क्यज् भवतीत्येके मन्यंते अकारादयोदश समानाक्षराः तत्र
लवर्णांतिस्य क्यच् कर्णात स्य च प्रातिपदिकस्याभावादेकारादयोऽवेषां मध्यानामग्रहणं आमिन्य सेवाच्यतीसादिनमिच्छतीत स्मान्नायं स्थितः पक्ष इत्याहुः अतर
वाख्यहत्वावनुपमाः परेछायामिति। शेषषष्ठ्याः समासः कर्तव्यः सुबंतस्य कर्तव्यपरस्य छायासंबंधः परस्य सुबंतार्थापरइच्छातस्यामिसर्थः। अघापव इतिक्या

ककारो नः काइतिसामान्यग्रहणार्थः चकारस्तद्विघातार्थः काविमांतात्मयप्रतिषेधो वक्तव्यः इदमिच्छतित
चैरिच्छति नचैरिच्छति छंदसि परेछायामिति वक्तव्यं मालाहरकाश्च वाय वो विदन्॥ ९ ॥ ॥

छंदसीसुप्रत्ययः अश्वाघस्यादिसालं एतदेवमपिपरत आत्वविधानं ज्ञापकं छंदसि परेछायामपि क्यज् भवतीति न हि कश्चिदात्मनोऽघमिच्छति नवाचाक्यज
येष्वेदृष्यवशब्दादाचारे सर्वोऽदर्शनात्। अथ मालाक्यजंतात्कृत्स्न कालार्थोऽभवतः कभवंति पथ्यायोगाभावे कर्तरि वन तु कर्मणि प्रकृत्यर्थविशिष्टायामि
पत्यविषयाया इच्छायाः क्यजंतेनाभिधानं नस्माद्वृत्त्यंतात्विषयविक्रोतिःअतो जीवत्यादिवद्कर्मकः क्यजंतः। आचारस्यजंतेत्तूपमानकर्मणः पुत्रादेरंत
भावेपि उपमेयस्य छात्रादेरनंतर्भावात्सकर्मणिलादयो भवंत्येव पुत्रीयते छात्रः पुत्रायितश्च इत्यादिषण्या उपेनायतेकाक इति उपमानकर्तुरंतर्भावेपि
उपमेयकर्तृरिलो भवतीति तदुक्तं। इह च माणवकं मुंडं करोतिमुंडयति माणवकं मुंड्यते माणवकः मुंडयितं मामाणवक इति णयंतो तु मोश्या गुणविशिष्टकर्म
मात्रमंतर्भवितुं शक्नोन तु माणवकादिकं विशेषमितितस्य धातावनंतर्भावात्तत्र लादयो भवंति। यद्येवमनेनहेतुना क्यजंतादपि प्राप्नोति माणवकं मुंडमिच्छ
तिमुंडीयतिमाणवकं मुंडीयते माणवक इति॥ ॥

नात्रभवाभवितव्यं असामर्थ्यात् कथमसामर्थ्यं सापेक्षमसमर्थं भवतीति णिज्ञापितं हि न प्राप्नोतिस्यादेतत् नो भो करोतीत्युक्तो मौंड्यं माणवकस्य न
हि माणवकत्वं क्षिपतेत तस्य मुंडं करोतीति तत्रैवार्थे मुंडयतीति णिजुत्पद्यते मुंडं करोति माणवकमित्यत्राप्येषि मुंडस्यैव कर्मत्वं तत्सामानाधिकरण्यात्तु माण
वका द्वितीया सन्निः तदेवं माणवकात् योमौंड्यं साधारं विशेषमप्रतिपादितार्थं मुपादीयमानाः करोतीत्युक्तानभवंतीत्यदा पुनरहमौंकरोतीत्युक्तो भवतः नभ
वतितदाहृतिः तद्यथा वालीवर्दं करोतीति तं च मुंडं करोति मुंडयति वलीवर्दमिति णिजत्र भवति यद्येवमनेनैव हेतुना भंजायि न प्राप्नोति यद्द्विवाधा त्वेनापि
माणवको ये क्षते पुनरपि सापेक्षता किंच यदि न माणवकः करोतीत्युक्तः कथमत्रलकार उत्पद्यते मुंड्यते माणवक इति कस्यायं स्यायोन माणवकः क
रोतीत्युक्त इति नस्य सौमौंड्यमात्रेणामंतु अति माणवकस्य मसौ मौंड्यमपि निर्वर्त्तयतीति तत्तस्य स्वरूपेणाक्रियमाणोपि माणवको मुंडरूपेणाक्रिय
ते इष्यते चैतदेवं सतिपदिणिजभवतिमजपिसात् अथ अत्र भवति णिज्ञ पिनसादितिममानेवचः एवं तर्हि मुंडादयो गुणवचनाः गुणवचनाश्च सा
पेक्षाः उच्यते वसौ च सवचनासापेक्षेभ्योपि भविष्यति का च पुनरन्यपेक्षेभ्यः पुत्रादिभ्यः पुत्रादिभ्यः सावकाश इति माणवकं मुंडं मिच्छतीत्यादौ सा
पेक्षेभ्यो न भविष्यतीति यद्यं प्ययमपि णिज्ञ णमात्रकरणो विवक्षायां सावकाशः मुंडयति यं नापितः प्रवीणो मौंड्यकरण इति तथापि तत्करोतीति
सिद्धे णिचिपुनर्विधानमिदं सापेक्षेभ्योपि यथास्यादित्येवमर्थमेवपद्मादिविधा मुंडादयः धातवः प्रातिपदिकानि चत्तत्र सत्त्रैधातवउपात्ता
स्तेभ्यः स्वभावतावविशिष्टक्रियावचनेभ्यो णिजभविष्यति प्रातिपदिकानां तु विग्रह एव माणवकं मुंडं करोतीति अथवानेदं युगपद्भयं भवति
वा कं चप्रत्ययश्च ततश्च मुंडयतीति दृष्टमात्रं प्रतीयते तत्र विशेषार्थिना विशेषोनुप्रयोक्तव्यः अथवा मुंडस्यैव शुद्धेन करोतिना न्वयः मोस्य
विशिष्टेन तु माणवकस्य यथा गां दोग्धि पयइति शुद्धस्य दुहेः पूर्वेणाव्यभिसंबंधः पश्चात्तु गोदुहिना पयसः कश्च प्रत्ययस्तेन भिधानात्मकजिमा
णवकं मुंडीयतासुक्ते माणवकं मुंडमिवाचरतीत्यर्थात्तरमेव प्रतीयतेत्तदेवमिछामजेतानावेकतरिचलादय इति स्थितं ॥ ५ ॥ ॥

॥ ६७ ॥ ॥ ६७ ॥ ॥ ६७ ॥

॥ ॥काम्यच्च॥ ॥किमर्थो योगविभागः न सुप आत्मनः क्यच् काम्यच्चेति एकयोग एव क्रियेत एवं हि चकारो न कर्त्तव्यो भवति तत्राह योगविभाग
इत्यादि। एकयोगे हि सति उत्तरसूत्रे द्वयोरप्यनुवृत्तिः स्यात्· ननु योगविभागे ऽप्यानन्तर्यात्काम्यच एवानुवृत्तिः प्राप्नोतीति नैष दोषः चकारो ऽत्र क्रियते स क्य
चो ऽनुकर्षणार्थः तदनुकर्षणस्य चैतदेव प्रयोजनमुत्तरत्रानुवृत्तिर्यथा स्यात् काम्यचस्तु योगविभागसामर्थ्यादननुवृत्तिः प्रयोजनाभावादिति। अस्मि
काम्यतीत्यादौ गुणनिषेधो न प्रयोजनं अनार्द्धधातुकत्वात् इत्वगुणसंप्रसारणसंगात् विजुपे छन्दसीति उपयट् उपयजमिच्छतीति उपयट्काम्यतीत्यत्र न संप्रसा
रणं प्रयोजनं यजादिभिः कित्त्वो विशेषणात् यजादिभ्यो यो विहितः किदिति। वाङ्काम्यतीत्यत्रापि धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात् संप्रसार

काम्यच्च॥ ॥सुबन्तात्कर्मण आत्मेच्छायां काम्यच् प्रत्ययो भवति· आत्मनः पुत्रमिच्छति पुत्रकाम्यति वसुका
म्यति· योगविभाग उत्तरत्र क्यचो ऽनुवृत्त्यर्थः ककारस्येत्संज्ञाप्रयोजनाभावान्न भवति· चकारादित्वाद्धा काम्यचः॥ ॥

उपमानादाचारे॥ ॥क्यजनुवर्त्तते न काम्यच् उपमानात्कर्मणः सुबन्तादाचारे ऽर्थे वा क्यच् प्रत्ययो भवति· आचारक्रि
यायाः प्रत्ययार्थत्वात्तदपेक्षयैवोपमानस्य कर्मता· पुत्रमिवाचरति पुत्रीयति छात्रं प्रावारीयति कम्बलं अधिकरणा
च्चेति वक्तव्यं प्रासादीयति कुट्यां पर्यङ्कीयति मञ्चके॥ ॥

णं प्रयोजनं· चकारादित्वाद्धेति केचिद्व्याचक्षते अन्ते ऽस्य चकारो ऽनर्थकः धातुस्वरेणैवान्तोदात्तत्वस्य सिद्धत्वात् स आदौ कर्त्तव्यः अथवा अन्ते ऽपि कृतो
नियमार्थः संपद्यते विदितं वायमपदेशो नानुबन्धान्तरेणेति· तेनान्ते कृतस्य आदित्वफलसंपादनादादितः संपद्यत इति। अन्ये तु सुप आत्मनः क्यच् काम्य
च्चेति हि चकारकनिर्देशो ऽयं चकारादित्वं वर्णयन्ति चित्करणं तु पुत्रकाम्यतीत्यत्र सतिशिष्टमपि स्वरं बाधित्वा चित्स्वर एव यथा स्यादिति॥
॥उपमाना॥ ॥कुड्य इत्युपमेये सप्तमीश्रवणादुपमानमपि सप्तम्यन्तमेवेति कर्मविवक्षायामेतत्प्रयोगासंभवाद्वचनारंभः कुट्यामिति तु युक्तः पाठः॥

॥ ॥४०॥ ॥

कर्त्तुः आङ्॥ ॥आचारइतिवर्त्ततेइत्यतितेनतदपेक्षमुपमानस्यकर्त्तृत्वंविज्ञायतइतिभावः। सलोपश्चेति। पद्ययंचशब्दः समुच्चयपदत्वेनिर्दिष्टस्तेनतदेकमेववा
क्यंस्यात् आङ्सलोपोभवतइतितत्रश्चयत्रैवसलोपस्तत्रैवकाङपिस्यात् ओजायतइतिइहतुनस्यात् श्येनायतेकाकइतिअतोन्वाचयेशब्दःवाक्यभेदश्चा
श्रयणीयः अविशेषेणोपमानात्कर्त्तुः आङ्भवतियत्रतुसकारः संभवतितत्रतस्यलोपइतितदिदमुक्तं अन्वाचयशिष्टःसलोपः तदभावेपिकाङ्
भवतीति। श्येनायतइति अकृत्सार्वधातुकयोर्दीर्घः सलोपविधावपीति। सलोपस्यान्वाचयशिष्टत्वेनवाक्यभेदेसत्यपमपियुगपद्भवतीत्यर्थः। अपि
चशब्देनैतदर्शयतिआङ्विधौतावत्सर्वेभ्योतेवाकारमपारतायएवंसलोपविधावपीति। ओजायतइतिओजः शब्दोऽत्रतिविषयेतद्वृत्तिवर्त्तते। ओज

॥कर्त्तुः काङ् लोपश्च॥ ॥आचारइत्यनुवर्त्तते उपमानात्कर्त्तुः सुबन्तादाचारेऽर्थेवा काङ्प्रत्ययोभवतिसकार
स्यचलोपोभवति अन्वाचयशिष्टः सलोपः तदभावेपिकाङ्भवत्येव। श्येनइवाचरतिकाकः श्येनायतेकुमुदं
पुष्करायते सलोपविधावपिवाग्रहणमनुवर्त्ततेव्यवस्थितविभाषाचभवति। ओजायतेअप्सरायतेपयायते। ओ
जसोऽप्सरसोनित्यंपयसस्तुविभाषया। सलोपविधौचकर्त्तुरितिस्थानषष्ठीसंपद्यतेतेनालोसनिपमेसर्तिहंसाप्
तेनाहायतेनासारमाक्षायतेइतिसलोपोनभवति॥ १० ॥

सोऽप्सरसोनित्यंपयसस्तुविभाषयेति। अप्सरसस्तुपरतः प्रभृतेनैवभवतीत्येकेनैतिवयंओप्सरावतिरिक्तस्यसकारान्तस्योपलक्षणार्थंपयोग्रहणंअतए
वसलोपोवा ओजोऽप्सरसोनित्यमितिसामान्येनवार्त्तिकंतेनयशायतेयशस्यतइत्याद्यपिभवति। सलोपोऽप्सरसएवेत्यपरेतुपयसोभाष्येपिनस्थितः सलोप
विधौकर्त्तुरितिस्थानषष्ठीसंपद्यतइति। प्रत्ययविधौयस्येवम्पंततदेवलोपे(काङ्ओजोप्सर)नसेवंधेअर्थोद्विभक्तिविपरिणामोभवतीतिषष्ठ्यन्तंसंपद्य
तइत्यर्थः। तत्रालोन्त्यस्येतिनियमेसतीति। सकारेणकर्त्तुर्विशेषणात्तदन्तविधिविज्ञानात्तदर्थमेवचसेतिपृथक्पदंलुप्तषष्ठीकं। क्वचिदलोन्त्यनि
यमेसतीतिपाठः तत्रसंत्रेकदेशानुकरणात्समासेपिविभक्तेर्लुगभावः। यथाप्सरसांसमीपमिति॥ १० ॥ ॥ ॥ ॥

आचारक्विबादिकाङःपवादोपगल्भक्लीबधार्ष्ट्येक्लीबेत्वअधार्ष्ट्येहोडृअनादरेएतेभ्यःपचाद्यजन्तेभ्यस्तेतेतस्यचाकारस्यवाक्येअनुदात्तत्वाननुनासिकत्वप्र
तिज्ञापितेतेनक्विबन्तादात्मनेपदंभवतिवावचनात्क्विपामुक्तेकाङ्‌ भवतिक्विपसन्नियोगेनानुनासिकत्वप्रतिज्ञानात्काङः पस्पेइत्तं ज्ञानमभवति· कि
मर्थंपुनरिदंयावता गल्भादयोधातवएवानुदात्तेतःपठ्यन्तेतेभ्योगल्भतइत्यादिसिद्ध्यतिएतेभ्यएवपचाद्यजन्तेभ्यःक्वाङ्·अवगल्भायतइत्यादियथापि
धार्ष्ट्यादावर्थेगल्भादयःपठ्यन्तेतथाप्यनेकार्थत्वाद्धातूनांअवगल्भइवाचरतीत्यत्रार्थेपितएववर्तिष्यन्तेसत्यंअवगल्भाचक्रइत्यादौप्रसयोतत्वा
द्भाप्यथास्यादित्येवमर्थंक्विब्विधीयते· अथपदाधातुभ्यएवलिङ्विधीयतेतदाकथंभवितव्यंअवजगल्भेविविक्लीबेविजहोडेइति· अनेनधातु

॥आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा· अवगल्भतेऽवगल्भायते क्लीबते क्लीबायते विहोडते विहो
डायते· सर्वप्रातिपदिकेभ्य इत्येके अश्व इवाचरति अश्वायते गर्दभायते अश्वति गर्दभति॥ ॥छ॥ ॥

भ्य एवायं क्विब्विधीयत इति वदन्तएतानि रूपाणि न सहन्ते भवन्तीत्याङ्‌ तदयुक्तंभाष्यविरोधात् भाष्यकारस्तावत्सर्वप्रातिपदिकेभ्य इत्यनेन न सिद्धिमाशंकत तेन
तर्हीदानीमित्यादिना न हि धातुग्रहणेन मतितेन सिद्धिरुक्तोपपद्यते यत्किंकारणेपि सर्वप्रातिपदिकेभ्य इति वदता गल्भादिष्वपि प्रातिपदिकग्रहणमेव
मन्यते न केवलं गल्भादिभ्य एवापि तर्हि सर्वेभ्य एव प्रातिपदिकेभ्य इति हितस्यार्थः सर्वप्रातिपदिकेभ्य इत्यत्र सर्वेभ्य इति वक्तव्ये प्रातिपदिकग्रहणात्प्रा
तिपदिकादेव क्विब्विधीयते न सुबन्तात् तेन पदत्वाभावादश्वतीत्यतो गुण इति अपायाय रूपं भवति। विधुर विशदास्या क्विपि शपि गुणे एङः पदान्तादतीति
न भवति विधवति वेपति।। राजनतीति नलोपो न भवति। वाचतीत्यादौ तु कुत्वजश्त्वादि न भवति येपि सर्वप्रातिपदिकेभ्यः क्विपमिच्छन्ति तेऽपि गल्भाय
नुक्रमात्कर्त्रर्थं आत्मनेपदार्थानुषंधानाम्यं स्यामीति॥ ॥

॥भृशादिभ्यः॥ ॥लोपविधौ भृशादिभ्य इति पंचमी स्थाने षष्ठी विपरिणाम्यते हलश्च भृशादिषु विशेष्यंते तत्र तदंतविधौ सति हलंतानां लोपो विधीय
मानो भृशायत इत्यादावहलंते न भवति तत्र दाह हलंतानां च लोप इति स्वं च स्पष्टमेव प्रतीयते न्यायवशेन च शाह इति संनियोगे हि विज्ञायमाने अहलंतानाम्
ठानर्थकः स्यात् । अच्वेरिति प्रसक्तमभिसंबध्यत इति · तेनैकवचनमुपपद्यत इति भावः । किमर्थं पुनरिदमुच्यत इति । अच्वेरित्येतदधिकृतस्य प्रश्नः । तेने
ति । अनुप्रयुज्यमानो भवतिने सार्थः न च भवतेरनुप्रयोगं व्याख्यिलाकाङ्क्षं भवितुमर्हतीत्यत्र च अंते बुधावकाशत्वात् · किंच भवतेरभावे च्वेरप्रसिद्धिः

॥भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः॥ ॥भृश इत्येवमादिभ्यः प्रातिपदिकेभ्योऽच्व्यंतेभ्यो भुवि भवत्यर्थे क्यङ् प्र
त्ययो भवति हलंतानां च लोपः अच्वेरिति प्रत्येकमभिसंबध्यते · किमर्थं पुनरिदमुच्यते यावता भवतियोगे च्विर्वि
धीयते तेनोक्तार्थत्वाच्च्व्यंतेभ्यः क्यङ् भविष्यति · नतराहत्त्वप्रतिपत्त्यर्थं तर्हि प्रतिषेधः क्रियते अभूततद्भाववि
षयेभ्यो भृशादिभ्यः क्यङ् प्रत्ययः अभृशो भृशो भवति भृशायते शीघ्रायते · भृश शीघ्र मंद चपल पंडित उत्सुक उ
न्मनस् अभिमनस् सुमनस् दुर्मनस् रहस् रेहस् शश्वत् बृहत् वेहत् नृषत् शुधि अधर ओजस् वर्चस् भृशादिः ११

प्रसंगः तद्योगे तस्य विधानात् । कथं तर्हि उज्जंता त्वा भवति यावता उज्ज पि भवतियोगे विधीयते अत्र परिहारं वक्ष्यति कृत्वा । तिमिर विक्लवा पियो
गे उज्ज पवतीत्येतदेव ज्ञापकमिति । तत्स्वतत्त्वप्रतिपत्त्यर्थं तर्हीति । ननु एव युक्तमयपि च्व्यंतस्य दृष्टा भृशादयः कथं नाम प्रतीयेरन्निति च्व्यंतपर्युदासः क्रि
यते स्मात् इयं चाभूततद्भावविषयत्वेन साहृत्य अभूततद्भावविषयेभ्यो भृशादिभ्य इत्यादि भृशायत इत्यादिष्व उज्जंता नाम कृत्त्वा विधानुकयोरिति दीर्घः हल
तानां तु लोपः । असुमनाः सुमना भवति सुमनायते दुर्मनायत इत्यादि ॥ ११ ॥ ॥

मनशीभवतीति। इदानीमेवोक्तं नात्पत्रप्रसंगइति तस्मादस्यार्थविषयं प्रत्युदाहरणं प्रदर्शनीयं क्व दिवाभस्या भवंतीति येरात्रौ भस्यानक्षत्रादयस्ते दिवा क्व
प्रदेशे भवंतीत्यर्थः। इह मनस्शब्दः सोपसर्गः पठ्यते सुमनस् दुर्मनस् अभिमनस् उन्मनस् अत्र किं सोपसर्गात्संज्ञाता उत्प्रत्ययो भवत्साहोस्वित् उपसर्ग
रहितान्मनस्शब्दादेवेति विचारः तदर्थं च किमुपसर्गः प्रवृत्त्यर्थविशेषणं सुमनस्शब्दात् दुर्मनःशब्दादिति उत प्रत्ययार्थविशेषणं सुमनस्तो दुर्भवितो
अभिभवतो उन्मनस्तो इति कथं पुनर्मनस्शब्देन सह यष्ठि तदुपसर्गः प्रत्ययार्थविशेषणमाशंक्यते तद्विशेषणत्वे हि प्रायोभवतेः पठ्यते नैष शंकः प्रायोभ
वतेः पठितुं एवं हि सर्वेभ्य एव भवत्यादिभ्य उपसर्गविशिष्ट एव भवत्यर्थे प्रत्ययः स्यात् मनस्शब्दादेव च विशिष्टेर्थे स्यात् एवमर्थो मनस्शब्देन सह पा
ठः स्यात् तत्र यदा मनस्शब्देन स्वादीनां बहुव्रीहिः तदा प्रकृत्यर्थविशेषणं ते भवंतीति यदा त्वेते समस्ता एव तदा प्रत्ययार्थविशेषणं मनस्शब्देश्च वहति

॥ अव्ययेरिति किं मनशीभवति॥ ॥ १२ ॥ ॥

विषयेतद्वृत्तिवर्त्तते मनस्यासु सुभावतीत्यादावर्थे काङः प्रत्ययः प्रात्यर्थस्य व्याप्यत्वेन ख्यापयेदिति विकल्पितणिचोऽत्र विषये ग्रहणं तेन मनः कर्मशो
भनं याप्रोतीत्यादिरर्थो भवति तत्रापि पक्षे अङ्क्यात् ल्यपृद्धिर्वचनेषु दोषः अट् सुमनायत दुर्मनायत अभ्यमनायत उदमनायत उपसर्गस्यापि
काङन्ते धातावंतर्भावात् ततः पूर्वमडागमो प्राप्नुतः परो वा भवति। ल्यप् सुमनाय्य अभिमनाय्य उपसर्गस्य ल्यौ ते नुप्रवेशात् लघ्वतिरिक्तपदाभावात् समासाभा
मे ल्यपो भावात् सुमनायित्वेति स्यात्। द्विर्वचनं काङन्तात् सन्निवृत्ते उपसर्गस्य समन्ते ते नुप्रवेशात् तस्य द्विर्वचने सति सुसुमनायिषते। अविभिमनायि
षत इति स्यात् सुमिमनायिषते अपि मिमनायिषत इति चेष्यते। नैष दोषः चुरादौ संग्रामयुद्ध इति पठ्यते मनयाद्यः॥ ॥ ७ ६॥ ॥

संग्रामशब्दाद्युद्धवाचिनः तत्करोतीति तदाचष्ट इत्येव णिचः सिद्धत्वात् पठ्यमानस्तु ज्ञापयति सोपसर्गात्संघाताद्धातुसंज्ञानिमित्तप्रत्यये विधित्सिते उ
पसर्गाः पृथक्क्रियन्ते परिशिष्टाद्देवतु प्रसज्यत इति संग्रामशब्दो हि सोपसर्गाः संघात एव चुरादावपि पठ्यते न तूपसर्गस्तदा शाब्दं सङ्गतान्तथा च वा पठान्तस्येति प
रसवर्णविकल्पो भवति अन्यथा सन्न स्यात् स एव मर्थः पठ्यते असंग्रामयत शूरः संग्राममपि त्वा सिसंग्राममपि पत इत्यादिरूपं यथा स्यादिति तत्र श्लोकस्या
र्थस्य ज्ञापकत्वं नियमार्थो वा धातुसंज्ञाहेतुः प्रत्ययः सोपसर्गाद्यदि भवति संग्रामशब्दादेवेति ननु चात्रानुदात्तेत्त्वं संग्रामयतिरिष्यते तत आत्मनेप
दार्थमनुबन्धमात्रं स्यामीति पाठः स्यादिति कथं ज्ञापको नियमार्थो वा भवेत् स्यादेतत् अनुबन्धासंजनार्थो हि पाठो संग्रामयुद्ध इत्येव पठितत्वं संज्ञार्हस्तु
द्योतकः प्रयोगदर्शनादेवलभ्यते इति ङि कोरिव्याधिः नियमार्थस्तु संग्रामे तिष्ठति एवमपि यथा इङि कोरधेः पूर्वमात्मनेपदं भवति तथा स्यापि न स्या
त् तस्माद्द्वितीयः पक्ष आश्रीयते यद्येवं यथा इत्येनायत इति आचारार्थस्य काडो लुक्त्वादादुः प्रयोगो न भवति तथा स्वादीनामपि न स्यात् तद्धि
शिष्ट एवार्थे काड्विधानात् युक्तमेकोपसर्गेण विशिष्टार्थे का दुःस्यघत इति तस्य तेनाभिधानं इह पुनरनेके न तत्र मनायत इत्युक्ते संदेहः स्या
त् सुमनस्त्वो दुर्मनस्तो वेति तत्रासंदेहार्थमुपसर्गः प्रयोक्तव्यः अयं तर्हि दोषः मनः शब्दात् ङि कृते मनायत इत्यस्यातिङः तस्य स्यादेरित्तिङं ता
दुत्तरस्य निघातः आप्नोति पक्षान्तरे तु सुमनायत इत्यादितिङः तं संपघत इति तिङ्घत इति तिङ्ङतिरिक्ताभावान्निघाताभावः एवं तर्हि भृशादिभूय
र्गस्यापरांगत्वादेवं स्यादभिमुखामन्त्रित इत्यनेनान्तरं भृशादिषूपसर्ग इति इहापि तर्हि प्राप्नोति अभिभृशायत इति यद्यनेन मनस्युपसर्गा इति
व स्यादभिमनस्य राच्छेपरत उपसर्गस्तस्यैव प्रत्ययमनस शब्दस्यांगवद्भवतीति स्वरे कर्तव्ये इति एवं वरदेवदत्तः सुमनायत इत्यादेरेउपसर्गस्यापि ति
ङ् तिङि इति निघातो भवति योऽप्याह सुमनस शब्दात्प्रत्यये विधित्सित उपसर्गः पृथक् क्रियते परिशिष्टादेव प्रसज्यत इति तेनापि स्वरे परांगव
द्भावो वक्तव्य एव तदेवं प्रत्ययार्थविशेषणं स्यादयः मनस शब्दादेव केवलात्प्रत्यय इति स्थितं यदि तु सामान्येन ज्ञापकमिष्यते संघातात्प्रत्य
ये विधित्सिते उपसर्गाः पृथक्क्रियन्त इति नात्रेव यथा गोमोयादिह दत्त्वा त्रवसते पठ्यते मा च स्वर इति णिचि का प्रसज्येत तेपादिह द्योतिल्पब्रव
ीतीति तत्रो ज्ञापकान्तरं मृग्यं सतमं च किंचिदुक्तं थाभिधानं स्फारितमिति तु परास्यते ॥ १२ ॥

का॰पद॰ ३१

१४

॥ ॥लोहितादि॥ ॥पटपटायतीति। अव्यक्तानुकरणादित्यनेन डाचि विवक्षिते डाचि बहुलं द्वे भवत इति द्विर्वचनं ततो डाच् पटपटायतीति स्थिते नित्यमा
म्रेडिते डाचीति परस्य पकारस्य पररूपत्वे कारः पश्च परः पकारस्तयोः पररूपं पकारः। लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणीति वार्त्तिकं तदेतत्सूचिता
भिप्रायं न पुनरनेनाप्रहणं प्रमाणायत इत्याह यानि पठ्यंते इति। निद्रा करुणा कृपा शब्दा ह्येते विषये तद्वतीं वर्त्तन्ते अनिद्रो निद्रावान् भवतीत्य
करुणः करुणावान् भवतीत्य कृपः कृपावान् भवतीत्यस्मिन्नर्थे प्रत्ययः। अयायिति ठितेभ्यस्तु भवत्येव भवती अस्मोपपादनमाकृतिगणश्चायमिति। कु
त इत्यत आह तथा चेति किं पुनः सामान्यग्रहणार्थः ककारः का इत्येवेत्यत आपत्यस्येति निवर्त्तितेन वा यमापत्या इष्यते। इहतु हि किं स्यादि भाषाह

॥लोहितादिडाज्भ्यः क्यष्॥ ॥लोहितादिभ्यो डाजंतेभ्यश्च भवत्यर्थे क्यष् प्रत्ययो भवति। लोहितायति लोहिता
यते। डाजंतेः पटपटायति पटपटायते। लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि। यानि पठ्यंते तेभ्यः कर्तृक्यङ् अप
रिपठितेभ्यः क्यष् भवति। वर्मायति वर्मायते। निद्रायति निद्रायते। करुणायति करुणायते। कृपायति कृपायते। आकृ
तिगणोऽयं तथा च ककारः सामान्यग्रहणार्थोनुबध्यते नः का इति नहि पवित्तानाम ओनकारांतः शब्दोऽस्ति॥ ॥

इति निवर्त्तितेन चायं हलंत्यादिष्यते। इहतु हि भाच्छंदसि एतया च्छंदसीति वर्जं भुरणपुरिति किं द्वादिपर्गं तादपि मथास्यादिति एवाकाप्यस्येतद्वयादि
त्येवास्तु न चैवं पाशादिर्ग्यापः पाश्या अत्र प्रसंगः सामान्यविहितानां तिङां नियमार्थं प्रकरणं न च पाशादिपास्य एवमेपदमात्मनेपदं वा प्राप्नमस्ति अथा
प्याचारक्विबंतात्संभवेत् एवमपि याचयपइत्येवास्तु तत्राह नः काइति। ककारमनुबंधमासजतः सूत्रकारस्याप्याकृतिगणत्वमभिप्रेतमित्याह नहीति।
भाष्ये लोहितादिग्रहणप्रत्याख्यानपरमेव वार्त्तिकं व्याख्यातं ककारोपि प्रत्याख्यातः। कथं पुनः पटपटायतीति क्यषि योगे डाज् भवति यावता क्यष्युक्ते योगे
सविधीयते तत्राह॥ ॥

राम॰

१४

कालस्तिमि रिविस्या स्मिवलर्थे क्यष् विधीयते स भवति प्रयोगे न भवति इति नैवो क्तत्वात्तस्यार्थस्याप्तो भवतेः प्रयोगः एवं चास्याभाव इति व्यंयादित्वक
षायोगे ऽश्च नस्याङ्गजं नालक्षिथान मनुपपन्नं स्यादिति भावः। अथ किमर्थं वा क्यषङ् इति सत्रमारभ्यते न क्यषेवेति चकारो ऽत्र कर्त्तव्यः लोहितादिभ्यः क्यष् भ
वति चकारात्तमङ् चतत्र मङ्पक्षे आत्मनेपदं क्यष्पक्षे परस्मैपदमिति सिद्धमिष्टं अहो भट्टस्य सदृशो देवानांप्रियः यदिदमपि न दृष्टं क्यङ्मानिनोश्चेति इह तु
हि प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति लोहिनीशब्दात् क्यष् भवति सति चैवं क्यङ् तदात्मनेपदं क्यषं तात्परस्मैपदमिति विज्ञायमा
ने आत्मनेपदपक्षे क्यङ्मानिनोश्चेति पुंवद्भावेति अलोहिनी लोहिनी भवति लोहितायते इति प्राप्नोति अथ पुनः क्यषन्तादात्मनेपदं विकल्पिते लोहि
नीयते लोहिनीयतीतीष्टं सिध्यतीति स एष एव फलभेदः॥ ॥कष्टाय क्रमणे॥ ॥चतुर्थी समर्थादिति। संगतार्थः चतुर्थीसमर्थ इति तृतीयासमासः

क्यषः स्तिमिविक्यषापि योगे ऽत्र जभवतीत्येतदेव वचनं ज्ञापकं अच्वेरित्यनुवृत्तेरभूततद्भावे क्यष् विज्ञायते लोहितनी
ल इति मद्रूपेन मतं लोहितादिः॥ ॥कष्टाय क्रमणे॥ ॥क्यङनुवर्त्तते कष्टशब्दाच्चतुर्थीसमर्थात्क्रमणेऽर्थेऽनार्ज
वे क्यङ् प्रत्ययो भवति कष्टाय कर्मणे क्रामति कष्टायते अत्यल्पमिदमुच्यते सत्रकष्टकक्षकृच्छ्रगहनेभ्यः कण्वचिकीर्षाया
मिति वक्तव्यं कण्वचिकीर्षायामिति वक्तव्यं कण्वचिकीर्षा पापचिकीर्षा तस्यामेतेभ्यः क्यङ् प्रत्ययो भवति सत्त्रायते कक्षा
यते कक्षायते कष्टायते गहनायते कण्वचिकीर्षायामिति किं अजः कष्टं क्रामति॥ १३॥

प्रत्ययार्थेन क्रमणेन सह संगतार्थत्वं यस्य चतुर्थ्यन्तस्य तस्मादित्यर्थः एतच्च कष्टायेति निर्देशादेव लभ्यते क्रमणशब्दस्य पादविहरणे प्रसिद्धत्वात्
त्रैव प्रत्ययो मा विज्ञायीत्याह क्रमणे ऽनार्जव इति॥ अनार्जवं कौटिल्यं इह तु नार्जवग्रहणं नार्जवकरणं स्यैक्रमणोपपदं विस्पष्टार्थं इति किं पुनः क्रम
णमुत्साहः यथा मा करणाध्ययनाय क्रमते उत्सहत इत्यर्थ इति माख्यातं। कष्टाय कर्मणे क्रमत इति कर्मणुग्रहणेपो कष इति कच्छ् इड्भावः कृच्छ्र
दुःखं इह तु तत्कारणं पापं कर्म कष्टं पापं कर्म कर्तुमुत्सहत इत्यर्थः वृत्तिसर्ग इति सर्ग आत्मनेपदं प्रायेण तु परस्मैपदं दृश्यते तत्र पापकर्म कर्तुं कामः
कुटिलमाचरतीत्यर्थः अनुत्साहत्वात्परस्मैपदं। अत्यल्पमिदमुच्यत इति। सर्वलक्षणासंग्रहात् कथं तर्हि वक्तव्यमित्याह सत्रकक्षेत्यादि। अस्मिन्
श्लोके द्वितीयार्थे तेभ्यः प्रत्ययः चिकीर्षाप्रतिकर्मत्वात्। कण्वचिकीर्षायामिति प्रकृतिप्रत्ययसमुदायस्यार्थनिर्देशः कण्वं पापं सत्रादयो हि त्रिविध
पापपर्यायाः। तेभ्यश्चिकीर्षायां प्रत्ययः। पापं चिकीर्षतीति समस्तपदेन विग्रहः अजः कष्टं क्रामतीति। क्रमिरत्र पादविक्षेपे वर्त्तते कष्टं गहनदेशं क्रामति

॥कर्मणो रोमंथ॥ ॥कर्मण इति पंचमी रोमंथ तपोभ्यामित्यनेन सामानाधिकरण्यात् प्रत्येकसंबंधात्त् एकवचनं वर्त्तीति तिप्प्रत्ययाद् इत्त्वेऽर्यास्त्ये इत्यथो बुजिति युचि प्राप्ते स्माद् इत्वनिपातनात् क्तिन् । युजयि भवति वर्त्तनाच्चरणं चरसंपदादित्वाद् भावे क्विप् हनुचलनम् इति । हनुचलनम् इह चीर्णं चर्वितस्य पुनरुत्पदे इत्यादौ कष्षप्य चर्वणात् तत्रेत्यर्थः । कीटो रोमंथं वर्त्तयतीति । अवगीर्णमिममानप्रदेशात् लिंगः स्तः तत्र रोमंथायस्वं इष्यते वर्त्तयति इत्यत्र करोति गुलिकां करोती त्यर्थः । नात्र हनुचलनमस्तीति तपसः परस्मैपदं चेति एवं च नमो वरिवश्चित्रङ इति सूत्रे तपः शब्दः पठितव्यः स्तथा तु न कृतमित्येव इह तपस्यते लोकं जिगीषुरन्यैरिति छान्दसत्वादात्मनेपदं॥ ॥सुखादिभ्यः॥ ॥वेदनायामिति । विंदच्चेतनाख्यानिवासेष्विमस्मान्सुखादिर्यं तान्भावे सधर्थोयुचाप

॥कर्मणो रोमंथतपोभ्यां वर्त्तिचरोः॥ ॥रोमंथशब्दात्तपः शब्दाच्च कर्मणो यथाक्रमं वर्त्तिचरोर्थयोः क्यङ् प्रत्ययो भवति । रोमंथं वर्त्तयति रोमंथायते गौः हनुचलनम् इति वक्तव्यम् । इह मा भूत् कीटो रोमंथं वर्त्तयति । तपसः परस्मैपदं च तपश्चरति तपस्यति॥ ॥बाष्पोष्माभ्यामुद्वमने॥ ॥कर्मण इति वर्त्तते बाष्पशब्दाद् ऊष्मशब्दाच्च कर्मण उद्वमनेऽर्थे क्यङ् प्रत्ययो भवति । बाष्पमुद्वमति बाष्पायते । ऊष्मायते । फेनाच्चेति वक्तव्यं फेनमुद्वमति फेनायते॥ ॥शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे॥ ॥शब्दवैरकलहअभ्रकण्वमेघ इत्येतेभ्यः कर्मभ्यः करोत्यर्थे क्यङ् प्रत्ययो भवति । शब्दं करोति शब्दायते वैरायते कलहायते अभ्रायते कण्वायते मेघायते । सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यं सुदिनायते दुर्दिनायते नीहारायते । अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणं कर्तव्यम् । अटायते शीकायते कोटायते पोटायते सोटायते प्रुष्टायते॥ ॥सुखादिभ्यः कर्तृवेदनायां॥ ॥कर्मग्रहणमनुवर्त्तते सुखइत्येषमादिभ्यः कर्मभ्यो वेदनायामर्थे क्यङ् प्रत्ययो भवति वेदयितुश्चेत् कर्तुः संबंधीनि सुखादीनि भवंति । सुखं वेदयते सुखायते दुःखायते । कर्तृग्रहणं

किं सुखं वेदयति प्रसाधको देवदत्तस्य सुखदुःखग्रहणं नकृच्छ्रसत्रअलीककरुणकृपणसो

हिर्वेदिविरिम्पश्चेत्सोपसंख्यानिकोवा वेदनाशं यामर्थेनुभवश्रुतिप्रसक्तंज्ञानमनुभवः यद्यपि वेदनाशब्दो ज्ञानमात्रवचनस्तथापि कर्तृग्रहणेन सुखादीनि विशेष्यंते कर्तृगतानां च सुखादीनां वेदनानुभवरूपैवेति मत्वैव मुक्तं । क्रियापेक्षकर्तृत्वं वेदनासंनिधानात्तद्रूपत्वमेव विज्ञायते कर्तृत्वं च सुखादीनि विशेष्यंते नवैनाव्यभिचाराभावात् । सर्वैव हि वेदना वेदयितुरेव भवतीति तदेतदाह वेदयितुश्चेत्कर्तुः सुखादीनि भवंतीति आश्रयाश्रयिभावलक्षणाश्चसंबंधोपि भाक्तलक्षणाश्च संबंधो न जन्यजनकभावलक्षणः एवं च कर्तृग्रहणात् लुप्तषष्ठीकं पृथक्पदं वेदयत इति । आकुस्मादात्मनेपदी साधिकारो वेदिः पठितः एवं च प्रत्युदाहरणे परस्मैपदपाठः प्रमादजः । प्रसाधको मंगादेः कर्तीसिमसाध्यमानस्यनेत्रविकासादिना सुखमनुमानतो जानाति॥

॥नमोवरिवः॥ ॥करणविशेषेपूजायामिति। करणइतिसामान्यानुवृत्तावपिक्रतिधानशक्तिस्वाभाव्याद्विशेषउपलभ्यतइतिभावः। नमस्यतिदे
वानितिनमः स्वस्तिस्वाहेतिचतुर्थीनिभवतिप्रत्ययार्थेगुणाभूतस्यनमः शब्दस्यनिशब्दसंबंधाभावात्। अथवानमस्यतिनमस्कारेणायुज्यतइत्यर्थः। तत्रो
पपदविभक्तेःकारकविभक्तिर्बलीयसीतिद्वितीयैवभवति। एवंचनमस्करोतिदेवानित्यत्रापिद्वितीयैवभवति। परिचर्यायामितिपरिचर्याशुश्रूषा
चित्रीयतइति। आश्चर्यमेतत् लिंगंसमुदायस्यविशेषकंभवतीतिकंजनादयमनेपदंभवतिकाचचितीत्वंएतदर्थमेवचशहेवेणदि सत्रेचित्रशब्दोनपठि

नमोवरिवश्चित्रङः क्यच्॥ ॥करणइतिवर्त्ततेनमस्वरिवस्चित्रङ् इत्येतेभ्यः क्यच्प्रत्ययोभवतिकरणविशेषेपूजा
दौ। नमसः पूजायांनमस्यतिदेवान्। वरिवसः परिचर्यायांवरिवस्यतिगुरून्। चित्रङ आश्चर्येचित्रीयते। ङकारआत्मनेप
दार्थः॥ ॥पुच्छभांडचीवराण्णिङ्॥ ॥करणइतिवर्त्ततेपुच्छभांडचीवरइत्येतेभ्योणिङ्प्रत्ययोभवतिकरण
विशेषे। पुच्छादुदसनेपर्यसनेवाउत्पुच्छयतेपरिपुच्छयते। भांडात्समाचयनेसंभांडयते। चीवरादर्जनेपरिधानेवा
संचीवरयतेभिक्षुः। ङकारआत्मनेपदार्थः। णकारः सामान्यग्रहणार्थः णेरनिटीति॥ ॥१४॥ ॥

तः। चित्रीयतइतिविस्मापयतइत्यर्थइत्येकेविस्मापयतइत्यर्थेसेदस्यमेतथाचभट्टिकाव्येमायामृगंप्रकृत्यभवतितंतच्चित्रीयमाणोसावितिः॥ ॥
पुच्छभांड॥ ॥पुच्छादुदसनेपर्यसनेवेति। उदसनमुत्क्षेपणं। पर्यसनंपरितःक्षेपणं। उत्पुच्छयतइति। ननुपुच्छात्आचारेक्विप्विहितेआङः प्रयोगो
नभवतितत्कस्माद्धेतोःआङ्विशिष्टस्यैवचार्थस्याभिधानात्। तत्रहीहाप्युत्क्षेपणेतिद्वोविधानादुदः प्रयोगोनप्राप्नोतीति। अस्मात्त्रवि
शेषः पर्यसनेप्यर्थेविधीयतेतत्रोदसनेघोतयितुमुच्छब्दः पर्यसनेघोतयितुपरिशब्दस्यप्रयोगःक्रमः। समाचयनंराशीकरणं। आर्जनंद्रव्यलाभो
पायोपार्जितादिः। ङकारआत्मनेपदार्थइति। तेनोक्तमसूत्रेपुच्छादयोनशक्नुयास्यदितुमितिभावः॥ ॥१४॥ ॥छ॥ ॥छ॥ ॥

।।मुंडमिश्र।। ।।किमर्थमिदं न प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धं न च तत्करोतीत्यादिना तत्र धात्वर्थ नियमः क्रियते। अजानमतिक्रांतवानसराज
दित्यपि दृश्यते मुंडं करोतीति मा भवत्कमित्यादौ सा यथा स्यात् इथ यथा स्यादित्येवमर्थमप्रयं धात्वर्थ ग्रहणं हलि कल्योरत्वं तत्र निपातनार्थ अस्य चाह
लिकलिइति णिचि नेज्ञ चौ जिज्ञातीति वृद्धिः प्राप्नोति णाविष्टवदिति टिलोपश्च तत्र लोपः अजंतस्य प्राप्य नित्यः वृद्धिस्तु टिलोपे कृते अप्राप्तेरे
तुभयोरनित्ययोः परत्वाद्वृद्धौ कृतायामैकारस्य लोपः तन्नात्सोप्ययं भवतीति सन्वल्लघुनीति सन्वद्भावः सान्जदीर्घो लघोरिति दीर्घश्च अल
निपातनेन तु यद्यपि परत्वाद्वृद्धिः तथाप्यगेव लुप्यत इति सन्वद्भावोन भवतीति तदाह हलि कल्योरदंतत्व निपातनं सन्वद्भाव प्रतिषेधार्थमिति। उपलक्ष

॥ ॥मुंडमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच॥ ॥मुंडमिश्रश्लक्ष्णलवणव्रतवस्त्रहलि
कलिकृततूस्त इत्येतेभ्यः कर्मणो णिचप्रत्ययो भवति· मुंडं करोति मुंडयति· मिश्रयति श्लक्ष्णयति लवणयति· व्रता
द्भोजनेतन्निवृत्तौ च· पयो व्रतयति वृषलान्नं व्रतयति· वस्त्रात् समाच्छादने संवस्त्रयति· हलिं गृह्णाति हलयति कलिं
गृह्णाति कलयति· हलिकल्योरदंतत्व निपातनं सन्वद्भावप्रतिषेधार्थं अजकलत् अजहलत्· कृतं गृह्णाति
कृतयति· तूस्तानि विहंति वितूस्तयति केशान्· विजटीकरोतीत्यर्थः॥ ॥धातोरेकाचो हलादेः क्रियासमभिहारे यङ्
॥ ॥एकाचयो धातुर्हलादिः क्रियासमभिहारे वर्त्तते॥ ॥

णामेतत दीर्घो लघोरिति दीर्घाभावार्थं च दीर्घो लघोरित्यत्राथ ग्लोपस्तिवर्त्तते एवं च बलियदुप्रभृतिभ्यो णिचि अबीबलद् यीपटदिति भवति
न तु बबलत् अपपटदिति। सत्यापपाशेत्सत्र मुंडादयः पठितव्याः तथा तु उक्तमित्येव॥ ॥धातोरेकाचः॥ ॥हलादेरिति विशेषणादेकाच
इति बहुव्रीहिः॥ क्रियासमभिहारे वर्त्तत इति। समभिव्याहरणं समभिहारः क्रियायां वर्त्तत इत्यर्थः अनेन समभिहारस्य प्रकृतिविशेषणत्वं दर्शयति क्रिया
धातुवाच्या समभिहारविशिष्टापि क्रियैव भवति अतः प्रकृतिविशेषणत्वमेव युक्तं यथातिशयेन शुक्लोपि शुक्ल एवेत्यतिशायनं प्रकृत्यर्थ इत्यत्र।

॥ ॥७॥ ॥

तस्माद्यङ् प्रत्ययो भवतीति। ननु अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति तत्रैव समभिहारे द्योत्ये प्रकृत्यर्थसमभिव्याह्रियमाणे तद्द्योतनापेक्षत्वार्थः। यथाप्र
कृत्यर्थस्यातिशयद्योतनाय तरबादयस्तद्वत्। इह हि विप्रकीर्णानां पदार्थानां समूहानामेककालानामेकत्र राशीकरणं समुदायभावापत्तिः समुच्चयः स
मभिहारः यथा पुष्पादीनां धातुवाच्यान्तु क्रियैकैव। यद्यपि दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिष्विति अनेकार्थो दिविः पच्यतेतथापि
न पुनःपुनरनेकमर्थमाचष्टे किन्तर्हि प्रयोगभेदेन। यद्यपि चाश्रयभेदाद्विषयभेदाच्चाभिद्यते पाकः अन्य एव हि देवदत्तकर्तृकः पाकोन्य एव चान्यकर्तृ
कः अन्यश्चौदनस्य पाकोन्य एव तैलादीनां तथापि धातुना निवृत्तभेदैवं सा प्रत्याय्यते अत एव भवद्भिराख्यातेदत्तादेवदत्तवचनेन भवति नानुलुक
र्तृभेदः क्रियाव्यक्तिभेदेनव्याप्तः एकफलावच्छिन्नामेकां क्रियां कुर्वत्स्वपि बहुषु पचन्तीति दर्शनात् तदेवं धातुगम्या समूहरूपा प्रधानक्रियैके

तस्माद्यङ् प्रत्ययो भवति। पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः पुनः पुनः पचति
पापच्यते यायज्यते भृशं ज्वलति जाज्वल्यते देदीप्यते। ॥ ॥१५॥ ॥श्रीः॥ ॥

वेति समभिहाराभावः अधिश्रयणादीनां तु गुणक्रियाणां युगपदेकधातुवाच्यत्वेपि क्रमजन्मत्वादुत्सन्नावयवगीत्वेन युगपदवस्थानाभावा
दमूर्तत्वाच्च समभिहाराभावः तदेवं मुख्यस्य समभिहारस्य धात्वर्थविषये संभवाभावो गौणो द्योत्यत इति दर्शयति पौनःपुन्यं भृशार्थो वेति द्रव्याणां द्र
व्यान्तरैरव्यपेतानां समभिहारो भवति तथा क्रियाणामपि क्रियान्तरैरव्यपेतानामेतदुभयं भवति तत्र प्रधानक्रियाणां पौनःपुन्यं समभिहारः
पुनःपुनरनुष्ठीयमानविषये हि तत्प्रधानक्रियैव च पुनः पुनरनुष्ठीयते अवयवक्रियाणां तु भृशार्थता समभिहारः बुद्धिगोचरानेकसकला
वयवक्रियाविषया हि सा। पापच्यत इति। दीर्घोऽकित इति दीर्घः देदीप्यत इति। गुणो यङ्लुकोः। एवं समभिहारस्य द्योतितत्वात् क्रियासमभिहारे द्वे
भवत इति वा नित्यवीप्सयोरिति वा द्विर्वचनं न भवति १५ ॥

।धातोरिति किमिति। अन्यस्य क्रियासमभिहारे यङसंभवात्। अङ्गः।भृशं प्रातीति। अत्र धातूपसर्गसमुदायस्य विशिष्टक्रियावचनत्वात्तौ यङ् स्यात् ततश्चोपसर्गस्यापि द्विर्वचनं स्यात्। यदि सोपसर्गसंघातस्यैव क्रियासमभिहारे वृत्तिः प्रयाप्यते इत्यादौ यङ् न प्राप्नोतीति चेत्। सा तु । सा न क्रियासमभिहारे यश्च क्रियासमभिहारो न स धातुरिति तस्माद्धातुरेव समभिहारविशिष्टक्रियावाची उपसर्गस्तु संनिधिमात्रेणोपकारकः ततश्च संघातात्प्राप्तिर्भावात्तार्थो धातुग्रहणेन यत्र तर्हि संघातेनैव विशिष्टा क्रियोच्यते यथा यतते इति अत्र हि केवलस्तिष्ठतिर्गतिनिवृत्तिवचनः प्रपूर्वेण तु संघातेन गतिः क्रियैवोच्यते यथा जंगम्यते इति अत्राप्यनेकार्थत्वाद्धातूनां तिष्ठतिरेव गतौ वर्तते उपसर्गस्तु संनिधिमात्रेणोपकारक इति धातोरूपत्वात्तिविरुद्धात् तस्मादार्धधातुकसंज्ञार्थमेवाधातुग्रहणं तेन नुवोव चिरिस्यादिभवति आनुवर्ष्यकीत्यधातुनिवृत्तिः। अथ कथं यङ् तात्मनेपदं भवति कं वनस्यात् ङि तो धातोरात्मनेपदमुच्यते यश्चात्र धातुर्न स ङित्। न समुदायस्यानुबंधः यश्च ङित् न स योना सो धातुः यत्र चावयवे कृतं लिङ्गमव

॥धातोरिति किं सोपसर्गाद्व्यन्तिर्माभूत्। भृशं प्राटति। एकाच इति किं भृशं जागर्तिहला

दे इति किं भृशमीक्षते॥ ॥श्री॥ ॥श्रीः॥ ॥श्री॥ ॥छ॥ ॥

रितार्थे तत्र समुदायस्य विशेषकं भवति। अयं ङ् कारस्तत्रेभिधत्तु इत्यादौ गुणनिषेधार्थश्चरितार्थः । कश्चिदाह क्रियासमभिहारे यङि यकारोऽत्र प्रश्लिष्यते स चानुदात्तो नुनासिकः प्रतिज्ञायते तत्रानुदात्तत्वमवयवे चरितार्थं समुदायस्य विशेषकं भवति अनुदात्तेत इत्यात्मनेपदं सिद्धं भवति जञ्चक्रम्यते दन्द्रम्यते तत्र चंक्रम्यते दन्द्रम्य ग्रहणाल्लिङ्गादिति। सब्रह्मक्रमः। अथ कथं ऋतेरीयङ् तात्मनेपदं भवति सो पि हि ङ्कारो गुणनिवृत्तौ चरितार्थ इति सत्येऽत्र प्रामाण्यादिति इकार एकारो वानुदात्तः प्रश्लिष्यत इति प्रतिब्रूयात् न इकारे नुम्प्रसज्येत इकारे श्वी दितो निष्ठायामिती निषेधः स्यादिति। नैष दोषः नुम्विधौ गोः पादान्त इत्यतो नग्रहणमनुवर्तते तेनेतोत इकार इत्संज्ञकोये षां तेषां नुम्। श्वीदितो निष्ठायामित्यत्राप्येकाच इति वर्तते। स त्वेप्रतिविहितमायुष्मान् आ पुनरयं प्रयासस्तथा हि अनुदात्तङित् इत्यत्र न धातुग्रहणमस्ति ततः किं इतो भवति प्रसक्षमेव ङित् तस्मा स्मिन्नात्मनेपदं सिद्धं भवति न चैवमशिश्रियत अवोचदित्यादौ चङ् ङ्भ्यामपि प्रसङ्गः प्रागेव विकरणोत्पत्तेर्नुदात्तङितः इत्येतत्प्रकरणं प्रवर्तते। अन्यथा वर्तनस्यादौ विकरणानवधानान्नियमो न स्यात्। यथा च प्रागेव विकरणोत्पत्तेर्नियमः प्रवर्तते प्रवृत्ते तु नियमे विकरण इति तथा तत्रैव प्रतिपादिताम्

।सूचिसूत्रीसाटिसूआर्छिभ्योपयङ् वक्तव्यः किमर्थं सूच्यादीनामनेकाजर्थं अशादीनामहल्लाद्यर्थमूर्णोतिः। अनेकाजर्थमहल्लाद्यर्थं च सोसूच्यतइति। सू
चये सुत्रेस्सूत्रावमोचने मूत्रप्रस्रवणे चुरादिरपंठ्यतः अत्र णिलोपो यिपयङ् आद्धुगानुकत्वेप्रयोजनं। अटाट्यते अटपरणतोऽजादेर्द्वितीयस्येति षशब्दस्य
द्विर्वचनं। अरार्यतइति। अगतौ गुणोर्त्तिसंयोगाद्योः यङि चेति गुणः नन्द्राः संयोगादयः इत्यत्र यकारपरस्य प्रतिषेध इति वचनाद्रेफस्य द्विर्वचनं। अशाश्यत
इति। अश्नोतेरशेश्चग्रहणमित्यागमः। प्रोर्णोन्यतइति। उर्णुञ् आच्छादने नोपधोयं आश्रमिकं तु णत्वं तस्यासिद्धत्वात् नुशब्दस्य द्विर्वचनं ननु पूर्वत्रा
सिद्धीयमद्विर्वचने स्यादेतत् आश्रमिकं तु द्विर्वचनमभिप्रेतं तदुअतेतथाचोजटादिसंत्रदलादीनामसिद्धत्वात् इसे न द्विरुच्यतेइति लग्नं हि षु पिपृ

।सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनांग्रहणंयङ्विधावनेकाजहल्लाद्यर्थं। सोसूच्यते सोसूत्र्यते मोमूत्र्य
ते अटाट्यते अरार्यते अशाशाश्यते प्रोर्णोनूयतेः भृशं शोभते भृशं रोचत इत्यत्र नेष्यते १६ ॥

तोद्विरुच्यतइति वक्ष्यमाणं व्याहन्येत एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचन इत्येतदनित्यं उमो साम्पामस्येति लिंगात्। अन्यथा अनितेरिति णत्वे कृतेत
स्यासिद्धत्वामिशब्दस्य द्विर्वचने सति सिद्धं स्यात् सो णिणिषतीति। गृह्नकस्मान्न भवति लुनीहि लुनीहि इत्येवायं लुनातीति भवत्येव लोलूयतइति लोटः
हि न प्राप्नोति यस्य बाधितत्वात् अन्तरंगो पयङ् क्रियासमभिहारमात्रापेक्षत्वात्। लोट् तु व हिंगः क्रियाभेदाश्रयेध्वं तु संबंधे भावकर्मकत्वेषु चवि
धानात् सावकाशश्च लोट् कोवकाशः अनेकाजहल्लादिश्च जागृहि जागृहीत्येवायं जागर्तीति स्वरसस्वस्वेत्यायमीश्वतेइति। एवं तर्हि वेत्यनुवृत्तेः
पक्षेपयङ् यदानयङ् तदा लोड्भविष्यति। यङो कारीटाद्यतइत्यादेर्द्विर्वचनार्थः॥ १६ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

का॰ प॰ ३१
१८

॥ ॥नित्यंकौटिल्ये॥ ॥धातोरितिवर्त्तते गताविति तस्य विशेषणं गतौ वर्त्तमानो धातोरिति कौटिल्ये इति संनिधानाङ् इति विषयमेव कौटिल्यं ग
म्यते चंक्रम्यते दंद्रम्यत इति क्रमु पादविक्षेपे द्रम इत्यस्य मीमृ गतौ तु गतौ तु नास्ति कौतस्य यो त्सीयस्य धनिपातानि क्रो तिसकुटिलां गतिं संपाद
यन्नेवमुच्यते। नित्यग्रहणमनर्थकमनभिधानाद्वाक्यं न भविष्यति न हि चंक्रम्यत इति हन्तेरर्थं कुटिलं क्रामतीति वाक्यं हि क्रोतिगमपि तु सं
शयो हि वा माङ्गवति किं गति कौटिल्यमुत वह दयत्व निवंधनं जिह्मा चरणमिति वृत्तौ तु गति कौटिल्यमेव नियतं गम्यते कौटिल्य मात्र मति
पादने च वाक्यं नि वाप्यपितु मशक्यं अनिष्टं चात आह नित्यग्रहणं विषयनियमार्थमिति। गति कौटिल्यं विषयः तत्रैव यङ् यथा स्यादित्येवम

॥नित्यंकौटिल्येगतौ॥ ॥गतिवचनाद्धातोः कौटिल्ये गम्यमाने नित्यं यङ् प्रत्ययो भवति। चं
क्रम्यते दंद्रम्यते नित्यग्रहणं विषयनियमार्थं गतिवचनान्नित्यं कौटिल्य एव भवति। न तु क्रियास
मभिहारे भृशं क्रामति॥ ॥

र्थमित्यर्थः तदाह गतिवचनान्नित्यं कौटिल्य एव भवतीति। व्यवच्छेद्यं दर्शयति न तु क्रियासमभिहार इति। ननु यथा वा उत्वायाहृ षे वाक्यं र त्से प्राप्तः क्त
तो य कृष्ण निधीयते यथा वा जातः क्तो भूते प्राप्तस्तत्रोपकृष्य वर्त्तमाने विधीयते एवमत्रापि धातुमात्रात् क्रियासमभिहारे यङ् विहितः गतिवचना
त्तु कौटिल्ये इति तक्रकौण्डिन्यन्यायेनैव बाधः सिद्धः यथा वा विवक्षितार्थनमभिधानाद्वाक्यं न भवति तथा समभिहारे न गमो स्त्र प्रसङ्गो न भविष्य
ति अर्थेवमपि वचनापेक्षा वाक्यनिवृत्तावपि वचनमपेक्ष्यत इति नित्यग्रहणं चिंत्यप्रयोजनं॥ ॥ छ॥ ॥ ॥

राम॰
१८

॥लुपसद॥ ॥लुप्लृ छेदने षद्लृ विशरणगत्यवसादनेषु आङः सदिः पद्यर्थस्यास्य तु चौरादिकस्य णिजंतस्य एकाच इत्यस्यानुवृत्तेर्ग्रहणं चर गत्य
र्थः जप जल्प व्यक्तायां वाचि· जभि जृंभी गात्रविनामे दह भस्मीकरणे दंश दशने अनुनासिकलोपनिर्देशो यङ्लुगप्यनुनासिकलोपार्थः दंदशीती
ति गॄ निगरणे तुदादिः गृह्यते कर्यादिः तत्राकारांतविकरणेन साहचर्यात् दीर्घस्य ग्रहणमित्येके ह्रस्वोऽपीत्यपरे· धात्वर्थगर्हायामिति भावशब्दो यास्त्वर्थवि
तत इति दर्शयति· गर्हितमिति क्रियाविशेषणं तेन भावगर्हा त्रिप्यतेगर्हितत्वं तु छेदनस्य निषिद्धत्वाद् विषयत्वात् लोष्टमर्दितृणच्छेदीनखखा
दी च यो नर इति एवमुत्तरत्रापि यथासंभवं गर्हितत्वं द्रष्टव्यं· चंचूर्यत इति· चरफलोश्चेति नुक् उत्परस्यातः हलि चेति दीर्घः जंजप्यत इत्यादौ ज

॥लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायां॥ ॥लुप· सद· चर· जप· जभ· दह· दश· गॄ इत्येतेभ्यो भा
वगर्हायां धात्वर्थगर्हायां यङ् प्रत्ययो भवति। गर्हितं लुपति लोलुप्यते· एवं सासद्यते· चंचूर्यते· जंजप्यते· जंज
भ्यते· जंजप्यते· दंदह्यते दंदश्यते· निजेगिल्यते· भावगर्हायामिति किं साधु जपति· भावग्रहणं किं साधनगर्हा
यां माभूत् मंत्रं जपति वृषलः नित्यग्रहणं विषयनियमार्थमनुवर्तते· एतेभ्यो नित्यं भावगर्हायामेव भवति न
तु क्रियासमभिहारे भृशं लुपति॥ १७ ॥ ॥

पजभदहदशां भंजपदशां चेति नुक् निजेगिल्यत इति· ऋत इद्धातोः एपरत्वं द्विर्वचनं अभ्यासस्य गुणः जेगिर् य इति स्थिते ग्रो यङीति लत्वं च ग्रामो
ति हलि चेति दीर्घश्च तत्र दीर्घस्यासिद्धत्वात् लत्वे कृते विहतनिमित्तत्वाद् दीर्घाभावः। अमेतु न मु ने इत्यत्र नेति योगविभागेनासिद्धत्वं बाधित्वा दीर्घे
कृते लत्वमिच्छंति नात्र सवाकामत्ति· गर्हायामिति किमिति· भावस्येव तद्धर्मविशेषो लक्ष्यत इति प्रश्नः। धर्मिविशेषानुपादाने प्रशंसायमपि
एतदिष्यात् साधु जपतीति· जपति वृषलो मंत्रमिति· अत्र स्वरवर्णादिभ्रेषाभावात् भावगर्हा नास्ति वैदिकमंत्रजपं प्रति शूद्रस्यानधिकारात् तु
साधनभावो गर्हितः यस्य खल्वीदृशी गतिः शूद्रस्य चेदमुपशृणुयात् तस्य त्रपु जतुभ्यां श्रोत्रप्रतिपूरणं उच्चारणे जिह्वाच्छेदो धारणे शरीरभेद इति ना
सौ जपितुमर्हतीति· नित्यग्रहणमित्यादि· पूर्ववदेतद्व्याख्येयं १७ ॥

का॰प॰
१९

॥ ॥सत्यापपा॥ ॥सत्यापेत्येकमप्याणार्थ।सत्यमाचष्ट इति· ननु भाष्ये सत्यस्य कृत्वापुक् सत्यशब्दात्कृञि करोत्यर्थे णिज्भवति आपुक्च
सत्यं करोति सत्यापयतीत्युक्तं· सत्यं हृज ग्रहणमनार्थं प्रदर्शनार्थं वा करोतिरिष्ट इति मन्यते· आपुक् क्रकारणति· आपुग्वचनसामर्थ्याट्टि
लोपो न भवति· कश्चित्तु हकारावेवायं ग्रन्थः पठ्यते· अथ कथं पुनः शतापयेदिति· छन्दो वृषयः कुर्वंति· एतेन प्रशालापये दितिग्रप्रयोगो
व्याख्यातः पाशाद्विमोचन इति· प्रापिकोयमर्थनिर्देशः अन्यत्रापि भवति· अन्यथा विपाशयतीति विशद्वस्य प्रयोगो न स्यात् विशद्विनिर्दिष्टे

॥सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्॥ ॥सत्यादिभ्यश्चूर्णपर्यंत
भ्यश्चुरादिभ्यश्च णिच्प्रत्ययो भवति· सत्यमाचष्टे सत्यापयति· अर्थवेदसत्यानामापुग्वक्तव्यः अर्थापयति· वेदा
पयति· सत्यापयति· आपुग्वचनसामर्थ्याट्टिलोपो न भवति· पाशाद्विमोचने· विपाशयति· रूपाद्दर्शने· रूपयति· वी
णयोपगायति उपवीणयति· तूलेनानुकुष्णाति अनुतूलयति श्लोकैरुपस्तौति उपश्लोकयति· सेनयाभियाति
अभिषेणयति लोमान्यनुमार्ष्टि अनुलोमयति· त्वचं गृह्णाति त्वचयति· अकारांतस्त्वचशब्दः· वर्मणा संनह्य
ति संवर्मयति· वर्णं गृह्णाति वर्णयति· चूर्णैरवध्वंसयति अवचूर्णयति· चुरादिभ्यः स्वार्थे· चोरयति· चिंतयति· स्वा
भाविकत्वादर्थाभिधानस्य यथाप्राप्तं प्रत्ययार्था निर्दिश्यंते· १८ ॥

वर्मो वनस्येणपर्थेत्वात्पथा चारस्य चाहः प्रयोगो न भवति।एवमुपवीणयतीत्यादावपिद्रष्टव्यं· तूलतूलाग्रं तेनानुकुष्णाति अनुत्सृयती
त्यर्थः अनुग्रहणाती तितु पाठेन समीचीनोर्थः।अभिषेणयतीति· उपसर्गात्सुनोतीत्यादिना षत्वं· अकारांतस्त्वचशब्द इति· त्वचं संवर
णाद्स्यमा ह्वातोः पुंसि संज्ञायामिति घः।अवध्वंसयतीति· विकिरतीत्यर्थः।प्रातिपदिकाद्धात्वर्थ इत्येव सिद्धे सत्यस्यापुग्वचनार्थं वचनं अन्ये
षां प्रपंचार्थं· मालिनोपश्लोकयतीत्यादौ सापेक्षेभ्यो यथाप्राप्तमेवमर्थं वा· कथं पुनर्विमोचनादिरर्थो निर्दिष्टो लभ्यत इत्यत आह· स्वा
भाविकत्वादिति· प्रत्ययार्थो निर्दिश्यत इति· सूत्रकारेणानिर्दिष्टोपि प्रत्ययार्थो व्याख्याकारैर्निर्दिश्यत इत्यर्थः॥ ॥१८॥ ॥

रा॰म॰
१९

॥ हेतुमति ॥ ॥ लोके फलसाधनयोग्यः पदार्थो हि हेतुरित्युच्यते तेन तस्य ग्रहणे धूमयनेन वपतीत्यत्रापि प्रसज्येत हेतुमद्ग्रहणं चानर्थकं स्यात् कथं करणादि निवर्त्तते तस्य विशेषणं हेतुमतीति करणं क्रियासंबंधि च क्रिया हेतुमतीति किं विशेषणोपादानेन । ननु शब्दोपात्ते हेतौ यथा स्यादित्येवमर्थं मिति तस्याघ्यासमस्त्तीपायुक्तादिसत्रभ्रप माणायां तलीयायायासात्मनेपदं यथा स्यादर्थयोगमात्रे मा भूदित्येवमर्थं तन्नीपायुक्तग्रहणं एवं तर्हि प्रतिविरोधे कृत्रिमाकृत्रिमयोः कृत्रिमस्यैव ग्रहणं युक्तमिति तत्प्रयोजको हेतुश्चेति यस्य संज्ञा विहिता तस्यैव पारिभाषिकस्य ग्रहणमिति मत्वाह हेतुः स्वतंत्रस्य कर्त्तुः प्रयोजक इति । तदीयो व्यापार इति प्रवर्त्तना । तस्या व्याख्यातं भेदमाह प्रेषणाध्येषणादिलक्षण इति । भृत्यादेर्निकृष्टस्य प्रवर्त्तना प्रेषणा माज्ञेत्यर्थः । गुर्वादेराराध्यस्य प्रवर्त्तनाध्येषणा प्रार्थनेत्यर्थः । आदिशब्देन तत्समर्थाचरणं गृह्यते तेन च बहुधाभिधते अनुमतिरुपदेशोऽनुग्रह इति

॥ ॥ हेतुमति च ॥ ॥ हेतुः स्वतंत्रस्य कर्त्तुः प्रयोजकः तदीयो व्यापारः प्रेषणाध्येषणादिलक्षणो हेतुमांस्तस्मिन्नभिधेये धातोर्णिच् प्रत्ययो भवति · कटं कारयति · ओदनं पाचयति · ॥ १९ ॥ ॥

तत्र यस्यानुमति मंत्तरेण यो न निर्वर्त्तते तस्य राजादेरनुमत्या प्रयोजकत्वं वैद्यादेस्तु मुस्तापर्पटकं पिबेज्ज्वरित इत्साधुपदेशेन प्रवर्त्तकत्वं यः पुनः केनचिन्निषिद्धमपि तं पलायमानं निहरणाच्छिनिहन्ध्यः स गृह्यते तत्र निरोद्धा हंतुरनुग्रहं करोतीत्यनुग्रहेण तस्य प्रवर्त्तकत्वं सर्वत्र चायं विशेषः प्रकरणादिगम्यः सर्वत्रानुगतं प्रवर्त्तनामात्रमेव तु णिजर्थः । ननु यथापि त्वमामि तिस्तुकेयं प्रतिपित्त्वं स एव गृह्यते तेन तथात्रापि यं प्रति हेतुत्वं स एव हेतुमानिति युक्तं च प्रति हेतुत्वं तत्प्रयोजक इति वचनात्कर्त्तारं प्रतीति निप्राप्ते का कत्तृच्छिकारणक्रियायेश्च लाञ्च कारकपावस्य यस्मिन्व्यापारे प्रयोजकरूपेणोपयुज्यते तन्मेव प्रति स च प्रयोजकव्यापारोभिश्रयणादिः सर्वसाधनसाध्यो विक्लित्यादिर्वेति तदेव हेतुमत्वं युक्तं न पुनः प्रयोजकव्यापारस्य न हि तत्रासौ प्रयोजकरूपेणोपयुज्यते किं तर्हि कर्त्तृरूपेण यथा काष्टस्य पाका यथैव करणत्वं न तु ज्वलनायेसंतरयेत्यं तु कर्तृत्वमेव उच्यते णिचः प्रकृतिभूतेन धातुनेवाभिधीयतो सोर्थस्तेन फलाभावान्नत्र निज्न भविष्यति ॥ ॥

ननुपचतीत्युक्ते न ज्ञायते किं स्वयमेव पचति उतान्येन प्रवर्त्तित इति अन्योन्येन प्रवर्त्तितस्येयं प्रवृत्तिरिति द्योतनाय णिज् भवतु । एवं तर्हि हि
तोरिति वक्तव्यं करणादिष्वेव हेतोः करणे आपरेऽभिधेये णिज् भवतीत्यर्थः तथा तु न कृतं कारणादि इदानीं सत्यम् अभिधानस्वाभाव्यमत्र हेतुः
स्वभावतो हि णिच् प्रत्ययः प्रयोजकव्यापारमाचष्टे तेन पाकादयोऽपि कर्त्रायोल स्वहेतुर्येऽपि देशाः स्वहेतुत्वेनोपलक्षितो यस्मात्तस्मादेवं प्रयोजकव्या
पार एव मतुपोऽर्थः अत्र ह्युपक्षेपोऽन्तं भवतः हेतुमतीति प्रकृत्यर्थनिर्देशः हेतुमति यो धातुर्वर्त्तते इति प्रत्ययार्थो वा हेतुमति करणेऽभिधेये णि
ज् भवतीति ननु पचति पाचयतीति च अक्रमपर्थ्यन्ति गम्यते तत्कथमस्य प्रकृत्यर्थत्वं विशेष्यते उच्यते इह हि कः पचेः प्रधानार्थः यावता तण्डुला
नां विक्लित्तिः अधिश्रयणादीनां तु तादर्थ्यात् तदवच्छेदेन यः पचअर्थता यो हि यानार्थमुदकमाहरति विक्रयार्थं च काष्ठान्याहरति ज्वलितं वा
पनेतुमग्निं समिन्धे नासौ पचतीत्युच्यते तत्कस्य हेतोः विक्लित्तिं प्रति तादर्थ्याभावात् तदवच्छेदाभावाच्च स्वतन्त्रस्तादर्थ्यादेवाधिश्रयणादीनां
पच्यर्थता तद्वत्प्रयोजकव्यापारोऽपि तादर्थ्यादेव पच्यर्थ इति वाच्योऽभविष्यति णिच् प्रत्ययस्तु द्योतकः तथा च योऽप्येकान्तेन स्वामिनो
भक्तबीज बलीवर्दैः प्रतिविधत्ते स उच्यते पंचभिर्हलैः कृषतीति तदेवं पक्षद्वयसंभवे यदा यः पक्ष आश्रीयते तत्र तो यथा प्रकृत्यभि
हिते णिज् भवति एवमुक्तं प्रेषितादिशब्दाभिहितेऽपि स्यात् उक्तः करोति प्रेषितः करोतीति हेतुमद्विषयत्वात् करोत्यर्थस्य प्रत्ययार्थपक्षे तत्
कार्थत्वाणिज्भावः नैष दोषः प्रयोजकव्यापारस्य योऽनन्यार्थिणिज्विधीयते तस्य स्वशब्देन द्योतितत्वाद्योतकाभावान्न भविष्यति इहत
र्हि पाचयत्योदनं देवदत्तो यज्ञदत्तेनेत्युभयोः कर्त्तृत्वेनाभिधानं प्राप्नोति धातुवाच्यव्यापारे हि कर्त्तरि लो भवति पचिना च प्रयोजकव्यापा
रोऽप्यभिधीयते प्रत्ययस्तु द्योतक इति धातुवाच्यव्यापारसाम्यात् कर्त्तरि साम्यमिति द्वयोरप्यभिधानं प्राप्नोति पाच्यते देवदत्तेन य
ज्ञदत्तावितिप्रत्ययार्थपक्षे तु प्रकृत्यर्थोपसर्जनस्यान्यार्थस्य प्राधान्येन तस्यैव कर्त्तरि लकारः इह च गमितो ग्रामं देवदत्तो यज्ञदत्तेनेति
प्रयोजकव्यापारस्यापि णिवाच्यत्वात् अन्तरिक्तो गत्यर्थ इति कृत्वा गत्यर्थानां कर्त्तरि क्तः प्राप्नोति प्रयोजकस्य तु कर्मत्वात् तत्रैवेष्यते उ
क्तेहि णेत्रे कर्त्तुश्च कर्मसंज्ञा इति । इह च गमितिभेदपत्तेन तिष्ठेद्यते अगमत्विरि क्तो हिंसार्थ इति कृत्वा प्रयोजकव्यापारमति हारविवक्षायाम्

राम॰
२०

किंचान्वयव्यतिरेकाभ्यां शब्दार्थावसायः न च पचति पठति गच्छतीत्यादावंतरेण णिचं कंचिदपि प्रयोजकव्यापारोवसीयते उत्पन्ने तु णिचि प्रती
यते अतस्तदर्थत्वमेव युक्तं। पंचभिर्हलैः कृषतीत्यत्र त्वनेकार्थत्वाद्धातूनां कृषिरेव प्रतिविधाने पि वर्त्तत इति युक्तं न पुनस्तद्दर्शनेन सर्वत्र प्रकृ
त्यर्थत्वं। न चात्रापि पक्षे पाचयत्योदनं देवदत्तो यज्ञदत्तेनेत्यत्र ण्यर्थस्य प्राधान्यात्तेन व्याप्यमानस्य प्रयोज्यस्य कर्मसंज्ञा प्राप्नोतीति गतिबुद्धिप्रत्यव
सानार्थेति नियमान्न भविष्यति। इह तर्हि ग्रामं गामयति ग्रामं गमयतीति व्यतिरिक्तो ण्यर्थ इति कृत्वा गत्यर्थकर्मणीति द्वितीयाचतुर्थ्यौ न प्राप्नुतः
नैष दोषः ग्रामोत्र गमेरेव कर्म ग्राममकर्मकं गमनं कुर्विति णेरर्थः। इह तर्हि एधोदकस्योपस्कारयतीति व्यतिरिक्तः करोत्यर्थ इति कृञः प्रतिय
त्न इति षष्ठी न प्राप्नोति सुट् तु करोतिधातुमात्राश्रयत्वात् सिध्यति तुल्यत्वादपि तस्य सूपस्य अभावात् सिध्यति। अत्राप्येधोदककर्मके करोत्यर्थे प्रयुज्यत
इति षष्ठी भविष्यति। इह तर्हि अभिषावयति परिषावयतीति व्यतिरिक्तः सुनोत्यर्थ इत्युपसर्गात्सुनोतीति षत्वं न प्राप्नोति। अत्राप्यभिषवं
कुर्वित्युपसर्गविशिष्टे प्रकृत्यर्थे प्रयुज्यते णिरिति सिद्धं षत्वं। यदा तु ण्यन्ते नैवोपसर्गस्य संबंधस्तदा षत्वं भवति न वेति चिंत्यं। इह तर्हि भेदिका देवद
त्तस्य यज्ञदत्तस्य काष्ठानामिति प्रयोज्ये कर्त्तरि कृद्योगलक्षणा षष्ठी न प्राप्नोति अप्रधानत्वान्न तु तृतीया वक्ष्यति तथा पाचयत्योदनं
देवदत्तो यज्ञदत्तेनेति प्रयोज्ये कर्त्तर्यप्रधाने पि तृतीया भवति प्राप्ते; तथा षष्ठ्यपि भविष्यति। अथेह कथं णिज् भवति भिक्षा वासयंति कारी
षोग्निरध्यापयतीति कथं च न स्यात् अचेतनत्वात् चेतनावत एतद्भवति प्रेषणाध्येषणामिति। नैष दोषः नावश्यं स एव वासं प्रयोजय
त्याहो स्वनामिति यो पि तूष्णीमासीनस्तत्समर्थमाचरति सो पि वासं प्रयुंक्ते भिक्षाश्च प्रचुराश्च व्यंजनवत्यश्च लभ्यमाना वासं प्रयुंजते
तथा कारीषोग्निर्निवातएकांते सुप्रज्वलितः शीतकृतमध्ययनविरोधिनमुपद्रवमपनयन् अध्ययनेनुकूलो भवतीति अयथानुमतिस्तु

देशोनुग्रहस्तस्मिंस्तेषु णिज्भवति तथात्रापि भविष्यति। यद्यप्यनुमत्यादिषु प्रयोज्यव्यापारोद्देशेन प्रवृत्तिर्हि तु न तथा तथाप्यानुकूल्यावलम्बनेन
मेव प्रयोजकव्यापारत्वेनाध्यारोप्यते इह कश्चित्कंचिदाह एधि त्वमास्व भवान् अनुयुङ्क्तामाभवानिति तत्र प्रेषणाप्रयोज्यत्वस्य प्रेरकः प्रयोजक इति त
द्व्यापारे णिच् प्राप्नोति एकविषयत्वाच्च णिचो लोडादीनां च पर्यायप्रसंगः। नैष दोषः कर्तुः प्रयोजको हेतुरित्युक्तं प्रयोज्यश्चात्र न कर्ता तत्र यस्मै
संप्रति एधि इति त्वं प्रेमाप्तेः तस्य निर्व्यापारत्वात् कारकत्वमेव नास्ति कुतस्तद्विशेषः कर्तृत्वं कर्तृत्वमेव हि तस्य विधीयते प्रैषादिरूपायां कर्ता
भवेति प्रयाणनाम भव युध्यस्वेति राजत्वमेव विधीयते तेन हेवं प्रयोज्योत्र न कर्तेति प्रयोजकोपि न हेतुः। किमिदानीं पूर्वमेव कर्तुः सतः प्रयो
जको हेतुः यद्येवं व्यर्था प्रयुक्तिः अथाप्युपपत्तिशंका पाक्षिकीत्यप्रयुक्तेर्थवत्त्वापि यत्राप्रवृत्तो बलादिना प्रवर्त्यते तत्र णिज् न प्राप्नोति।
न बाधकः प्रवृत्तप्रवर्तने एव णिजिति किंतु प्रवर्तितोपि प्रयोज्यो यत्र प्रवर्तत एव न तु निवर्तते तत्र णिज् भवति अनुवर्तमानाप्रयुक्तिः
प्रयोज्यप्रवृत्तौ हेतुः न मध्ये विच्छिन्ना अतः प्रयोज्यप्रवृत्तिवेलायामपि बुद्धौ विपरिवर्तमानामेव प्रवृत्तिहेतुः तस्यामेव च दशायां प्र
णिजाभावनीति तदेवं प्रयोज्यप्रवृत्तसुप्रहितप्रयुक्तिर्णिजर्थः केवलानुलोडर्थ इति विवेकः उक्तं च द्रव्यमात्रस्य तु प्रैषे प्रेष्यादेर्लोडिष्य
धीयते। सक्रियस्य पदार्थप्रैषस्तदा स विषयो णिच इति किंच प्रयोक्तृधर्मः प्रयुक्तिर्लोडर्थः अनियतकर्तृकानुप्रयुक्तिर्णिजर्थः॥ १९॥

॥श्रीः॥ ॥छ छ॥ ॥राम॥

तत्करोतीत्युपसंख्यानमिति तत्रेति कर्मपरमेतत् तेन द्वितीयान्तात्प्रत्ययः करोतीत्यत्र प्रकृत्यर्थमात्रं विवक्षितं न प्रत्ययार्थः ते न रूपं तादृग्भावकर्मणो
भूतं भविष्यतो ह्यविवक्षितत्वेनापि स्वलो भवति सूत्रं करोति सूत्रयतीति। इह व्याकरणस्य सूत्रं करोतीति वाक्ये द्रव्यरूपं सूत्रं सूत्रशब्देनोच्यते तत्र अप
देशिवद्भावेनाभ्यतिरेकनिबंधना षष्ठी दृष्टेति तु व्याकरणं सूत्रयतीति प्रत्ययार्थभूत करोतेसमर्थाभिधायी सूत्रशब्दः संपद्यते उक्तं हि परार्थाभिधा
नं वृत्तिरिति तेन मत्वमावो निवृत्त इति सूत्रव्याकरणयोरभेदसंबंधो निवर्तते अस्ति च व्याकरणस्य करोति नासामर्थ्यमिति द्वितीया भवति षष्ठि
तु व्याकरणं सूत्रं करोतीति वाक्य एव सामानाधिकरण्येन तद्वा माणवकं मुण्डं करोति माणवकं मुण्डयतीतिवत् व्याकरणं सूत्रयतीत्यपलसिद्धं।

।तत्करोतीत्युपसंख्यानं सूत्रयत्याद्यर्थं॰ सूत्रं करोति सूत्रयति॰ आख्यानात्कृतस्तदाचष्ट इति णिच् कृल्लुक्
प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकं॰ आख्यानात्कृदन्तात् णिच् वक्तव्यस्तदाचष्ट इत्येतस्मिन्नर्थे कृल्लुक् प्रकृ
त्याः प्रत्यापत्तिः प्रकृतिवच्च कारकं भवति॰ ॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

सूत्रग्रन्थमोचने मूत्रप्रस्रवणे इति चुरादौ पाठादेव सूत्रयतीति सिध्यति अनेकार्थत्वाच्चार्थान्तरेऽपि भविष्यति गणपाठसिद्ध एवायमर्थ उपसंख्या
नेनापि प्रदर्शितः। आख्यानादिति वाक्यं आचष्टे आख्यानात्कृदन्तादिति। आख्यायत इत्याख्यानं कृत्यल्युटो बहुलमिति कर्मणि ल्युट् यलि
ङ्व्यदाख्यायते तत्सर्वं राजागमनादिकमप्याख्यानमिहाभिप्रेतं न कंसवधनलोपाख्यानादिकमेव संज्ञाभूतं। कृदन्तादिति। कृद्ग्रहणेनागति
कारकपूर्वस्यापि ग्रहणमिति कंसवधराजागमनसूर्योद्गमनादेरपि कृदन्तत्वं प्रकृतिप्रत्यापत्तिरिति। कृतो या प्रकृतिः सा विकारस्य रिसागे
नस्वेनैव रूपेणावतिष्ठत इत्यर्थः। प्रकृतिवच्च कारकमिति। यत्तत्र कृदन्ते संनिहितं कारकं तत्प्रकृतिवद्भवति कृत्प्रकृतेः शुद्धे णिचि यादृशं
भवति तादृशमस्यापि णिच्यस्य भवतीत्यर्थः॥ ॥

का० प०
२२

कंसंघातयतीति । हन्तेर्हननस्य घस्त्वं प्रत्ययो वधादेशः वधहननं वधः कंसस्य वध इति कर्मणि षष्ठ्याः समासः ततो णिच् हन्तो लुक् प्रकृतेः प्रत्यये नित्वं
धादेशपरित्यागेन हन्तिरूपेणावस्थानं घप्रत्ययं निपातनाच्छिष्टानामन्यतराभावादुभयोरप्यभावः स्त्वेवं वधादेशनिवृत्तिः सिद्ध्यतीति तथा णिपुष्यति पोगंजा
नातिपुष्येणापोजयतीत्यत्र कुलस्याण्ने नियोगशिष्टत्वात्तन्निवृत्तौ निवृत्तिरिति प्रकृतिप्रत्ययापत्तिवचनं । अथ कथं कंसमघातयत् राजानमजीगमत् यथा
कंसवधराजागमनशब्दाभ्यां णिचि विहिते गमज्ञानामधातुत्वं वतयोर्वणता ततश्चाद्विर्वचने अपित्यरोरेवणता तेन षदोषः प्रकृतिवच्च कारकमि
त्युक्तं कृतप्रत्ययेऽपि प्रत्युष्णेणिचि विहिते कंसादिकारकं कीदृशं भवतीत्याह नान्तरं भूतं द्वितीयाद्यं तन्ते नात्रापि ताहशो नैव रूपेण भवितव्यं ते नराजानमान्
गमयतीत्यत्र नलोपाभावोऽप्युपपन्नो भवति एवमपि किं संघातयतीत्यत्र हो हन्ते र्जिणान्नेष्विति कुत्वं हन्तस्तो विषमलोपरिति न त्वं च न प्राप्नोति किं कारणं
धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यं विज्ञायते । एवं तर्हि प्रकृतिवच्च कारकमिति चकारो भिन्नक्रमः कारकेभिस्यानन्तरं द्रष्टव्यः कार्यं शब्दश्चाध्याहार्यः

कंसवधमाचष्टे कंसं घातयति । बलिबंधमाचष्टे बलिं बंधयति । राजागमनमाच
ष्टे राजानमागमयति ॥ ॥२०॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥

एतदुक्तं भवति कृतप्रकृतिर्हिंस्यादिस्तस्याः प्रत्युष्णेणिचि यादृशं रूपं भवति तथा णापि ण्ये तस्य भवति कार्यं च तद्वदेव भवतीति एतेनाऽऽद्विर्वचनेऽप्यावृत्तिर्वा
ते बलिबंधमिति बंधनं बंधः बलेर्बंधो बलिबंधः पूर्ववत्कर्मणि षष्ठ्याः समासः शेषं पूर्ववत् । राजागमनमिति अत्र कर्त्तरि षष्ठ्याः समासः । राजान
मागमयतीति को अत्र कृतप्रकृतौ राजा कर्त्ता तस्यागमेः प्रत्युष्णेणिगितिबुद्ध्याऽऽदिना कर्मसंज्ञा भवति तस्मिन्नप्युपसंख्यानिके णिचि तथैव कर्म
संज्ञा भवति । इह तु देवदत्तेन पाकमाचष्टे इति णिचि विहिते देवदत्तेन पाचयतीति भवति न हि देवदत्तस्य प्रत्युष्णे णिचि कर्मसंज्ञा गतिबुद्ध्यर्थादीनामेवेति नि
यमात् । इह तु मृगरमणमाचष्टे मृगान् रमयतीति यदा प्रतिपाद्यस्य दर्शनार्थमात्मानं तदा णिजिष्यते नान्यदा तत्र यदा राजस्येव समासो मृगान्प्र
तिपाद्यमाचष्टे एतस्मिन्नर्थे कान्येवं मृगान्मन्यते इति तदा तस्य प्रतिपाद्यदर्शनार्था प्रवृत्तिरिति णिजं भवति यदा तु ग्रामे मृगरमणमाचष्टे तदा तत्र प्र ॥२०॥
गाणामसंभवान्न तद्दर्शनार्था प्रवृत्तिरिति मृगरमणमाचष्टे इति वाक्यमेव भवति एतच्च मृगरमणादिविषयमेव राजागमनादौ त्वन्यदापि भवति

राम०
२२

नाशः

।आङ्लोप इति। अत्राङा रात्रिना संबध्यते मर्यादायां य आकारस्तस्य लोपो भवति क्त्वाणमुलित्यादि पूर्ववत्। आरात्रिविवासमिति। विवसनं विवा
सः अतिक्रमणं रात्रेर्विवासो रात्रिविवासः कर्तरि षष्ठ्याः समासः तत आङ् मर्यादाभिविध्योरित्यव्ययीभावः यावद्रात्रेरिति। क्रमणं तावलम्बः कथयप
तीत्यर्थः वसेः कर्मकत्वात् प्रतिबुद्धौ त्वादिना रात्रेः कर्मसंज्ञा हेतुमण्णिचि भवति तदस्मिन्नपि णिचि भवति रात्रिं विवासयतीति। चित्रीकरणे प्रापी
ति। तस्मिंश्च चित्रीकरणमाश्चर्यकरणं प्रापि प्राप्नोत्यर्थे चित्रीकरणोपमानेन तस्मात् प्रोतीत्यस्मिन्नर्थे णिचि च भवति क्त्वाणमुलित्यादि पूर्ववत्। संभावय
न इति भूमा महान्वा आत्मनेपदी उज्जयन्त्या माहिष्मती विदूरे देश इति तावतो देशस्य प्राप्नुयादिति क्रमणं मामपास्यैवं सूर्यमुद्गमयतीति। प्रकृतिवच्च का
रकमिति सूर्यशब्दस्य प्रथम कारणं स ग्रामयते रेव सोपसर्गा इति सापादुच्छब्दस्यापि एत्थ कारणं अत्रापि सूर्यस्य हेतुमण्णिचि कर्मत्वादस्मिन्न

॥आङ्लोपश्च कालापं तसंपोगे मर्यादायां। आरात्रिविवासमाचष्टे रात्रिं विवासयति। चित्रीकरणे प्रापि। उ
ज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमनं संभावयते सूर्यमुद्गमयति। नक्षत्रयोगे ज्ञि। पुष्ययोगं जानाति पु
ष्येण योजयति। मघाभिर्योजयति॥ ॥ २१ ॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥

पि णिचि कर्मत्वं नक्षत्रयोगे ज्ञीति। तत्र द्विसे च ज्ञिर्ज्ञानार्थे नक्षत्रयोगोपलक्षितं वर्तते तस्मात् ज्ञानातीत्यस्मिन्नर्थे णिच् भवति क्त्वाणमुलित्यादि पू
र्ववत्। पुष्ययोगमिति। पुष्येण चन्द्रमसो योगः पुष्ययोग इति कर्तरि तृतीया उभयप्राप्तौ कर्मणीति नियमात् षष्ठी न भवति चन्द्रमस इति नियमेन गम्यमान
त्वादुभयप्राप्तिः पुष्यो हि चन्द्रमसं पुनक्ति संबध्नातीति तत्र युजेर्गत्यादिषु अनं तस्मिन्विवादत्वो कर्तुः पुष्यस्य शुद्धे णिचि कर्तृत्वमेवेत्यस्मिन्नपि णिचि क
र्तृत्वात् तृतीया भवति पुष्येण योजयतीति। लकारस्तु प्रधान एव कर्तरि भवति यथा शुद्धेऽपि। तत्र हीदं बहुवक्तव्यं न वक्तव्यं इह तावत् सूर्यमुद्गमयती
ति नियोगस्य प्रवर्तिष्यन्त एवाभिप्रायं निर्वर्तयति गन्तुश्चायमभिप्रायः माहिष्मत्यां सूर्योद्गमनं संभावयेयमिति न च सूर्यो निर्वर्तयति॥ ॥ ॥
॥ ॥राम॥ ॥छ॥ ॥

॥एतदेव प्रवर्त्त्यस्य प्रवर्त्तित्वं यदुक्तप्रवृत्तौ पितुरभिप्रायसंपादनं नहि कश्चित्परोऽनुगृहीतम् इति प्रवर्त्तते सर्व इमे स्वभूत्यर्थं यतन्ते तावदेते गुरुसुश्रूषं
न्ते ते यदीह प्रीतो गुरुरध्यापयिष्यति परत्र चाभ्युदेष्याम इति च वर्त्तंते दासा अपि कंबलं चेलं च लप्स्यामहे परिभाषाश्च न नो भविष्यन्तीति प्रवर्त्तन्ते यः सनिंदउपा
लंभस्तत्र स्यात्परिभाषणं शिल्पिनोऽपि मित्राणि च नो भविष्यन्तीति वेतनं च लप्स्यामह इति प्रवर्त्तन्ते य एवत्र सर्वत्र तत्तदुद्देशेन प्रवृत्तिः स्यादेतत् न तथा लब्धाप्य
भिप्रायसंपत्तिमात्रेणाप्रयोज्यप्रयोजकभावाध्यारोपेण णिज् भविष्यति। इह च कंसं घातयतीति येतावदेते कंसघातानुकारिणां नटानां व्याख्यानोपा
तेकंसानुकारिणान्ये सामाजिकैः कंसवधमारहीतं तादृशो नैव वासुदेवेन घातयंतीति यद्यपि चित्रं व्याचक्षते इयं मधुरा अयं प्रासादः अयं कंसस्त्र
यं भावान्वासुदेवः प्रविष्टः एतौ कंसकर्षिणायोमजवः एते उरुणि निपातिताश्च प्रहाराः अयं हतः कंसः अयमाकृष्ट इति तेऽपि चित्रगतं कं
सं तादृशो नैव वासुदेवेन घातयंतीति चित्रेऽपि हितबुद्धिरेव प्रवृत्ता। एते न चित्रलेखका व्याख्याताः ये पि ग्रंथवाचयंतः कंसवधमाचक्षते काथि
कानामतेषु सत्ति प्रभृत्याविनाशात्कंसादीन्वर्णयंतीति तेऽपि वर्णयमानाः श्रोतृणां बुद्धिस्थाः प्रसक्षवद्भवंति चित्तमपि तेषां तदाभेदकमिव भ
वति अत एव व्याश्रिताश्च भवंति नाना यक्षसमाश्रयो व्याश्रयः केचित्कंसभक्ताः केचिद्वासुदेवभक्ताः वर्णाभ्यत्वं खल्वपि पुष्यंति केचिद्र
क्तमुखाः केचित्कालमुखाः त्रैकाल्यमपि लोके लक्ष्यते कथायां वा श्रमाना यो हि वक्तारोपवंति। गच्छ हन्यते कंसः गच्छ घानिष्यते कंसः
किं गतेन हतः कंस इति न देवं काश्चित्कोऽपि बुद्धिस्थे न वासुदेवेन घातयति श्रोतापि शब्दोपहितरूपांश्च बुद्धौ विषयतां नातान्। प्रसक्षमिव
कंसादीन्साधनमन्यत एवराजानमागमपतीसादावपि यथासंभवं द्रष्टव्यं॥ ॥२१॥ ॥ २३ ॥ ॥ २ ॥ ॥

॥कंड्वादिभ्यः॥ ॥पदीमे कंड्वादयो धातव एव स्युस्ततो गग्रहणमनुवर्त्तते वा न वा अनुवृत्तौ यगभावपक्षे लङादिषु सत्सु कंडूवतीसा घनिषेधप्रसज्ये तकंडू रित्यादि च न स्यात धातोः सुवभावात क्विबंता सुसंभवेपि कंडूरीति न विद्यते नामात्र गम्यते कर्त्तरि क्विपो विधानात् संपदादित्वाद्भावे क्वि भविष्यति एवम पि कंडौ कंड्वः अचिश्नुधात्विति सुवङ् प्राप्नोति कंड्वा कंड्वे नोङ्धात्वोरिति विभक्तेरुदात्तनिषेधः स्यात् मंतुर्वल्गुरित्यत्र च तु कप्रसंगः अथ न तानुवर्त्तते कंडू रिति न सिध्यति यगंतात् संपदादित्वाद्भावे क्विप्यल्लोपयलोपयोः कृतयोर्भविष्यति न चैवमल्लोपस्य स्थानिवत्वादुवङ् प्रसंगः कौ लुप्तं न स्थानिवदिति वचनात् ननु च क्वौ विधिं प्रति न प्रतिषेधः अन्यथा लवमाचक्षाणो लौरित्यत्र क्वौ लुप्तस्य णेः स्थानिवत्वाभावेपि णौ कृतस्य टिलोपस्य स्थानिवत्वादूठ्न स्यात् अतोत्र स्थानिवत्वे सत्युवङ् स्यादेव अस्तु छ्वोः शूडनुनासिके चेत्यनेन वा व्यापिकर्त्तव्ये स्थानिवत्वं तस्य क्वौ विधित्वात् आदिष्टादचः पूर्वत्वाच्च तत्र

॥कंड्वादिभ्यो यक्॥ ॥कंडूञ् इत्येवमादिभ्यो यक् प्रत्ययो भवति द्विविधाः कंड्वादयो धातवः प्रातिपदिकानि च तत्र धात्वधिकाराद्धातुभ्य एव प्रत्ययो विधीयते पदं कंडू न तु प्रातिपदिकेभ्यः तथा च गुण प्रतिषेधार्थः ककारोनुबध्यते॥ ॥

एवोच्यते पुनरुवङो प्रसंगः एवमपि कंड्वः कंड्वः कंड्वो धातुविधिः प्राप्नोति मंतुर्वल्गुरिति च न सिध्यति यकि दीर्घे कृते मंतूर्वल्गूरिति स्यात् अथ प्रातिपदिकान्येव तत्रापि वा ग्रहणानुवृत्तौ स एव दोषः धातुपक्षे अनुवर्त्तनात् तर्हि वा ग्रहणं सं तु च प्रातिपदिकान्येव तत्रायमप्यर्थः ककारो नानुबध्यते भवति अनार्द्धधातुकत्वाद्देव गुणो न भविष्यति नेवं शक्यं इह हि सुखमति दुःखमति मगधमति इत्यतो लोपो न स्यात् अनार्द्धधातुकत्वा देव न च व्यंजनान्त एव शमः पठितुं यगभावपक्षे पि तथा प्रयोगप्रसंगात् तदुभये कंड्वादय इत्याह द्विविधाः कंड्वादय इति। धातुभ्य एव प्रत्ययो विधीयत इति। नित्यमिति भावः तेन पक्षे कंडूवतीत्यादि न भवति। न तु प्रातिपदिकेभ्य इति तेन कंडौ कंड्वः मंतुरित्यादि प्रयोगसिद्धिः न चाप्यसिद्धि पगमेत्यादि क्विप् विधीयते तदा सर्वे क्रियादोषा अनुषंगाः किं कारणं इत्थं ग्रहणादेतेषु क्विबसान्न चैते भ्य इदानीं क्विब् इष्यते पूर्वत्र तु पक्षे कंडूरि सिध्यर्थमेव क्विबिष्यतः कथं पुनर्ज्ञायते उभये कंड्वादय इति तत् श्लोकेन दर्शयति॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

धातुप्रकरणादिति। अनुवृत्तेन धातुग्रहणेन विशेषणात्ककारः संज्ञना च धातुत्वमेषामभिमतमिति विज्ञाय तदर्थः। यत् स्तुखल्वयमाचार्यः
क्वचिद्दीर्घमुच्चारयति कंडूञ् तृणीञ् महीङ् इति ततोऽन्ये धातुर्विभाषित इति धातुत्वमेषां विभाषितमिति मन्त्वर्थः। अथ कंड्वादीनामर्थनिर्देशः
कंडूञ् गात्रविकर्षणे· मंतु तृणीज रोषे· वल्गु पूजामाधुर्ययोः· असु मनस उपतापे· महीङ् वृद्धिपूजनयोः· लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने· इ
रस इरज इरञ् ईर्ष्यायां· दुवस् परिचरणे· मेधा आशुग्रहणे· कुषुभ क्षेपे· मगध परिवेष्टने· तंतस् दुःखे· सुख दुःखतत्क्रियायां· सपर पूजायां· अ
र आराकर्मणि· भिषज चिकित्सायां· भिष्णज् उपसेवायां· इषुध शरधारणे· चरण भुरण गतौ· चुरण चौर्ये च· तुरण त्वरायां· भुरण धारणपो

धातुप्रकरणाद्धातुः कस्य वा संज्ञनादपि· आह चायमिमं दीर्घमन्ये धातुर्विभाषितः· कंडूञ्· कंडूयति· कंडूयते· ञित्वात्क
र्त्रभिप्राये क्रियाफले इत्यात्मनेपदं· कंडूञ्· मंतु तृणीज· वल्गु· असु· मनस्· महीङ्· लेट्· लोट्· इरस· इरज· इरञ्· दुव
स्· मेधा· कुषुभ· मगध· तंतस· पंपस· सुखः दुःख· सपर· अर· भिषज· भिष्णज· इषुध· चरण· भुरण· तुरण· भुरण· ग
ङ्द्· एला· केला· खेला· लिट्· लोट्॥ ॥गुपूधूपविच्छिपणिपनिभ्य आयः॥ ॥गुपू रक्षणे· धूप संतापे· विच्छ गतौ· प
ण व्यवहारे स्तुतौ च· पन च· इत्येतेभ्यो धातुभ्य आयप्रत्ययो भवति· गोपायति· धूपायति· विच्छायति· पणायति· पनाय
ति· स्तुत्यर्थेनैव पणिना साहचर्यात्तदर्थः पणिः प्रत्ययमुत्पादयति न व्यवहारार्थः शतस्य पणते सहस्रस्य पणते· अनु
बंधश्च केवले चरितार्थस्तेनायप्रत्ययांतात्मनेपदं भवति॥२१॥

घणयोः गद्गद्वाक्स्खलने· एला केला खेला विलासे· लिट् अल्पार्थे कुत्सायां च· लोट् दीप्तौ॥ ॥गुपूधूप॥ ॥विच्छायतीति॥ विच्छि स्यं तुदा
दौ पठ्यते तत्सामर्थ्यादायप्रत्ययांतादपि श विकरणो भवति न तु शप् यथा जुगुप्सते इत्यात्मनेपदं तेन विच्छायंती विच्छायती ति आ च्छी नद्योर्नुमिति
नु म्विकल्पो भवति। अत्र येतु सार्वधातुके य्यायप्रत्ययस्यैव तु दादिपाठसामर्थ्यान्न विकल्पमाहुः। स्तुत्यर्थेनेति भद्दिका ये तु व्यवहारार्थादप्यायः न चो
पलेव ति ज्ञापणाद्भाषादिति। अनुबंधः केवले चरितार्थ इति। अवयवे घविति नार्थलिंगं समुदायस्य विशेषकं भवति यथा गुपादीनामनुदात्तेत्त्वमि
तिभावः। ये तु व्यवहारार्थादप्यायमिच्छंति तेषामपि पणायत्येनेयणा पिच्छंतीत्याहुः अनुबंधः केवले चरितार्थः॥ ॥२२॥ ॥ ॥

॥ऋतेरीयङ्॥ ॥सौत्रइति। अस्मिन्नेव सूत्रे उच्चरित इत्यर्थः॥ घृणायां वर्त्तत इति। नात्र कृपापर्यायो घृणाशब्दः किंतर्हि जुगुप्सायां घृणा जुगुप्सा कृपयोरिति
वचनात् जुगुप्सा निंदा बीभत्सेत्यर्थः ऋतीयाशब्दो बीभत्सापर्यायो निघण्टुषु पठितः॥ अथ कस्मादीयङ् च्यतेन णिङ्। वो च्यते तस्य ईयादेशे कृते ऋतीय
इति सिद्धे परत्वादिडागमे कृते सस्य प्रत्ययादित्वादीयादेशो न स्यादिति चेत् न अंतरंगत्वात्। आपन्नादिषु पदेष्विव द्वचनं सार्थमिति वचनादंतरंगत्वं।
ज्ञापनार्थ एव ज्ञापयति धातुप्रत्ययानामायन्नादयो न भवंतीति तेन क्रणोत्येकारे शो न भवति। कश्चित्तु कुर्वन्नावेवं यद्यते ऋतेश्छङि त्येव सिद्धे ईयङ्
करं ज्ञापकं धातुविहितानामायन्नादयो न भवंतीति अत्र ब्रूमः ङित्वकरणं विभज्योपपद्येत रपच्छ सुना किं सेव सिद्धे ईयङ्गुच्चवचनं ज्ञापकं प्राप्तिपादिक

॥ऋतेरीयङ्॥ ॥ऋतिः सौत्रो धातुर्घृणायां वर्त्तते तत ईयङ् प्रत्ययो भवति। ङकार आत्मनेपदार्थः। ऋतीय
ते। ऋतीयेते। ऋतीयंते। ऋतेश्छङि ति सिद्धे ईयङ्वचनं ज्ञापकार्थं धातुविहितानां प्रत्ययानामायन्नादयो न भ
वंतीति॥ ॥कमेर्णिङ्॥ ॥कमेर्धातोर्णिङ् प्रत्ययो भवति। णकारो वृद्ध्यर्थः। ङकार आत्मनेपदार्थः। का
मयते। कामयेते। कामयंते। ॥ ॥ २३ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥

प्रत्ययानामायन्नादयो न भवंतीति उच्यते चायन्नादयस्ते वचनादुभयेषामपि स्युस्तस्मात् ऋतेश्छङि त्यादिरुक्तो न पठनीयमिति॥ ॥कमेर्णिङ्॥ ॥
इह णिङो णकारो णेरनिटीति विशेषणार्थश्च णितार्थो ङकार आत्मनेपदार्थः स तूभयोरप्यर्थयोः प्रतिषेधबलीयस्त्वात् उपधाया इति वृद्धेः क्ङितिचे
ति प्रतिषेधः प्राप्नोति ज्ञापकात् सिद्धं यदयं न कम्यमिचमामिति कमेर्मित्त्वं ज्ञापयति प्रतिषेधशास्त्रं तत्र वृद्धिरिति तस्य हि प्रयोजनमिको
ह्रस्व इति ह्रस्वो माभूदिति यदि चात्र वृद्धिर्न स्यात् ह्रस्वत्वं पर्यवोपधेति कृत्वा मित्संज्ञाप्रतिषेधोऽनर्थकः स्यात्। नैतदस्ति ज्ञापकं यदाणिङं तादृक्नुमस्मिन्चक्रिय
तेतदाणिङ्। तस्य णिचियाद्वृद्धिस्तस्याद्ह्रस्वो माभूदित्येवमर्थं मित्त्वं स्यात् न च णिजये स्यात्। अपि च हेतौ णिङमेव ङितमये ह्रस्वप्रतिषेधः किं काणिङितीति
निमित्तसप्तमी॥ ॥छ॥ ॥छ॥ ॥

का॰प॰ २२१

२५

ननु च न णीडं तस्य णौ चिङ्ग्ला मवितअं णौ ङाव्यवहितत्वात् णौ लोपेपि कृते स्थानिवद्भावाद्व्यवधानमेव यदा तर्हि णौ ङं तच्चिस्म मुलोभ
वतः तदा चिस्मपुलोर्दीर्घ मतरस्यामित्येष विधिर्मा भूदित्येवमर्थोपि तत्संज्ञाप्रतिषेधः स्यात् किं पुनः कारणं तत्र दीर्घोन्यतरस्यामिसुच्यते न प्रकृ
तो ह्रस्व एव विकल्प्यते एवं हि कमेर्मिसंज्ञाप्रतिषेधो न कर्त्तव्यो भवति कथं यदा णौ ङि वृद्धिर्नास्ति तदा ह्रस्व एवोपधेति सत्यपि ह्रस्वविकल्पे
नैवानिष्टप्रसङ्गः अशशमिअशशामीत्यादि च मि द्धं नैवं शक्यं यदा शमिप्रभृतिभ्यो णिज्‌ तेभ्यो द्वितीयो णिच् क्रियते तदा नस्मान्न पश्च ण्यमु
लपरो णिजन्द्वितीयः न तस्मिन्मित्संज्ञा प्रथमेन णिचाव्यवहितत्वात् यस्मिंश्च मित्संज्ञा प्रथमे णौ विना स्मो चिस्मपुल्परः द्वितीयेन व्यवहि
तत्वात् णौ लोपेपि कृते स्थानिवद्भावाद्व्यवधानमेव दीर्घोन्यतरस्यामिसुच्यमानो पुनस्तत्रापि भवति दीर्घविधिं प्रति स्थानिवद्भावप्रतिषेधात् ते
षां शमिप्रभृतिभ्यो पङं तेभ्यो णिच् अल्लोपयलोपयोरल्लोपस्य स्थानिवद्भावात् सत्यां वृद्धौ चिस्मपुलोः कृतयोरशशामि अशंशामि शशा
मं शंशाममिति न स्यात् दीर्घः पुनर्विकल्प्यमानोत्रापि भवति तद्विधौ स्थानिवद्भावप्रतिषेधात् तथा हेडृ अनादरे घटादिः एवं च ह्रस्वादे
शो हिडयति तत्र चिस्मपुलोः कृतयोर्ह्रस्वविकल्प्यमाने अहि डि अहेडी ति स्यात् दीर्घे तु पुनः अहि अहीडी ति भवति तस्माद्दीर्घ एव विक
ल्पनीयः ततश्च मित्संज्ञाप्रतिषेधोपि तन्निवृत्तये व कर्त्तव्यः । तथा ओपा तृप अ ईधातु के वेति णौ ङ भावे तो मिमतिवृद्धौ कृतायां मि
तां ह्रस्व इति ह्रस्वो मा भूदित्येवमर्थोपि मित्संज्ञाप्रतिषेधो वक्तव्य एवेत्यज्ञायक मेतत् । एवं तर्हि स्थानेयंयत्नः क्रियते नैवात्र प्रतिषेधः प्रा
प्नोति किं कारणं मिल्लक्षणयोर्गुणवृद्ध्योः प्रतिषेध नैचैषा इग्लक्षणा वृद्धिरिसलमतिकर्त्ता शास्त्रप्रक्रियातत्क्रानुसरणेन ॥ २२ ॥

॥ छ छ ॥ ॥ छ छ ॥ ॥ छ ॥ ॥

राम॰

२५

आयादयः॥ ॥आर्द्धधातुकइतिपरसप्तम्याभाषापादिविधिभिरेकवाक्यतावाप्तादिन्नवाक्यतावाएकवाक्यतायामयमर्थोभवतिगुपादिभ्यआर्द्धधातुके
परतोवाआयप्रत्ययोभवतीतिएवमुक्तरत्राश्रितस्तश्चार्द्धधातुकएवविकल्पेनायादयःस्युःसार्वधातुकेनेरस्युःनैषदोषःइष्यनारम्भात्पक्षेआर्द्धधातुक
एवायादीनामुत्पत्तिरिष्टास्यात्ततोगुपादिभिःसंयुक्तेवनिर्दिश्येतगुपादिभ्यआर्द्धधातुकेवेतिएवंस्यापादयइतिनवक्तव्यंभवतिपक्षेतुएवकृत्वानिर्दिश्य
तितेनसमाप्तमहेआपादमेदेनैकवाक्यतेतितत्रश्चायमर्थोभवतिगुपादिभ्योनित्यमायप्रत्ययोभवतिआर्द्धधातुकेवेतिवएवमपिगुपादेर्यदार्द्धधातुकंप्राप्तं
तत्रततोविहितेविकरणावद्धिकल्पेनायादयःस्युःततश्चस्त्रीभावविवक्षायांगुपेरप्रत्ययांतत्वात्किंनिकृतेयदाआयप्रत्ययोनभवतितदागुप्तिरितिकाम
मिष्टंसिद्ध्यतियदातुभवतितदाअप्रत्ययलोपयोर्गोपायेतिस्यनिष्टंप्राप्नोतिगोपायेतिचेष्टंनसिद्ध्यति।भिन्नवाक्यतायांतायादार्द्धधातुकंप्राप्तंतत्र
ततोविहितेआयादयोवाभवंतीत्यर्थःस्यात्तत्रचायायंतापदार्द्धधातुकमितिवद्दतातेषामुत्पत्तिस्त्वंगीकृतानचोत्पन्नानामुत्पत्तिर्विकल्पःशासनेकर्तु
॥आयादय आर्द्धधातुके वा॥ ॥आर्द्धधातुकविषये आर्द्धधातुकविवक्षायामायादयोवाभवंति। गोप्ता। गोपायिता। ऋ
र्तिता। ऋतीयिता। कमिता। कामयिता। नित्यंप्रत्ययप्रसंगेतदुत्पत्तिरार्द्धधातुकविषयेविकल्प्यते। तत्रयथायथंप्रत्ययाभ
वंति। गुप्तिः। गोपाया॥ ॥छ॥ ॥
मितिलोपन्यायेननिवृत्तिर्विकल्पोभवतितत्रश्चापंप्रत्ययांतास्त्रीभावविवक्षायामप्रत्ययाद्दिस्यकारप्रत्ययेकृतेनिवृत्तभावपक्षेगोपायेतिकामम्
ष्टंसिद्ध्यतिनिवृत्तिपक्षेतुगोपेत्यनिष्टंप्राप्नोतिगुप्तिरितिचेष्टंनसिद्ध्यतिलिटिचनिवृत्तभावपक्षेगोपायांचकारेतिकाममिष्टंसिद्ध्यतिनिवृत्तिपक्षेतु
यदिलिटिपरतोनिवृत्तिस्तथापिप्रत्ययलक्षणेनकास्यत्ययादिस्यामार्भवतव्यंअथाप्यामिकृतेनिवृत्तिस्तथापितस्यैवश्रवणंप्राप्नोतिसर्वथागोप
चकारेत्यनिष्टंप्राप्नोतिजुगोपेतिचेष्टंनसिद्ध्यतितस्मादुष्टएवायंपरसप्तमीपक्षइतिमत्वाहआर्द्धधातुकेविषयइति।कोर्थइत्याहआर्द्धधातुकविवक्षा
यामिति।आर्द्धधातुकमिहोत्पादयिष्यामीतिबुद्धौसत्यामित्यर्थःविषयसप्तमीपक्षेपिभिन्नवाक्यतायामार्द्धधातुकेविधित्सितेआयादयोभवंतीत्युक्ते
कृतोविधित्सितइत्यपेक्षायामायादंतस्यापिधातुत्वात्ततइतिगम्येततश्चनिवृत्तिपक्षएवाश्रितइतिसएवदोषोयंपूर्वमवोचामतस्मादेकवाक्यतयोत्प
त्तिविकल्पइत्याहनित्यंप्रत्ययप्रसंगेतदुत्पत्तिरार्द्धधातुकेविकल्प्यइति।किमेवंसतिनिसिद्धंभवतीत्याहगुप्तिरिति॥ ॥छ॥ ॥छ॥ ॥

का॰पद॰
२६

॥सनाद्यंताः॥ ॥सनादयोंते येषामिति। अंतशब्दः समीपवचनः गमकत्वाद्व्यधिकरणेपि बहुव्रीहिः अथवा वृत्तावर्थमात्रं प्रदर्शितं सूत्रे त्ववयव
वाचिनोंतशब्दस्य समानाधिकरणो से व बहुव्रीहिः सनादयोंता अवयवा येषामिति। समुदाया इति। अनेन तद्गुणसंविज्ञानो बहुव्रीहिरभ्युपगत इति दर्श
यति। धातुसंज्ञा इति। धातुशब्दोत्र स्वरूपपदार्थको न भूवादिवदर्थकस्तावती नां संज्ञानां विधाने प्रयोजनाभावात्॰। सुप्तिङ्॰ तमित्यत्रांतग्रहणेन ज्ञा
पितं संज्ञाविधौ प्रत्ययग्रहणे प्रत्ययग्रहणपरिभाषा न प्रवर्तत इति ततश्चासत्यंतग्रहणे तदंतविधिर्न स्यादित्यत्रांतग्रहणं कृतं एवं स्थिते यद्यपूर्व एवा
नतदंतविधिः क्रियेत ततो हेवदत्तमिच्छिकीर्षती तिदेवदत्तादेः समुदायस्य संज्ञाप्रसज्येतेति मत्वाह प्रत्ययग्रहणपरिभाषयैवे सादिः अपूर्वविधौ तु गौरवं प्र

॥सनाद्यंताधातवः॥ ॥सन् आदिर्येषां ते सनादयः सनादयोंते येषां ते सनाद्यंताः सनाद्यंताः समुदाया धा
तुसंज्ञा भवंति॰ प्रत्ययग्रहणपरिभाषैव पदसंज्ञायामंतवचनेन लिंगेन प्रतिषिद्धा सती पुनरिहांतवचनेन प्र
तिप्रसूयते॰ चिकीर्षति॰ पुत्रीयति॰ पुत्रकाम्यति॥ ॥२५॥ ॥श्रीः॥ ॥श्री॥ ॥

तिप्रसवे तु फलस्य लाघवं भवतीति भावः। भूवादयः इत्यस्यानंतरं सनाद्यंताश्चेत्युच्यमाने सनादीनामियत्तापरिच्छेदो न स्यात् एवं तर्हि संड॰ ताश्चेत्युच्यता
संडि॰ तिप्रत्याहारः सनः सशब्दादारभ्याणिङो ड॰ कारात् एवमपि संदेहः स्यात् चद्वादिषु पिङ॰ कारस्याभावात्। एवं तर्हि सनाद्यंता इत्यस्यानंतरं भूवादयश्चे
ति वक्तव्यः स्यादिति तत एव मुच्यमाने सनात शब्दवद्भूवादिशब्दोपि प्रकृतो ये स्युः स्यात् ततश्चानुक्रांतानां गुपादीनामेव स्यादिति एवमपि भूवादिग्रह
णमनर्थकं गुपादयश्चेति वक्तव्यं नानर्थकं भूवो वादयो भूवादय इत्येवमर्थमेतत्स्यात् भूवादिपाठ इदानीं किमर्थः स्यात् अनंतरोगणकार्यार्थानुबंधासं
जनार्थश्च येषां तर्हि तु भवंन संभवति भूरणिप्रभृतीनां तेषां पाठः किमर्थोलमति निबंधेन॥ ॥२५॥ ॥छ॥ ॥

एम॰
२६

गस्यतासी॥ ॥इह यद्यपि ल्ट् इत्यनुकरणमुच्चारितमेकमेव तथापि तस्य प्रतिपाद्यभूतमनुकार्यं भिद्यते ल्ट् ल्ङ् ल्टु इति पत्र च प्रतिपाद्यानां संख्यासाम्यं
तत्र संख्यातानुदेशः च तत् उच्चारितं रूपसाम्येऽन्यस्य परस्मैपदानामिवैकं शालादृत्य स्तु न वेति वैषम्यान्नस्मात् तथाऽऽद्योऽसौ स्मः प्रथमस्येत्यत्रापि न स्यात्। ततश्चैवं
ल्ट् इत्यस्य द्वे प्रतिपाद्ये लुडिति चापरमिति त्रीणि निमित्तानि निमित्तिनौ तु द्वाविति वैषम्यात् संख्यातानुदेशो न प्राप्नोतीत्यत आह ल्टरूपमुत्सृष्टानुबन्धं सामान्यमेक-
मेवेति। नात्र प्रतिपाद्यं भिद्यते यत्तदुभयानुगतमुत्सृष्टानुबन्धं ल्ट् इति सामान्यरूपं तदनुक्रियते एतच्च ल्ल्लुटोरिति द्विवचननिर्देशाद् गम्यते तत्र यथानुकरणेन
भेदस्तथानुकार्येऽपीत्यर्थः। करिष्यतीति। ऋद्धनोः स्यादिति इट्। श्वः कर्तेति श्व इत्यस्योदाहरणं ... कालविवक्षार्थः। इदित्करणमिति। इदित्त्वं नाकस्येकारस्य
करणमित्यर्थः। अनुनासिकलोपप्रतिषेधार्थमिति। अन्यथा मनतासः आ इति स्थिते इट्लोपे कृते नकारउपधेऽसौ अनिदितां इति परतो निदितामिति
नलोपः प्राप्नोतीति तस्यानिदितामितीदित्त्वनिबन्धनः प्रतिषेधो यथा स्यादित्यर्थः। मन्ता संगन्तेति कोऽर्थः मन्तेसेतस्य संगन्ता संगंस्यते संगतं भविष्यतीत्यर्थः

॥स्यतासी ल्ल्लुटोः॥ ॥ल्टरूपमुत्सृष्टानुबन्धं सामान्यमेकमेव तस्मिन् लुटि च परतो धातोर्यथासंख्यं स्यता
सीप्रत्ययौ भवतः करिष्यति· अकरिष्यत्· श्वः कर्ता· इदित्करणमनुनासिकलोपप्रतिषेधार्थं· मन्ता· संगन्ता· २५

ननु संगन्तेसेतदुदाहरणं अनोपधत्वात् अनुस्वारपरसवर्णयोः कृतयोरपि तयोरसिद्धत्वात् अनोपध एवायं न सेला इत्येषसिद्धत्वात् संगन्तेसेतदनुदाहरणं
मन्तेसेतदपि उदाहरणं न भवति अत्रापि इट्लोपस्याभीयस्यासिद्धत्वात् मन्तास आ इति स्थिते नकारउपधा न भवतीति यदिमतमाताच्छास्त्रीयमसिद्धत्व
मनित्यं अत्र स्तोरश्चुलोपे इति तत्परकरणात् तत्रात्रामासन्निसादौ माभूदित्येवमर्थं तत्रासिद्धत्वादेव लोपो न भविष्यति किं तन्निरस्यर्थेन तत्परत्वेन तत्
ज्ञापयत्यसिद्धत्वमनित्यमिति तेन दिद्दतुर्दितुरित्यत्र श्रन्थिग्रन्थि दम्भिस्वञ्जीनामिति लिटः कित्वान्नलोपे तस्यासिद्धत्वाभावादेत्वाभ्यासलोपौ भवतः तत्र
त्रिलोपस्यासिद्धत्वाभावान्मन्तास आ इति स्थिते उपधैव नकार इत्युदाहरणमिति। यद्येवं पूर्वत्रासिद्धत्वमनित्यं नमुनद्यत्र नेति योगविभागात् तथा चे
कादेशस्वरो तरङ्गः सिद्धो भवति सिज्लोपएकादेशे सिद्धो भवतीति निष्ठादेशः षत्वादिषु सिद्धो भवति द्विर्वचनविषये च पूर्वत्रासिद्धीयं न भवति ततश्चानुस्वा
रपरसवर्णयोः सिद्धत्वात् संगन्तेसेतदप्युदाहरणमेवेति॥ ॥

।।अस्मेतु संहृंतेतिपठंति हंतेर्भावकर्मणोरिखात्मनेपदं तत्र संपूर्वस्य पाठे प्रयोजनं मृग्यं। एवं तावज्जयादिसे न्तासिद्धत्वमनित्यमाश्रित्य तासेरिट्किरणम्
मनुनासिकलोपप्रतिषेधार्थमित्युक्तं। गामनस्तुरिलोपस्यासिद्धत्वादेव नलोपो न भविष्यतीति मन्यमानः इदितो नुम् धातोरित्यत्र वक्ष्यति तासिद्धासिचोरिट्
कार्ये नास्तीत्युच्चारणार्थो निरनुनासिक इकारः यथा तइतीयदि तु तासेरिकारो नुबंधः स्यात् ततो नुम्विधौ धातुग्रहणमधातोस्तासेर्माभूदित्येवमर्थं स्यात्
तत्रश्च धातूपदेशावस्थायामेव नुम् भवतीत्ययमर्थो निस्ताचितः स्यादितितस्याभिप्रायः। जयादिस्यस्तु नुम् विधावुपदेशिवद्वचनं प्रत्ययसिद्ध्यर्था
मितिवचनमेव शरणमाश्रियते। इह विकरणाः केवलं लकारोपादाने न विधीयंते यथा स्यादयः ते किं लावस्थायामेव भवंत्युताहो आदेशेषु कृ
तेषु यदि लावस्थायामेव ततस्तासेरनुदात्तेत्त्वे दित्त्वं यद्दृश्यते तासिः परस्य लसार्वधातुकस्यानुदात्तवचनं ज्ञापकं सति शिष्टोपि विकरणस्वरो ल
सार्वधातुकस्वरं न बाधत इत्यस्यार्थस्येति तत्रोपपद्यते लावस्थायामेव तासेरुक्तेतस्य च प्रत्ययाद्युदात्तत्वे परस्मात् आदेशेषु क्रियमाणेषु तेषां
सार्वधातुकस्वरं न बाधत इत्यस्यार्थस्येति तत्रोपपद्यते... तस्मात्तत्र को दोषः चिनुतस्त्रिं चंति क्रीणीतः क्रीणंतीति शिष्टो विकरणस्वर एव
मेव स्वरः सति शिष्टो भवतीति तत्रानुदात्तवचनमप्राप्तविधिरेव स्यात् तत्र को दोषः चिनुतश्चिन्वंति क्रीणीतः क्रीणंतीति शिष्टो विकरणस्वर एव
प्राप्नोति। द्वितीये तु पक्षे पूर्वं तिबादयः पश्चात्तासिरिति तस्यैव स्वरः सतिशिष्टः तत्रश्च निघातस्वरे सार्वधातुकानुदात्तत्वे सिद्धे तासि
ग्रहणं क्रियमाणमुक्तार्थस्य ज्ञापकं संपद्यते। अस्तु तर्हि तथा यदेवं धातुमात्रात् सार्वधातुकमात्रे भावकर्मणोर्यक् कर्तरि तु शब्विधीयत
इति यक्शपावुत्सर्गौ तिष्ठेवार्थेषु धातुमात्रात्सार्वधातुकविशेषे स्यादय इति तेपवादाः तथा दिवादेर्धातुविशेषात्कर्तरि श्यन्नादयः
शपोपवादाः तत्र देविष्यतीति तनिष्यतीत्यादावुभयप्रसंगे परत्वात्प्रतिषेधात् श्यनादयः स्युः पक्षांतरे त्वंतरंगाः स्यादय एवास्मिन्निति।
नैष दोषः दिवादिभ्यः इत्यत्र स्यादिषु स्यादयोनुवर्तिष्यंते दिवादिभ्यः श्यन् भवति लृट्लुटोस्तु स्यतासी भवतो दिवादिभ्य इति एवं सर्वत्र एते
नैतदपि निरस्तं पतत्वलिदमाशंसते यत्र यैर्लावस्थायां विधीयमानाः स्यादयः किमिति सार्वधातुको त्पत्तिं प्रतीक्षंत इति कथं उत्तरत्रानु
वृत्तेरेव सार्वधातुके यक् भवति भावकर्मणोः लृट्लुटोस्तु स्यतासी भवतः सार्वधातुके सार्वधातुके कर्तरि श्यन् भवति लृट्लुटोस्तु स्यतासी
भवतः सार्वधातुक इति एवं सिद्धे यदि ध्यपिद्रष्टुमंतदेव मादेशेषु स्यादय इति स्थितं।। २५।।

॥सिब्बहुलं॥ ॥जोषिषत् मंदिषदिति। जुषी प्रीतिसेवनयोः मदिः स्तुतिमोदमदस्वप्नकान्तिगतिषु अनुदात्तेतौ व्यत्ययेन परस्मैपदे सिप् इट् लेटोऽडाटाविति तिपो इ-
तश्च लोपः परस्मैपदेष्विति इकारलोपः तत्र चवेति वर्तते तारिषपिति। तॄ प्लवनतरणयोः सिब्बहुलं छन्दसि णिद्वक्तव्य इति वचनाद्वृद्धिः अमीषां सविता सा विषदि-
ति यथा छांदसो वा दीर्घः स्यतातीति। ह्वल ह्वल पतत् लटः तौ लेङ्गे डाडाविलाटू शपामस्तु हे कादेशः। आवयातीति च्युङ् प्रुङ् प्लुङ् गतौ शपः तः। इहावयामि सिषीष्ट
इति पातेरवस्मात् लिङि बहुलवचनात् सिप् यामसीपुट् इडुट् एकाच उपदेशे अनुदात्तादिति नु प्रतिषेधो न भवति सिपा व्यवधानात्॥ ॥कास्प्रत्ययात्॥ ॥आमप्र-
त्ययो भवतीति। हलंतप्रत्ययस्तदुक्तं अदन्तप्रत्यये लाम प्रत्ययो भवतीति वक्तव्यं। अमंत्रविषय इति। मंत्रविषये प्रयोगो न भवतीत्यर्थः ऋग्यजुः सामलक्षणो मं-
त्रः तत्रैव गाभिष्टुक्ते मंत्रशब्दस्य प्रयोगात् आथर्वणा अपि मंत्रा आज्ञषुण एवं तं भवंतीति तां त्रिकेषु मंत्रशब्दप्रयोगो मंत्रवदुपचारात् छंदसीति नोक्तं ब्राह्मणेऽपि यथा

॥सिब्बहुलं लेटि॥ ॥धातोः सिप् प्रत्ययो भवति बहुलं लेटि परतः जोषिषत्· तारिषत्· मंदिषत्· मंदिषत्· न च भवति
पताति दिद्युत्· उदधिं च्यावयाति॥ ॥कास्प्रत्ययादाममंत्रे लिटि॥ ॥कासृ शब्दकुत्सायां ततः प्रत्ययांतेभ्यश्च धातुभ्य आ-
म्प्रत्ययो भवति लिटि परतो अमंत्रविषये· कासांचक्रे· प्रत्ययांतेभ्यः लोलूयांचक्रे· अमंत्र इति किं कृष्णो नोनाव· कास्यनेकाच
इति वक्तव्यं चुलुंपाद्यर्थं· चुलुंपांचकार· चकासांचकार· दरिद्रांचकार·॥ ॥

स्मात् अथ ह शुनःशेप ईक्षांचक्रे ते ह तदंतर्वेधासांचक्रिरे अविज्ञातानि च दर्शयांचकार· कासांचक्र इति। आमंतस्य पदत्वमाम इत्यत्रोपपादितं। नोनावेति नौतेर्यङ्लु-
गंतात् प्रत्ययलक्षणेन प्राप्त आम् न भवति। कास्यनेकाच इति वक्तव्यमिति। यथा स्यादेहि कश शब्दात् शब्दाद्दा गादिभ्यश्चाचारक्विबंतेभ्य एकाज्भ्योऽपि प्रत्ययांतत्वा-
दाम्प्रसंगः चुलुंपादिभ्यश्चाप्रत्ययांतत्वादप्रसंगो तो व्यास्यतीत्यामिप परिहाराय प्रत्ययग्रहणमपनीयानेकाज्ग्रहणं कर्तव्यमित्यर्थः तत्र कशब्दस्य णलि अ-
चो ञ्णितीति वृद्धौ आत औ णलः चकौ अन्यत्रातो लोप इति चकतुः चकुः अशब्दस्य णलि रूपमाविति अत्रोन्यते आटेरिति ह्रीघत्वे आतो लोप इटि च अतुः उः। च-
कासांचकारेति। चकासृ दीप्तौ दरिद्रांचकारेति। आत औ णल इत्यत्र औकारविधानं औकारविधानं दरिद्राति एईधातुके लोप इत्याकारलोपे प्यौकारस्य श्रव-
णार्थं तेन दरिद्राविति अपि भवतीसाङ्कः। चुलुंपांचकारेति। चुलुंपतिर्वार्त्तिककारवचनात् साधुः आमो मकारस्य हलंत्यमितीत्संज्ञा कस्मान्न भवतीत्याह॥

॥ आमो मित्वमिति। कार्यां च कारे स्यादौ प्रयोगे य आम् शब्दस्तस्यामित्वं मकार इत्संज्ञको यस्य नास्ति सोऽमित् तस्य भाव अमित्वं। कुत इत्याह अदन्तत्वादिति।
अत् अन्ते समीपे यस्यासौ अदन्तः सूत्रे विधानवेलायां समीपे अकारवत्त्वादित्यर्थः। तेनैतन्न नोदनीयं आम् चेत् कथमदन्तः अथादन्तः कथमामिति। सूत्रे विधी
यमानस्यैव वा प्रत्ययस्योपलक्षणमाम् इति। अगुणत्वं विदेस्तथेति। विदेर्धकारेऽत्र विदेराम्यगुणाभावोऽपि तथा अदन्तत्वादेवेत्यर्थः। अदन्तत्वादिति तत्प्र
संगेन चेदमिहोक्तं उषविदजागृभ्योऽन्यतरस्यामित्यत्र तु अव्यक्तं तत्राह हि विदेरकारान्तत्वमाम्प्रत्ययसंनियोगे न नियास तेनात्रातो लोपस्य स्थानिवत्त्वाद्गुणा

॥ ॥ आमोऽमित्वमदन्तत्वादगुणत्वं विदेस्तथा। आस्का
सोराम्विधानाच्च पररूपं कृतं त्वत॥ ॥२६॥ ॥छ॥ ॥

नभवति म पुनर्विदि इत्यानत्स्यकारो विवक्षित इत्युच्यते वैत्री लाहो अवर्णप्रसंगात्। अभ्युपेत्यापि मकारान्तत्वमित्संज्ञाभावमाह आस्कासोराम्विधा
नाच्चेति। आमोऽमित्वमित्यनुषंगः सति हि मित्वे आस्कासोराम् भवन्त्यथवा मध्यात्परः स्यात्तथा च सवर्णदीर्घत्वे सत्यकिंचित्कारः स्यात् अतो दृष्टायास
आकारप्रत्ययादिति आस्कासोराम्विधानादामोऽमित्वमवसीयत इत्यर्थः। आस्य च कासोर्विधानाच्चेत्यन्ये पठन्ति तदयुक्तं न हि सूत्रे चकारस
आम्विधानमस्ति यदपि कास्यनेकाजग्रहणं तदपि चुलुंपाद्योऽसावकाशं। नन्वदन्तत्वपक्षे अप्राप्तं इति निर्देशः स्यात्तत्राह पररूपं कृतं त्वदिति।
यथा सर्वत्र लोहितादिकतंतेभ्यः इत्यत्र पररूपमेवमत्रापि निपातनात् पररूपमित्युक्तं भवति॥ ॥२६॥ ॥छ॥ ॥छ॥ ॥

॥इजादेश्च॥ ॥ऋच्छतिवर्जित इति॥ ऋच्छतिनास्त्यकः तद्रूपरहित इत्यर्थः ऋच्छतेरन्य इति यावत्· इयज उपवपेति। यत्तिवप्योरुत्तमे णलि णलुत्तमो वे
ति णित्त्वाभावपक्षे वृद्ध्यभावाद्गुरुमत्त्वाभावः एवं थलपि प्रत्युदाहरणं इयजिथ इयष्ठ उवपिथ उवप्थ अन्यत्र हं निपातपरिभाषयैवामनभविष्यति सं नि
पातलक्षणं ह्यप्रामाण्यं तद्विघातकस्यामो निमित्तेन भवति आमि हि सति लेर्लुका भवितव्यमिति लिट्संनिपातमसौ विहन्यात्। इदं तर्हि प्रत्युदा
हरणं इयेषेति नह्यत्र लिट्संनिपातजं निजादित्वं अथ क्रियमाणेपि गुरुमद्ग्रहणे कस्मादेवात्र न भवति यावता गुणे कृते गुरुमानेष भवति एवमोष
तुरित्यादावपि सवर्णदीर्घत्वे कृते गुरुमानेव भवति सत्यं सति गुरुमद्ग्रहणे संनिपातपरिभाषयैवात्राप्याम् न भवति लिडानन्तर्ये हि तु कृत्वा गुरुमत्त्वा

॥इजादेश्च गुरुमतोनृच्छः॥ ॥इजादिर्यो धातुर्गुरुमान् ऋच्छतिवर्जितस्तस्माच्च लिटि परत आम् प्रत्ययो भव
ति· ईह चेष्टायां· ऊह वितर्के· ईहांचक्रे· ऊहांचक्रे· इजादेरिति किं ततक्ष· ररक्ष· गुरुमत इति किं इयज· उवप· अनृ
च्छ इति किं आनर्च्छ· आनर्च्छतुः आनर्च्छुः ऊर्णोतेश्च प्रतिषेधो वक्तव्यः· प्रोर्णुनाव· अथवा वाच्य ऊर्णोर्णुवद्भावो य
ङ्प्रसिद्धिः प्रयोजनं· आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात्॥ ॥

याः अथवा गुरुमत इति नित्ययोगे मतुप् नित्यं यस्य गुरुणा सम्बन्धः यथैवं उच्छी विवासे उच्छांचकार उछ उंछे उच्छांचकार आमनिमित्ताच्चास्य गु
रुमत्त्वात्तस्मादाम् न प्राप्नोति ज्ञापकात्सिद्धं यदयमनृच्छ इत्याह तज्ज्ञापयति भवत्येवंजातीयकेभ्य आमिति यदि तर्हि ज्ञापकार्थमृच्छतिप्रतिषेधो वक्तव्यो
भवति ननु चास्ति ह्यर्थ एवासौ कर्तव्यः नार्थ आनर्च्छ इत्यत्र हि सत्यर्थेन ज्ञापकात्सिद्धं पदद्वयमृच्छत्यृतामिति लिटि परतो गुणं शास्ति तज्ज्ञापयति नास्मादाम्
भवतीति न चात्र ऋच्छतीत्यनेनार्च्छीत्यपानिर्देशः ऋच्छत्यृतामित्येतैरपि स्वरूपेणैव प्रश्लेषात् प्रश्लेषे च ऊवचनमत्र प्रमाणं अतश्च लिटि गुणविधाने प्र
योजनं तत्रैव वक्ष्यामः तस्मादृच्छतेर्गुणविधानं ज्ञापकमेव तस्मादाम् न भवतीति स एषोनृच्छ इति प्रतिषेधो ज्ञापकार्थ एव कर्तव्यः स्यात्॥ ॥

।एवं तर्हि तिटीति विहितविशेषणं इजादेर्गुरुमतो यो लिड्विहितस्तस्मिन्नेव तेन लिटि निमित्ताय स्य गुरुमत्त्वात् तस्माच्च न भविष्यति आगमनिमित्ताय स्य गुरु
मत्त्वात् तस्माच्च भविष्यति अनृच्छ इति प्रतिषेधस्तु क्रियतां मा वा कारि। कथं चिन्नु गुरुमत इति किं इयेष उवोषेति यद्यत्र तत्र उवोषेत्युदाहरणमयुक्तं उषवि
दजागृभ्य इति विकल्पविधानात् नित्यस्य विधेः प्रसङ्गाभावात् अन्यथा विकल्पविधानमनवकाशं स्यात्। प्रोर्णुनावेति। अजादेर्द्वितीयस्य नन्द्राः संयोगा
दय इति नु शब्दस्य द्विर्वचनं। कार्यान्तरसिद्ध्यर्थमवश्यमूर्णोतेर्णुविद्वाभावो वाच्यः तेनैवामोऽपि प्रतिषेधः सिद्ध इत्याह अथवा वाच्य इति। तत्र यङि भावाति
देशः आमि टोस्त्वभावातिदेशान्नोतीतयोर्भावात्। इजुपधग्रहणं इद्रूप्रतिषेधः विभाषुरणं इति पञ्चमी फलस्य चात्र हेतुत्वं यथा अध्ययनेन वसतीति एका

॥दयायासश्च॥ दय दानगतिरक्षणेषु। अय गतौ। आस उपवेशने। एतेभ्यश्च लिटि परत आम्प्रत्ययो भवति। दया
चक्रे। पलायाञ्चक्रे। आसाञ्चक्रे॥ ॥उषविदजागृभ्योऽन्यतरस्याम्॥ ॥उष दाहे। विद ज्ञाने। जागृ निद्राक्षये। एतेभ्यो लि
टि परतोऽन्यतरस्यामाम्प्रत्ययो भवति। ओषाञ्चकार। उवोष। विदाञ्चकार। विवेद। जागराञ्चकार। जजागार। विदेरदन्तत्व
प्रतिज्ञानादाम्यगुणो न भवति॥ ॥ ३७ ॥ ॥छ॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥

च इति वर्तमाने श्र्युकः किति इति यइ(?) इट्प्रतिषेधः ततोऽपि हेतोरेकाचो वाच्य इत्यर्थः उदाहरणानि प्रोर्णोनूयते प्रोर्णुनाव प्रोर्णुतः प्रोर्णुतवानिति॥
॥दयायासः॥ ॥दयायासः सर्वेऽप्यनुदात्तेतः। पलायाञ्चक्र इति। उपसर्गस्यायतौ इति उपसर्गस्य लत्वं॥ ॥उषविद॥ ॥विद ज्ञान इति। सत्ताविचा
रणार्थयोस्त्वात्मनेपदित्वोर्लाभार्थस्य चोभयपदित्वाद्ग्रहणं न भवति परस्मैपदिष्वनुबिजागृभ्यो जागर्तिना साहचर्यादिति भावः। वि
वेदेति। आम्प्रत्ययपक्षे नियोगे गादन्तत्वप्रतिज्ञानादत्र गुणो भवत्येव अत एवाह विदेरदन्तत्वप्रतिज्ञानादाम्यगुणो न भवतीति॥ ३७ ॥ ॥

॥भीह्रीभृहुवां॥ ॥श्लुवत्कार्यापेक्षया षष्ठी तन्नियोगशिष्टत्वादाम् प्रत्ययोपि तेभ्य एव द्विर्माने पितृत्परित्यागेनालभ्यमानस्यापि स्वादिरिस्यप्रति नि
षिनाकारणे हि नाप्रयोगः परिसमाप्यते एवं हि प्रारब्धः प्रयोगः परिसमापितो भवति इत्यतः तदुपादाने तु प्रयोगान्तरं स्यात् द्रव्यभेदे क्रियाभेदात् प्रतिनिधि
स्तु मुख्यबुद्ध्योपादीयते तदवयवानां तत्र भूयस्त्वं संभवात् तथेहाप्याम् तेन लिट्प्रयोगः प्राग्वोपरिसमाप्तः साकांक्षकरणेन स एव प्रयोगो नुप्रयो
गो नुप्रयोगेण परिसमाप्यमानो युक्तं लिट्परस्यैवानुप्रयोगेण परिसमाप्यते तस्मान्नास्ति प्रत्ययान्तरपरस्यानुप्रयोगप्रसंगः तस्माल्लिट्येव प्रत्ययः स्यु

॥भीह्रीभृहुवांश्लुवच्च॥ ॥ञिभी भये· ह्री लज्जायां· डुभृञ् धारणपोषणयोः हु दानादनयोः। एतेभ्यो लिटि
परत आम्प्रत्ययो भवत्यन्तरस्यां· श्लाविव चास्मिन्कार्यं भवति: किं पुनस्तत्· द्वित्वमित्त्वं च· बिभयांचकार· बिभाय·
जिह्रयांचकार· जिह्राय· बिभरांचकार· बभार· जुहवांचकार· जुहाव॥ ॥कृञ्चानुप्रयुज्यते लिटि॥ आम्प्रत्य
यस्य पश्चात् कृञनुप्रयुज्यते लिटि परतः· कृञिति प्रत्याहारेण ग्रहणं तस्त्तयोगस्तंते· तत्सामर्थ्यादस्तेर्भूभावो न भव
ति· पाचयांचकार· पाचयांबभूव· पाचयामास· २८ ॥

न विघातकः इदं तर्हि प्रयोजनं अनुप्रयोगः पश्चात्प्रयोगो यथा स्यात् ईक्षांचक्रे चक्रे ईक्षामिति मा भूत् तत्र व्यवहितनिवृत्त्यर्थं च ईक्षांदेवदत्तश्चक्रे
कथं व्यवहितनिवृत्तिः आम्प्रत्ययस्य पश्चाद्भावस्य तत्रैव मुख्यत्वात् तदेवं पूर्वनिपातनिवृत्तिर्व्यवहितनिवृत्तिश्च प्रयोजनमिति स्थितं इह तु तान्हरणाम्
दयामेव चकारेति बहुलं ब्राह्मणे व्यवहितप्रयोगदर्शनात् कथं भट्टिकाव्ये तु ईक्षांप्रचक्रे नागरस्य मार्गान् विभयांप्रचकारेत्यादिति कथं वा तेषां तया
प्रथममासम्भ्रंशयांयो न दुष्टं चकारेति वार्त्तिककारः छन्दोलायः पठति विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थं चेति २८ ॥ ॥ ॥

विदांकुर्वन्तु॥ ॥इहोत्तरत्रे चानुप्रयोगानुसारेणामेते लकारस्तुल्येयः। विदेर्लोट्याम्प्रत्यय इति निपात्यत इत्यनुषंगः तथा गुणाभावश्चेत्यत्र एवं लोपे
लुगित्यत्र तथा कृञश्च लोट्प्रत्ययस्यानुप्रयोग इत्यत्र सर्वमेतदाम्प्रभृति निपात्यते। इतिकरणः प्रदर्शनार्थ इति सर्वेषां लोड्वचनानामुपलक्षणार्थमित्यर्थः
किमेवं सति सिद्धं भवतीत्याह न केवलमिति। प्रचुरप्रयोगत्वात्तु सूत्रे बहुवचने पठितं। कश्चित्तु भाष्यवार्त्तिककारानुक्तत्वादुपलक्षणत्वेन छत्ति स इतिकरणस्य
प्रयोजनं ब्रवीतु॥ ॥अभ्युत्सादयां॥ ॥अकरिति कृञो लुङि सिपि च्लेर्मन्त्रे घसेत्यादिना लुक् तिपो हल्ङ्यादिलोपः अक्रन्निति लङ्बहुवचनं झि। क्रि-

विदांकुर्वन्त्वित्यन्यतरस्यां॥ ॥विदांकुर्वन्त्वित्येतदन्यतरस्यां निपात्यते· किं पुनरिह निपात्यते· विदेर्लोट्याम्प्रत्ययो गुणाभावो
लोटो लुक्· कृञश्च लोट्परस्यानुप्रयोगः· अत्रभवन्तो विदांकुर्वन्तु विदन्तु· इतिकरणः प्रदर्शनार्थः· न केवलं प्रथमपुरुष
बहुवचने किं तर्हि सर्वाण्येव लोड्वचनान्यनुप्रयुज्यन्ते· विदांकरोतु· विदांकुरुतात्· विदांकुरुतमिति॥ ॥अभ्युत्सादयां
प्रजनयां चिकयां रमयामकः पावयांक्रियाद्विदामक्रन्निति छन्दसि॥ अभ्युत्सादयामित्येवमादयश्छन्दसि विषये अन्यतरस्यां
निपात्यन्ते· सदिजनिरमीणां ण्यन्तानां लुङ्याम्प्रत्ययो निपात्यते· चिनोतेराम्प्रत्ययो द्विर्वचनं कुत्वं च· अकरिति च
लुङ्परस्य कृञोऽनुप्रयोगः संबध्यते· पावयांक्रियादिति पवतेः पुनातेर्वा णिचि लिङ्याम् निपात्यते क्रियादिति चा-
स्यानुप्रयोगः विदामक्रन्निति विदेर्लुङ्याम् निपात्यते गुणाभावश्च· अक्रन्निति चास्यानुप्रयोगः· अभ्युत्सादयामकः·
अभ्युदसीषदिति भाषायां· प्रजनयामकः· प्राजीजनदिति भाषायां· चिकयामकः· अचैषीदिति भाषायां· रमयामकः·
अरीरमदिति भाषायां· पावयांक्रियात्· पाव्यादिति भाषायां· वि-

यादिति। तस्येवाशिषि लिङ् लिङाशिषि सार्वधातुकत्वाभावादिकरणाभावः लिङ् शयाल्लिङ् स्तु द्विर्वचने चेति। चकारात्कुत्वं च· अभ्युदसीषदिति· सदे-
र्ण्यन्ताल्लुङि णौ चङ्युपधाया ह्रस्वः चङीति द्विर्वचनं हलादिः शेषः सन्वल्लघुनि दीर्घो लघोः। भाषायामिति। अन्यतरस्यामित्यनुवृत्तेश्छन्दस्यपि
यथादर्शनं भवत्येव भाषायां त्वेतदेव रूपमिति अभ्युदसीषदिति भाषायामित्युक्तं॥ ॥२९॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥च्लि लुङि॥ ॥इकार उच्चारणार्थ इति चकारलकारसंयोगस्य केवलस्योच्चारयितुमशक्यत्वात् न त्वयमनुबन्धः प्रयोजनाभावात्। चकारः स्वरार्थ इ
ति एतदुत्तरसूत्रे वक्ष्यामः अस्य सिजादीनादेशान्वक्ष्यतीति यद्येवं किमर्थमयमुपदिश्यते यावता श्रवणार्थो वा भवेल्लुप्येत आदेशः कार्यार्थो वा न चायं च्लिः क्वचि
च्छ्रूयते नापि घेवादीनामिवास्य समाश्रयेण किंचित्कार्यं दृश्यते तस्मात्सिचमेवोत्सृज्य तस्यापवादाः कर्तादयो विधीयेतरन्। नैवं शक्यं एवं हि मन्त्रे घसादिसूत्रे
व ह्वलोपो ग्रहणं कर्तव्यं स्यात् तत्कथं घस्यर्थं मन्त्रो ग्रहणं आकारान्तेषु धेटेत्व भवितव्यं च्लेर्ग्रहणं तस्य हि विभाषा धेट्श्व्योरिति चङ् स्यात् सिति धात्वन्तरार्थं सि
चो ग्रहणं घटिजनेद्दीपिजनेति विहितस्य चिणो लुकं च्लेरिदं सिद्धमिष्यते तत्तस्यापि तात्पर्येतानि च्लीतीचलादि वा ग्रहणानि भवन्ति प्युत्सर्गे पुनः सर्वेषां स्थानिभूत
स्य तस्यैवैकस्य ग्रहणान्ननु च क्रियमाणोप्युत्सर्गेणान्येत्र ग्णीग्रहणानि भवन्ति च्लि लुङि च्लेः सिच् मन्त्रे घसादिसूत्रे च परेत च्लेरिति। एवं तर्हि धेटेत ऊति स्या
त्तुदा भूभ्यः सिच इति एतच्लेरिति वक्ष्यामि तदेव च मन्त्रे घसादिसूत्रेप्यनुवर्तिष्यते तच्लाद्धेवं भवति। यदि च्लेरिरुच्यते किं त्ववस्थायामेव लुकं करिष्यति उताहो

॥च्लि लुङि॥ ॥धातोश्च्लिः प्रत्ययो भवति लुङि परतः इकार उच्चारणार्थः चकारः स्वरार्थः अस्य
सिजादीनादेशान्वक्ष्यति तत्रैवोदाहरिष्यामः॥ ३० ॥ ॥श्रीः॥ ॥श्री॥ ॥

आदेशे कृते सुप्यादिवद्भावेन यदि त्ववस्थायामेव अगुः आस्थुः सिजभ्यस्तविदिभ्यश्चेति जुस न प्राप्नोति। माभूत्सिजितेव मातेत्येवं भविष्यति तत्रापि सिच्ग्र
हणमनुवर्तते सिज्ग्रहणं निवर्तिष्यते यदि निवर्तते अभूवन्नित्यत्रापि प्राप्नोति केन सिजभ्यस्तेति नैष दोषः इदानीमेव लुकं त्ववस्थायामेव लुगिति तदेव
मातइत्यत्र ङि तदेवानुवर्तते न सिचइति लपयितर्हि प्राप्नोति अधात् अवान् लङः शाकटायनस्यैवेति नियमार्थं कल्पोभविष्यति एवमपि माहिगातं मा
हिष्यातां आदिः सिचोन्यतरस्यामिति सिचस्वरो न प्राप्नोति। अथादेशे कृते लुक् ततो विभाषा घ्राधेट्शाच्छासस्स इत्यत्रापि तथैव स्यात् धेटश्च विभाषा धेट्श्व्योरिति चङ् पिपि
कल्पितः तत्र पदासिचो लुगलुकौ तदा अधात् अधातां अधुः अधासीत् अधासिष्टां अधासिषुरिति सिद्धमिष्टं च ङोपि लुगभावपक्षे अदधत् अदधतां अद
धन्निति सिद्धं लुक्पक्षे तु प्रत्ययलक्षणेन द्विर्वचने अदधादित्यपि च तुर्थरूपं प्राप्नोति। न च ङो लुकि द्विर्वचनं न लुमतांगस्येति प्रतिषेधात् बहुवचने तर्हि ङो लु
कि अधानित्यनिष्टरूपं प्राप्नोति तत्रैशब्दमेव चेष्यते अधुः अधासिषुः अदधन्निति॥

का॰ प॰ ८०
३१

ननुचवृतोपिलुङ्यातइतिजुस्भविष्यतियथासिचः।नैतदस्तिसिज्ग्रहणंतत्रानुवर्त्ततेनिवर्त्तिष्यतेसिज्ग्रहणंयदिनिवर्त्ततेआतइत्येतद्द्युभ्योलुङि
विध्यर्थंसंभवन्नियमार्थंनस्यात्ततश्चाभूवन्निसत्रप्रत्ययलक्षणेनसिचइतिजुस्प्राप्नोतिइदानीमेवयुक्तंकृतेषादेशेघुलुगितिएवंतर्हियदेतत्सिजभ्य
स्तेतिएतन्नाभ्यस्तेतिवक्ष्यामिकिंकृतंभवतिचक्षुः।कापिज्ञाभ्यस्तेतिजुसःसिद्धोभवतिआतइत्यत्रापिसिजग्रहणानुवृत्तेर्नियमादभूवन्निसत्रजुसभा
वश्चसिद्धोभवतिकृतेषादेशेघुलुगितिसिजलक्षणःस्वरःसिद्धोभवति।पारिज्ञाभ्यस्तेसुच्यतेमाङ्चजुःश्रुहोषःअधुक्षन्अगोचन्अपीपचन्तत्रापि
जुस्प्राप्नोतितस्मात्सिजभ्यस्तेत्येवंवक्तव्यंआतइत्यत्रापिसिजग्रहणमेवानुवर्त्तनीयंनियमोयथास्यादिविधिर्माभूदितितत्रातदेवस्थितंवक्तव्यवचनेत्र
धातिति प्राप्नोतीतियदाचधेटश्चङोलुक्क्रियतेतदानकेवलंवक्तव्यवचनेसर्वेष्वेववचनेषुसिजलक्षणस्वराभावात्स्वरेचातुःशब्दप्रसंगःतस्मान्नाति
प्याघुपेसत्रसिचइत्येववक्तव्यंततश्चतदेवस्थितंतान्येवत्रीणिग्रहणानीति।प्रस्तुताक्रियमाणेप्युत्सर्गेमंत्रेघमादिसत्रेघ्वोरेवग्रहणंकथंधेटोज
नेश्चचङ्विप्रयोगेविकल्पितत्रयानिलुकृतग्रहणानिसिचएवतानिभविष्यंतिकोऽत्रविशेषः।अयमस्तिविशेषःसिचोलुकादिःसिचोऽन्यतरस्यामिस
तेनस्वरेणाभवितव्यंचङ्विधौस्तुनेतितस्माद्घुयोरपिपक्षयोस्त्रीणिग्रहणानिनार्थंश्चोत्सर्गेणतदुच्यतेअसतिह्युत्सर्गेमंत्रेघ्वसेत्सत्रयेभ्यःसिचोलु
क्क्रियतेतेषामादिःसिचोऽन्यतरस्यामितिसपस्वरःप्राप्नोतिसतित्वस्मिंल्लुगितितदुस्थापामिवलुग्विधानात्सिजभावात्यथायथंस्वरःसिद्धोभवतिति
याआकारांतेसिचोलुकिक्रियमाणेसिजभ्यस्तेत्यातइतिजुस्प्राप्नोतिलेसुलुकंतिमाभूदेवभवतितस्मादुत्सर्गःकर्त्तव्यः।तथाशलइगुपधादनि
टःक्सइत्यत्रापिनिरङ्जिघ्नेविशेषणंयथास्यादित्रसतिपुनरुत्सर्गेकिमेतद्विशेषणंभवतिधातोःनविधत्तेयस्मात्परस्येडितितत्रचलुङादेशाम
सार्वधातुकत्वात्संप्रतिपन्नमनिड्भमव्यभिचारादविशेषणमितिप्रत्ययांतरगतंतदाश्रयणीयंनविधत्तेप्रत्ययांतरस्ययस्मात्परस्येडितितस्तोगुहेर्न
स्यातअघुक्षदितिविधत्तेयस्मात्परस्यग्रहितेसाद्राविट्स्वरत्वादिसत्रेणाविकल्पितःअथापियाक्लिकेणेऽभावेनानिडितिमपदिश्यतानिसंक्तःप्रा
प्नोतिघुत्सर्गेपुनरनिडितितत्स्येवविशेषणंभवतिसवकदाचिदनिट्कदाचित्सेट्परानिट्स्याक्तःपरासेट्तदाघिजितिसिद्धमिष्टंअघुक्षन्अगूहीदिति
तस्मात्स्युत्सर्गःकर्त्तव्यः।क्लेःस्थानित्वेनविधानंकर्त्तव्यमित्यर्थः॥ ३० ॥ ॥

एम॰
३१

च्लेः सिच्॥ ॥इकार उच्चारणार्थ इति। न त्वनुबंधः यद्येवमंसेत्यत्र सिजंतस्यांगस्यात्मनेपदं ङित् तस्मिन्परे ऽनिदितामिति नलोपः प्राप्नोति ज्ञापकात्सिद्धं यदयं हन सिजिति हंतेः परस्य सिचः कित्त्वं शास्ति तज्ज्ञापयति न सिजंतस्योपधालोपो भवतीति यथा चैतत्स्थापकं तथा तत्रैवोक्तमिति तत्रैवावधार्यं चका रः स्वरार्थ इति। अंतोदात्तार्थः ननु सिचो न कृतार्थः कथं चकारः स्वरार्थः इटि कृते सा ऽङ्गो भवति एवमपि प्रत्ययस्वरेणासिद्धं न सिद्ध्यतिना प्रायेस्वरांतरे विधीय मानमागमानुदात्तत्वं प्रसज्य स्वरं बाधेत एवं तर्हि च्लेश्चितात्स्थानिवद्भावाच्चित्स्वरो भविष्यति तत्राह आगमानुदात्तत्वं हीति। चित्स्वरमपि बाधेतेति। स्था निवद्भावकृतं ननु च परिमाहिलावीदित्यत्र आगमानुदात्तत्वं स्यात् च्लेश्चित्करणमनर्थकं स्यात् एवं मन्यते च्लेश्चकारो मंत्रे घसादिसूत्रे सामान्यग्रहणे चरितार्थः

॥च्लेः सिच्॥ ॥च्लेः सिजादेशो भवति। इकार उच्चारणार्थः। चकारः स्वरार्थः। अकार्षीत्। अहार्षीत्। आगमानु दात्तत्वं हि प्रसज्येत सिचश्चित्स्वरमपि बाधेतेति स्थानिवदादेशेऽप्यस्य कारणेनुबध्यते। स्पृशमृशकृषतृपदृपां सिज्वा

वक्तव्यः॥ ॥छ॥ ॥छ॥ ॥

र्थः अन्यथा निरनुबंधकत्वादस्यैव ग्रहणं स्यात् न लिटः तत्र स्यान्मंत्रे निरनुबंधकस्य च्लेरसंभवाच्च्लेरिति नानुवर्तेत तस्य परत्वादंतरंगत्वाच्चेति वा दिवुक्त्वे सुपश्चाल्लुक्कि कार्यामिति प्रत्ययलक्षणेन तिङ् तत्रा ऽस्य स्वरः कार्यं चकारेतिल स्य चेन्निघातस्तस्मान्निघातः स्यात् तस्मादाम्मंत्रे च्लेरित्यनुव र्त्यतीयं तस्य च तत्रानुवृत्तिः सर्वत्र सामान्यग्रहणे समुपपद्यते तत्र च्लेश्चकारस्य चरितार्थत्वात्स्थानिवद्भावात्सामं चित्स्वरमपि बाधेतेति संभावनेलिङ् संभाव्येत बाधनमित्यर्थः अनुबंधांतरेणापि सामान्यग्रहणाच्चकारानुरोधे न चित्स्वर एव भविष्यतीति शमते वक्तुमिति भावः। स्पृशमृशेति स्पृश संस्पर्शने मृश आमर्शने कृष विलेखने तृप संतर्पणे दृप हर्षविमोचनयोः आभ्यां पुषादित्वादङ् प्राप्ते सिज्वापि पक्षेभ्यस्तु ज्ञायते। अस्पृक्षदिति। व्रश्चादिषत्वे षढोः कस्सीति कत्वं॥ ॥

॥अस्प्राक्षीदिति॥ अनुदात्तस्य चर्दुपधस्येति पक्षे अमागमः अकारस्य यण् एवं वदव्रजेत्यादिना आकारस्य वृद्धिः अमन्तावपक्षे आकारस्यैव वृद्धिः स्व मुक्तस्त्रा
पि॥ ॥शल इगुपधात्॥ ॥शलन्तो यो धातुरिगुपधस्तस्मादिति। ननु क्सेर्गुणनिमित्तत्वात् कृत एव क्से लावस्थायामेव गुणः प्राप्नोतीति तत्र कथमिगुपधादिति विशे
षणं न प्रकल्पते नैष दोषः विशेषणसामर्थ्यात् प्रागेव गुणात् क्सो भविष्यति। ननु च कृते पि गुणे भूतपूर्वगत्या विहितविशेषणाश्रयणेन क्सो भविष्यति कि
करणमिदानीं किमर्थं स्यात् क्तस्याचीति विशेषणार्थं स्याची युच्यमाने पुनः चरिहनिकमिकषिभ्यः सेवत्सैव त्साः अत्रापि प्राप्नोति गुणादयो बु
त्पन्नानि प्रातिपदिकानि सनर्थकत्वान्न भविष्यन्ति एवमपि वुच्छ्रणादिषु तृणादिष्वपि सेप्रसंगः तृणान्यस्मिन्देशे संतीति तृणसो तृणसा इति नैतदेवं बो

॥अस्प्राक्षीत्॰ अस्पार्क्षीत्॰ अस्पृक्षत्। अम्राक्षीत्॰ अमार्क्षीत्॰ अमृक्षत्॰ अकाक्षीत्॰ अक्राक्षीत्॰ अकृक्षत्॰
अतृपत्॰ अत्राप्सीत्॰ अतार्प्सीत्॰ अदृपत्॰ अद्राप्सीत्॰ अदार्प्सीत्॥ ॥शल इगुपधादनिटः क्सः॥ ॥शलन्तो यो
धातुरिगुपधस्तस्मात्परस्य च्लेरनिटः क्सादेशो भवति॰ दुह॰ अधुक्षत्॰ लिह॰ अलिक्षत्॰ शल इति किं॰ अभैत्सीत्॰ अ
छैत्सीत्॰ इगुपधादिति किं॰ अधाक्षीत्॰ अनिट इति किं॰ अकोषीत्॰ अमोषीत्॥ ३१ ॥ ॥छ॥ ॥

लेयो लेरित्येवेति प्रकरणे धातुप्रत्ययानां ग्रहणं किंच लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये इत्यत्रापि सस्याचीत्यतः सस्येति वर्तते तेन दुहादिषु यस्य सस्य संभवः सर्वत्र
पि तस्यैव ग्रहणं भविष्यतीति रेखांकितकरणसामर्थ्यात् गुणो न भवतीति स्थितं। च्लेरनिट इति यद्यपि च्लेः सिजादिभिरादेशैर्भवितव्यमिति कुचिदप्यश्रवणा
न्न सेट्त्वमनिट्त्वं वा तथापि दुहलिह इति स्थिते क्तस्याप्यविषय इति सिचा नभावं क्तोपितावन्न भवति यावदस्यानिट्त्वं न ज्ञातं तत्र लकारस्येवेटः प्राप्नोति तन्नि
षेधात्सेट्त्वमनिट्त्वं च निरूप्यत इति विशेषणोपपत्तिः। अधुक्षदित्यादि। दादेर्धातोर्घः एकाचो बशो भष्। अलिक्षदिति। लिह आस्वादने हो ढः। भिदिर् विदा
रणे छिदिर् द्वैधीकरणे कुष निष्कर्षे मुष स्तेये॥ ३१ ॥ ॥

॥ ॥श्लिषआ॥ ॥श्लिषेर्धातोरिति श्लिषआलिङ्गन इस्यसर्वं ननु श्लिषुश्लिषुप्रुषुप्लुषु दाह इत्यस्यालिङ्गने ह्यभावात् अनिट इति चाधिकारात्सा
नुबन्धकत्वाच्च तत्र नियमार्थमेतदिति। ननु श्लिषिरयं पुषादिः तथा च प्रसुतिरह शोऽङ् भवतीति तत्पुषादित्वात् प्रथमङ् बाधित्वा आलिङ्गने क्सः अ
न्यत्राङिति सिद्धमिष्टं सत्यं सिद्धं परस्मैपदे आत्मनेपदे त्वङभावादालिङ्गने अनालिङ्गने च पूर्वेणा क्सः प्राप्नोतीष्यते च तत्राप्यालिङ्गने क्सो न तत्र सि
च तत्त्वनियमे सत्युपपद्यते सच नियमो नोपपद्यते विधेयभावात् योगविभागात्सिद्धं श्लिष इत्येको योगः श्लिषश्च क्सो भवति किमर्थमिदं पुषादिङो बाध
नार्थं पथ्ये वत त्यवङ् बाधते तथा च्लिणमपि बाधेत समाश्लिक्षि कन्या देवदत्तेनेति पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानिति तत्रालिङ्गने अनालि

॥श्लिषआलिङ्गने॥ ॥श्लिषेर्धातोरालिङ्गनक्रियायामर्थे च्लेः क्सादेशो भवति। आलिङ्गनमुपगूहनं परिष्वङ्गः
तत्र नियमार्थमेतत्। आलिक्षत्कन्यां देवदत्तः। आलिङ्गन इति किं। समाश्लिषज्जतु काष्ठं॥ ॥छ॥ ॥

ङ्गने चाश्लिषः क्सो भवतीत्यदमिदानीं किमर्थं नियमार्थं आलिङ्गनामत्र योगविभागसामर्थ्याद्यावती च क्सस्य प्राप्तिः सा सर्वा नियम्यते न त्वन
न्तरस्यैव विधिर्वा भवतीति श्लिष इति या प्राप्तिरङो बाधनार्थमेव एवमपि नियमो नोपपद्यते कथं श्लिष इत्यसेतदङ् बाधनार्थं न च तदसन्ताया ङ बाधितु
प्रभवति पुषादिपाठसामर्थ्यात्तत्र तस्माद् ङ्क्सयोः सर्वत्र विकल्पे प्राप्ते द्वितीयो योगः आलिङ्गने क्स एवेति नियम्यते यथा स्यान्माकदाचिदङ् भूदित्येवमर्थः
स्यात् किं तर्हि उच्यते नियमो नोपपद्यत इति ननु तत्र भवतापि मुख्यान्तरेण नियम एवोक्त एतावांस्तु विशेषः मया प्रत्ययनियम उक्तः आलिङ्गन एव क्स इ
ति त्वया पुनरर्थनियमः आलिङ्गने क्स एवेति सर्वथा नियमान्न मुच्यामहे तत्र लक्ष्यानुरोधाद्धि येयविभक्तिनिर्देशेन प्रधानत्वाद्वा प्रत्ययनियम एव भ
विष्यति॥ ॥छ॥ ॥छ॥ ॥

॥नदृशः॥ ॥सर्वेगुणोऽतिशलइगुपधादित्यनेन॥ अङ् सिचो भवत इति। परस्मैपदेष्वन्यत्र सिजेव। अदर्शदिति अदृशोङि गुणः अद्राक्षीदिति सृजिदृशोर्झल्य
मकिति अथ ज्ञेः सिजित्सम्यानंतरं क्तस्य बाधनार्थं सिजेव कस्मान्न विहितः इत्विसामर्थ्यादङ् भविष्यति मत्सं तत्रापि इत्याद्वेति चकारः कर्तव्य इति ला
घवे नास्ति विशेषः॥ ॥णिश्रिद्रुस्रु॥ ॥चकारो विशेषणार्थ इति च ङीसत्रत्रड़ापुच्यमाने अस्य निवृत्तिः स्यादिति अभ्योऽङ् शिङ्गिदादिभ्योऽङ् अत्रापि प्राप्नोति
यदि पुनरयं ङो विधीयते चकारः ङकोक र्तुर्चिसंप्रयोजनमस्य अशिश्रियदिति सादित्यत्र चङि धातुरूपं चङं तं तु तिपि तत्रे चेन अयमस्य गुणोऽस्या क्ङिती तिप्र

॥नदृशः॥ ॥सर्वेणाक्तः प्राप्तः प्रतिषिध्यते दृशोर्धातोः परस्य ज्ञेः क्तादेशोऽनभवति अस्मिन्प्रतिषिद्धे इरितो वेत्य
ङ् सिचो भवतः अदर्शत् अद्राक्षीत्॥ ॥णिश्रिद्रुस्रुभ्यः कर्तरि चङ्॥ ॥सिजयवादस्य ङु धीयते। एतेभ्यो धा
तुभ्यः श्रिद्रुस्रुइत्येतेभ्यश्च परस्य ज्ञेश्च ङादेशो भवति कर्तृवाचिनि लुङि परतः ङकारो गुणवृद्धिप्रतिषेधार्थः चकार ॥
श्चङी ति विशेषणार्थः अचीकरत् अजीहरत् अशिश्रियत् असुस्रुवत् कर्तरीति किं अकारयिषातां क
टौ देवदत्तेन कर्मकर्तृरूपसमाख्यानं आयादय आर्द्धधातुके वेति यदा णिङ् नास्ति तदा रूपसमाख्यानं अचकमत णि
ङ्पक्षे सचङ्भावः अचीकमत नाकमिष्टसुखं यान्ति सुयुक्तैर्वडवारथैः अथपत्काषिणो यान्ति येऽचीकमत भाषिणः

निषेधः स्तनं तस्य तु विपमपेक्ष्य लघूपधगुणः प्राप्नोति न च तस्यापि चङ् सेवङि तमये स्य प्रतिषेधः किंकारणं क्ङिति निमित्तसप्तमी नैष दोषः अंतरंगा
त्रियङुवङौ अंतर्भूतश्चङपेक्षत्वात् बहिरंगो गुणः बहिर्भूतनिवर्ये स्तत्वात् अकारयिषातां इति एवं तां कर्मणि लुङ् द्विवचनमातां कर्मरूप संख्यानमि
ति न तु कर्मणि णिङ् विहितः न च प्रकृत्यंतरं कमिः संभवति णिङं ताहुसत्रे गोवर्मि इत्तत्राह आयादय आर्द्धधातुके वेति यदा णिङ् नास्ति
णिङ्पक्षे सचङ्भाव इति। सचत्र त्रे चङ् परो णिरिति अयणात्तत्र हि सन्वल्लघुनि चङीति वक्तव्ये यस्य हलोव हुवीदिर्थनि नणि स्पयदार्थः अस

॥विभाषाधेट्॥ ॥अङोप्यत्रविकल्पइति· जर्सस्विस्यादिना अश्वदिति श्वयतेः अश्वयीदिति ह्म्यन्तेत्यादिना सिचि वृद्धेः प्रतिषेधाद्गुणः। अधिषातामिति कर्मणि द्विवचनमात्मनेपदस्याथ्यारिच्चेति कित्ते॥ ॥गुपेः॥ ॥यस्मादयप्रत्ययो नास्ति तत्रायं विधिरिति। सत्रेकलस्यो च्चारणाद्गुपगोपने गुप्यत्याकुलत्वइत्यनयो स्तु ग्रहणं न भवति छंदसि दृष्टानुविधानात् दृष्टाने तु तयोरपि ग्रहणं। अजूगुपतमिति गुपूरक्षणे तस्य स्यमिपामिति थसस्तं तु जादीनां दीर्घोभ्यासस्य। अगौ प्तमिति। इदित्वादिभावपक्षे झलो झलीति सिचो लोपः। अगोपायिष्टमिति आयप्रत्ययान्तात्सिच्॥ ॥नोनयति॥ ॥अर्द गतौ याचने चेति। अर्द हिंसाया

॥विभाषाधेट्श्व्योः॥ ॥धेट्पाने टुओश्वि गतिवृद्ध्योः एताभ्यामुत्तरस्य च्लेर्विभाषा चङादेशो भवति· धेटस्तावत्· अद धत्· सिचपक्षे विभाषा घ्राधेट्छाच्छास इति लुक्· अधासीत्· श्वयतेः खल्वपि· अशिश्वियत्· अङोप्यत्र विकल्प इष्यते· अश्वत्· अश्वयीत्· कर्त्रीसेव· अधिषातां गावो वत्सेन॥ ॥गुपेश्छंदसि॥ ॥गुपेः परस्य च्लेश्छंदसि विषये विभाषा चङादेशो भव ति· यत्रापवृक्तप्रत्ययो नास्ति तत्रायं विधिः इमान्नो मित्रावरुणो गृहानजूगुपतं अगौप्तं· अगोपिष्टं· अगोपायिष्टमिति वा भा षायां तु चतुष्टयं तं वृजीपिलाग्निष्टं रूपत्रयं भवति॥ ॥नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः॥ ॥ऊनयपरिहाणे· ध्वन शब्दे· इल प्रेरणे· अर्द गतौ याचने च· एतेभ्यो धातुभ्यो णिजन्तेभ्यः उत्तरस्य च्लेश्चङ् प्राप्तश्छंदसि विषये न भवति· काममूनयीः· औनिनदिति भाषायां· मा त्वाग्निर्ध्वनयीत्· अदिध्वनदिति भाषायां· काममेलयीः· ऐलिलदिति भाषायां· मैनमर्दयीत्·

मित्यस्यापि ग्रहणाय दिच्छंदसि दर्शनमस्ति एष्मइति तत्रोनयतिश्चुरादिः ध्वनिरपि गर्वमान इति प्रागेत स्मादसंतादस्याधिकारे चुरादिः पठितः घटादौ चापि पठ्यते एलयति श्चुरादिः अर्दयतिर्हेतुमण्णंतः पूर्ववत्सौतिशास्त्रीत्यादिना ऊनयीतिरिति मध्यमपुरुषैकवचनं पूर्ववद्वृद्धौ प्रतिषिद्धायां गुणः नमाङ्योगइत्या डागमप्रतिषेधः मा त्वायतो जरितुः काममूनयीः इदं प्रति सुभगमा भक्षैर्वयं च नं त्वायतः त्वामिच्छतो जरितुः स्तोतुर्मम काममभि लषितं मा ऊनयीः ऊनं मा कार्षी रित्यर्थः प्रायेण तु तिबंतं पठ्यते छंदत्वादागमं चेतदसत्त्वदृष्टत्वं औनिनदिति सिपि चङि अजादेर्द्वितीयस्येति नशब्दस्य द्विर्वचनं प्रायेण तु दाहरणा वदिदमपि तिबंतं पठ्यते। ध्वनयीदिति तिपि नमाङ्योगइत्यडागमप्रतिषेधः॥ ॥

आर्ह्दिदिति। अजादेर्द्वितीयस्य न स्यात् संयोगादेरिति द्वाभ्यां द्वस्य द्विर्वचनं॥ ॥अस्यति॥ ॥ख्याआदेशो वेति वा शब्दः समुच्चये एवमुत्तरत्रापि पुषादित्वादेव सिद्धे इति। परस्मैपदेषु। पर्यास्थतेति। उपसर्गादस्यत्यूह्योर्वा वचनमिति मिसात्मनेपदं। अङि अस्यतेस्थुक्। अवोचदिति। वच उम्। आख्यदिति। आतो लोप इटि च॥ ॥लिपिसिचिह्व इति। ह्व इति निपातनात् संप्रसारणाभावः। समाहारद्वन्द्वे तु नपुंसकह्रस्वत्वं स्यादितरेतरयोगे बहुवचनं स्यात् अतो धातोरित्याकारलोपः॥

आर्ह्दिदिति माषायां॥ ॥अस्यतिवक्तिख्यातिभ्योऽङ्॥ ॥असु क्षेपणे। वच परिभाषणे। ख्या प्रकथने। चक्षिङादेशो वा। एभ्यः परस्य च्लेरङादेशो भवति कर्तर्वाविनि लुङि परतः। अस्यतेः पुषादित्वादङि सिद्धे पुनर्ग्रहणमात्मनेपदार्थं। पर्यास्थत। पर्यास्थेतां। पर्यास्थन्त। वक्ति। अवोचत। अवोचतां। अवोचन्। ख्याति। आख्यत्। आख्यतां। आख्यन्। कर्तरीति किं। पर्यासिषातां गावो वत्सेन॥ ॥लिपिसिचिह्वश्च॥ ॥लिप उपदेहे। षिच क्षरणे। ह्वेञ् स्पर्धायां। एतेभ्यश्च परस्य च्लेरङादेशो भवति। अलिपत्। असिचत्। आह्वत्। पृथग्योग उत्तरार्थः॥ ॥आत्मनेपदेष्वन्यतरस्यां॥ ॥पूर्वेण प्राप्ते विभाषा आरभ्यते। लिपिसिचिह्व आत्मनेपदेषु परतश्च्लेरङादेशो भवति अन्यतरस्यां। स्वरितञितः सात्मनेपदं। अलिपत। अलिप्त। असिचत। असिक्त। आह्वत। आह्वास्त॥ ३३ ॥ ॥

योगविभाग उत्तरार्थ इति। अस्यतिवक्तिख्यातिलिपिसिचिह्व इत्येकयोगे त्वस्यादीनामप्युत्तरत्रानुवृत्तिः स्यात्। ततश्च तेभ्योऽप्यात्मनेपदे विकल्पः स्यात्॥ ॥आत्मनेपदेषु॥ ॥अलिप्त असिक्तेति झलो झलीति सलोपः। लिङ्सिचावात्मनेपदेष्विति कित्वाद्गुणाभावः॥ ॥३३॥ ॥श्रीः॥ ॥

।। ।।पुषादि।। ।।एकेनैवादिशब्देन प्रत्येकसंबंधादेव सिद्धे द्वयोरुपादानं विस्पष्टप्रयोजनं। दिवाद्यंतर्गणा इति। पुष पुष्टौ शुष शोषणे इत्येवमादिरागणसमाप्तेः यत्तु मध्ये षिञ्ञिदा प्रीतौ स्विदिति ञ्लकरणं तद् आदिपरिसमाप्त्यर्थं एतच्चास्य तिग्रहणात्मनेपदार्थं पुषादित्वादिति वा ञ्लिककारवचनाद्धि सा पते। न भूवादिरिति पुष पुष्टौ शि षुग्लिषु पुषुमुषु सुषु दाह इत्येवमादिः अस्य परिग्रहणं स्यात् सुषाद्यनंतरं पाठ घुतादीनां पृथग्ग्रहणं न कुर्यात। क्र्यादंतर्गणो वेति। पुष पुष्टौ मुष स्तेय इत्येवमादिः तत्र हि चलाः एव पद्यंते तत्र यदि तेनि घुष्विताः स्युर्लदिति एवं तान् कुर्यात् स्वरितेत्वादेशपि ते नैवा सिद्धत्वात्। अथ पुषादयो घुतादयश्च लृदित एव कस्मान्न पठिताः अ शासास्ते न थाय पठितुं आदिना मीदिता मुदितां च तत्र भावात् तद्यथा पुष्पादिषु तावत् जिष्विदा गात्रप्रक्षरणे मदी हर्षे शमु उपशमने विधाद्या इति घुतादिषु

।।पुषादिद्युताद्यॢदितः परस्मैपदेषु।। ।।पुषादिभ्यो द्युतादिभ्यल्लृदिद्भ्यश्च धातुभ्यः परस्य च्लेः परस्मैपदेषु परतो ऽङादेशो भवति· पुषादिर्दिवाद्यंतर्गणो गृह्यते न भ्वादि क्र्याद्यंतर्गणः पुषः अपुषत· द्युतादि· अद्युतत। अश्वितत· लृदिद्भ्यः गम्लृ· अगमत। शक्लृ· अशकत· परस्मैपदेष्विति किं· व्यद्योतिष्ट· अलोठिष्ट।। ।।सर्त्तिशास्त्यर्त्तिभ्यश्च।। ।।सृगतौ· शासु अनुशिष्टौ· ऋगतौ· इत्येतेभ्यः परस्य च्लेरङादेशो भवति· सर्त्ति·।। ।।श्रीः।। ।।श्री४।। ।।छू।। ।।४।। ।।

घिष्विदा वर्णे ञिमिदा स्नेहने ञिक्ष्विदा स्नेहविमोचनयोः स्नं सुधं सु भ्रं सु अवस्रं सने स्यंद्य प्रस्रवणे रूप सामर्थ्ये इति। अद्युतद श्वितदिति घुम्यो लुङीति पक्षे परस्मै पदं। अलोठिष्टेति लुठ प्रतिघाते।। ।।सर्त्तिशास्ति।। ।।शासेरङादित्वाच्छपोलुगङ इतरत्र निपातनात्। शासु अनुशिष्टावितिसर्त्ति त्रिभ्यां यः स्मैपदिभ्यां साहचर्यपदिष्टस्यैव ग्रहणं न त्वाङः शासु इच्छायामित्यात्मनेपदिन इति दर्शयति ऋ गतावितिः ऋगति प्रापणयोरिति भौवादिकः ऋसृगतावितिजौहोत्यादिकस्तु द्वयोरप्यत्र निर्देशइतिकेचित्वयं तु जौहोत्यादिकयोरेवार्त्तिसर्त्त्योग्रहणं मन्यामहे।। ।।छ छ।। ।।छ छ।। ।।छ छ।। ।।

का.१२.
३५

॥अससरदिति। अत्र हशोऽङि गुणः। अशिषदिति शासइदङ्हलोः। शासिवसिघसीनां चेति षत्वं पृथग्योगकरणमात्मनेपदार्थमिति। अन्यथा पुषादिद्युताद्यॢदित्परस्मैपदेष्विति शास्त्रस्य ह्रस्वे कृते एवयोगं कुर्यात् एवं हि पृथग्विभक्तिनिर्देशश्च कारश्च न कर्तव्यो भवति समर्तेति सिमोगमश्छीत्यात्मनेपदं बद्धुलं छन्दस्यमाङ्योगेपीत्या ऽभाव। छन्दसत्वात्स्वप्रयोगस्य समस्वीयत्समर्तेसेनाः संकल्पात्रस्यसमर्ततथाभदिकोऽमेसमारंतमपाभीष्टाः संकल्पाः पर्युषितरतिवुपगततइतिकश्चिदाह भाष्यविरुद्धमिदं भाष्यकारेणाह्निमोगमच्छीत्यत्र मासमृषातांमासमरुषतेति आत्मनेपदे सिजुदाहृतइति अत्रादुः शासिसाहचर्यादिति सस्योरेविघमानशब्दोर्गे

॥अमरत्। शास्ति। अशिषत्। अर्ति। आरत्। पृथग्योगकरणमात्मनेपदार्थं समरंत। चकारः परस्मैपदेष्विलनुकर्षणार्थः तत्रोत्तरत्रोपयोगं यास्यति॥ ॥इरितोवा॥ ॥इरितोधातोः परस्य च्लेरङादेशो वा भवति। भिदिर्। अभिदत्। अभैत्सीत्। छिदिर्। अच्छिदत्। अच्छैत्सीत्। परस्मैपदेष्विसेव। अभित्त। अछित्त॥ ॥जृस्तंभुम्रुचुम्लुचुग्रुचुग्लुचुग्लुंचुश्विभ्यश्च॥ ॥वेति निवृत्तं। जृषवयोहानौ। स्तंभुः सौत्रो धातुः। म्रुचुम्लुचु गत्यर्थौ। ग्रुचुग्लुचुस्तेयकरणे। ग्लुंचुषस्ज गतौ। टुओश्वि गतिवृद्ध्योः। एतेभ्यो धातुभ्यः परस्य च्लेर्वाङादेशो भवति। अजरत्। अजारीत्। अस्तभत्। अस्तंभीत्। अम्रुचत्। अम्रोचीत्। अम्लुचत्। अम्लोचीत्। अग्रुचत्। अग्रोचीत्। अग्लुचत्। अग्लोचीत्। अग्लुंचीत्। अश्वत्। अश्वयीत्। अशिश्वियत्। ग्लुचुग्लुंचोरेकतरोपादानेपि रूपत्रयं सिध्यत्यर्थभेदात्तु द्वयोरुपादानं कृतं। केचित्तु वर्णयंति द्वयोरुपादानसामर्थ्यात्तत्र ग्लुंचेरनुनासिकलोपो न भवति अग्लुंचदिति॥ ३४ ॥

होत्सादिकयोरिह ग्रहणं सस्मोगमश्छीसत्रतु भौवादिकस्याप्यत्रैग्रहणं तत्र भौवादिके नौसिच उदाहरणमविरुद्धमिति॥ ॥इरितः॥ ॥अभित्तेति। स्वरितेत्त्वादात्मनेपदं॥ ॥जृस्तंभु॥ ॥अस्तभदिति अनिदितामिसुपधालोपः॥ अमतरोपादानेपि रूपत्रयं सिध्यतीति। कथं यदि तावद्ग्लुचिरुपादीयते तस्मादङ् सिचोर्ग्लुचत् अग्लोचीदिति तद्द्वयं सिध्यति ग्लुंचेस्तु सिचि तृतीयमग्लुंचीदिति अथ ग्लुंचिरुपादीयते तस्माद्ग्लुचत् अग्लुंचीदिति रूपद्वयं सिध्यति ग्लुचेस्तु सिचि तृतीयमग्लोचीदिति किमर्थं तर्हि उभयोरुपादानमित्यत्राह अर्थभेदात्विति केचिदित्यादि इदं भाष्यविरुद्धं भाष्यकारो हि अनेकार्थत्वाद्धातूनामर्थभेदेन प्रयोजकउभयोपादानस्येत्यतरोपादानं प्रत्याख्यातवान्॥ ३४ ॥

राम.
३५

॥ह्मग्रह॥ ॥अमरदिति असपेन परस्मैपदे॥ ॥चिराते॥ ॥सामर्थ्यादिति॥धातोरात्मनेपदे तात परस्मैपदं बहुवचनस्य स्थाने यस्तशब्दस्तस्य स्यमि
पामिति विहित स्तस्य॥ चिण्विषये असंभवः सामर्थ्यं उदपादीति चिणो लुक् उदपत्सते ति॥ आत्मनेपदे घनतइत्यादेरात्मनेपदेष्वनतः इह वेति निहितन्मुक्त स्यात्स्यतर स्याग्र
हणात्॥ ॥दीपजन॥ ॥जनीप्रादुर्भावे बुध अवगमने इति॥ जनजनने बुधबोधने इत्येतयोस्तु परस्मैपदिनो रिह ग्रहणं न भवति दीपादिनिरात्मनेपदि
भिः साहचर्यात् तेन परस्मैपदि भ्याकर्ममिति हो आत्मनेपदे कवचने पित इत्येते चिणल भवति यदि परस्मैपदिनो रिह ग्रहणे स्यात्मनेपदिनो न स्यात् सानुबंधक

॥ह्मग्रहरुहिभ्यश्छंदसि॥ ॥ह्मग्रहरुहि इत्येतेभ्यः परस्य च्लेश्छंदसि विषये चादेशो भवति॥ शकलांगुष्टकोकारतः अग्रो भरतः
अस्रदर्यावं पर्वतानारुहतः अंतरिक्षाद्दिमानमारुहं॥ छंदसीति किं॥ अकार्षीत् अमृत अदर्शीत॥ अरुक्षत॥ ॥चिणतेप
दः॥ ॥पदगतो अस्माद्धातोः परस्य च्लेश्चिणादेशो भवति त शब्दे परतः॥ सामर्थ्यादात्मनेपदेकवचनं गृह्यते॥ उदपादि सस्यं स
मपादि भैक्षं॥ त इति किं॥ उदपत्सातां॥ उदपत्सत॥ ॥दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्यां॥ ॥त इति वर्त्तते॥ दीपी दीप्तौ॥
जनी प्रादुर्भावे॥ बुध अवगमने॥ पूरी आप्यायने॥ तायृ संतानपालनयोः॥ ओप्यायी वृद्धौ॥ एतेभ्यः परस्य च्लेस्तशब्दे परतोऽन्यत
रस्यां चिणादेशो भवति॥ अदीपि॥ अदीपिष्ट॥ अजनि अजनिष्ट॥ अबोधि॥ अबुद्ध॥ अपूरि॥ अपूरिष्ट॥ अतायि॥ अतायिष्ट॥ अ
प्यायि॥ अप्यायिष्ट॥ ॥ ॥अचः कर्मकर्त्तरि॥ ॥अजंताद्धातोः परस्य च्लेः कर्मकर्त्तरि तशब्दे परतोऽन्यतरस्यां चिणादेशो भवति॥
प्राप्तविभाषेयं॥ अकारि कटः स्वयमेव॥ अकृत॥ कटः स्वयमेव॥ अकारि कटः स्वयमेव॥ अलावि केदारः स्वयमेव॥ अलविष्ट के
दारः स्वयमेव॥ अच इति किं॥ अभेदि काष्टं स्वयमेव॥ कर्मकर्त्तरीति किं॥ अकारि कटो देवदत्तेन॥ ॥ ॥छ॥ ॥

त्वात् कर्तरि चायं विकल्पः भावकर्मणोस्तु चिण्भावकर्मणोरिति नित्यमेव चिण् भवति परत्वादिह कर्त्तरि त्यनुवृत्तेर्वा॥ ॥अचः कर्म॥ ॥कर्मकर्त्तरीति॥
यत्कर्म भूत्वा कर्त्ता भवति तत्रेत्यर्थः॥ प्राप्तविभाषेयमिति॥ कर्मवत्कर्मणा तुल्यक्रिय इति देशेन नित्यं चिणः प्राप्तेः॥ अकारि कटो देवदत्तेनेति॥ अत्र शुद्धे कर्मणि चिण्भावक
र्मणोरिति नित्यमेव चिण् भवति॥ न चेह कर्त्तरीत्यनुवर्त्तिष्यते यद्येवं शुद्धे कर्त्तरि स्यात् कर्मणीति वा कर्मभेदेन कर्त्ता विशेष्यिष्यते कर्मणि कर्त्तरीति नेत
देवं शक्यं ते लभ्यं कर्मणि सुखमात्रे कर्तुर्निर्दिष्टत्वेन स्यात् च कारोपि क्रियमाणो कर्मणि च भवति कर्त्तरि च भवतीत्यधिकरणयोरेव समुच्चयः स्यात् न सामानाधि

दुहस्नुवां ॥ ॥अप्राप्तविभाषेयं न दुहस्नुनमां यक्चिणाविति चिणः प्रतिषेधात् तत्र दुहिग्रहणं यक्प्रतिषेधार्थं चिणोऽग्रहणं त्वाद्यर्थं । अदुग्ध इति क्तस्य चि
लुग्वा दुहदिहेति क्तस्य लुक् ॥ ॥नरुधः ॥ ॥रुधिर आवृणोति अनो रुधकामे इत्यत्र तु ग्रहणं न भवति कर्तृस्य भावकत्वेन कर्मकर्तुरभावात् ॥ ॥तयोर्नु
॥कर्मकर्त्तरीति तपस्तपःकर्मकस्यैवेति यत्र कर्मवद्भावो विहितस्तत्र भावकर्मणोरपीति प्रतिषेधात्कर्मवत्कर्मणेति यत्र कर्मवद्भावो विहितस्तत्रापि भवति अत
प्तस्तापस इति । अस्यार्थं तपस्तपःकर्मकस्यैवेत्यत्र व्याख्यातः एवं वक्ष्यति अन्ववात्तप्त पापेनेति । पूर्वं यस्यापि कर्मत्वं तेन पश्चात्तमो भ्याहत इत्यर्थः शुद्धे

॥ ॥दुहस्नुवां ॥ ॥दुहप्रस्रवणे अस्माद्धातोः परस्य ह्यस्तन्यां चिणादेशो भवत्यन्यतरस्यां · अदोहि गौः स्वयमेव · अदुग्ध गौः स्वयमेव ·
कर्मकर्त्तरीत्येव · अदोहि गौर्गोपालकेन ॥ ॥नरुधः ॥ ॥रुधिर आवरणे · अस्माद्धातोः परस्य ह्यस्तन्याः कर्मकर्त्तरि चिणादेशो न
भवति · अन्ववारुद्ध गौः स्वयमेव · कर्मकर्त्तरीत्येव · अन्ववारोधि गौर्गोपालकेन · ॥ ॥तयोर्नुतापे च ॥ ॥नेति वर्त्त
ते · तप संतापे · अस्माद्धातोः परस्य ह्यस्तन्यां चिणादेशो न भवति कर्मकर्त्तर्यनुतापे च · अनुतापः पश्चात्तापः तस्य ग्रहणं कर्म
कर्त्रर्थं · तत्र हि भावकर्मणोरपि प्रतिषेधो भवति · अतप्त तपस्तापसः । अन्ववातप्त पापेन कर्मणा ॥ ॥चिण्भावकर्म
णोः ॥ ॥धातोः परस्य ह्यस्तन्यां चिणादेशो भवति भावे कर्मणि च तशब्दे परतः भावे तावत् । अशायि भवता · कर्मणि खल्वपि ·
अकारि कटो देवदत्तेन · अहारि भारो यज्ञदत्तेन · चिणग्रहणं विस्पष्टार्थं ॥ ॥ ३५ ॥ ॥छ॥ ॥ ॥

कर्मणि लकारः पापेनेति कर्त्तरि तृतीया कर्मा विवक्षायां तु शोकार्थं वा तपो भावे लकारः पापेनेति हेतौ तृतीया पापदाम्याहन नार्थ्यस्य तपेः कर्मस्थ
भावस्य कर्मकर्त्राचिव क्ष्यते तदा कर्मवत्कर्मणो सति देशादात्मनेपदं तदापि हेतौ तृतीया ॥ ॥चिण्भाव ॥ ॥चिणग्रहणं विस्पष्टार्थमिति । चिण
ते परे इत्यनतस्तेश ह्यवदनुवृत्तेः यत्नुदीपज्जनेत्यादावनन्तरस्यां ग्रहणात् न रुध इति प्रतिषेधविधावेव निवृत्तं अन्यथा प्रतिषेधविधानमनर्थकं स्यात्
न च प्रतिषेधस्यानुवृत्तिशंका प्राप्तिपूर्वको हि प्रतिषेधः न च भावकर्मणोः केनचिच्चिणः प्राप्तिरस्ति ॥ ३५ ॥ ॥छ॥ ॥ ॥

सार्वधातुके॥ ॥इह्याशिषि लिङि लिट्चांतरेण पि विकरणः सर्वेष्वेव धातुषु तिङ्भेवद्भावे भावकर्मकर्त्रर्थत्वमपि प्रतीयंते भविषीष्ट त्वया कृषीष्ट
वटः भूयात् क्रियात् बभूवे चक्रे बटः बभूव चकार इति अत्र तिङ्द्वारो द्भावे कर्त्रादिविशेषतिङामभावे पि प्रतीयंते तत्र योग्यमा अशाप्य कारिणा छेति त्रिविधा एते विधि
मात्रतः॥ अधोगविभिरित्यादौ धातुमात्रे पि कर्तर्यर्थी॥ तथा मतिसइत्यादौ धात्वभावे पि कर्तर्यर्थीः॥ एवं स्थिते भूयो विषयाभ्यामन्वयव्यतिरेकाभ्यां शब्दार्थो
न्यायः व्यभिचारस्थलेषु तु तस्मिंस्तस्मिन्विषये तस्य तस्य शब्दस्य सामर्थ्यमिति कल्पयितुमुचितं न पुनः क्वचिद्व्यभिचारदर्शनेन सर्वत्रानाश्वासः तादृशेषु
चान्वयव्यतिरेकौ तिङामेवेति तेषामेव भावकर्मकर्त्रर्थोवाच्याः सूत्रकारो प्याह लः कर्मणि च भावे चाकर्मकेभ्य इति लादेशाश्च तिङः अतो पि तेषामेव
तेर्थाः इति मन्यमानः जाह भावकर्मवाचिनि सार्वधातुके परत इति उत्तरसूत्रे च कर्तृवाचिनि सार्वधातुके परत इति। शप्यत इति अयं शिङिति॥ अथ यदा
द्वौ कर्तारौ बहवो वा तदा कथमास्यते भवद्भ्यां आस्यते भवद्भिरिति द्विवचनबहुवचने कस्मान्न भवतः भावे भेदाभावात् धात्वर्थो हि भावः कर्तृभेदे पि नाव स्फु

॥ ॥सार्वधातुके यक्॥ ॥भावकर्मवाचिनि सार्वधातुके परतो धातोर्यक्प्रत्ययो भवति। आस्यते भ
वता। शय्यते भवता। कर्मणि। क्रियते कटः। गम्यते ग्रामः॥ ॥ श्री॥ ॥ छ॥ ॥ छ॥ ॥

धात्वर्थो भिधीयते यतः एकामेव क्रियामल्पिकां बहवः प्रसारयन्त्यपि दृश्यमेते पर्यंतीति कर्मभेदोपि पिताहृशः पश्येपैकस्यां क्रियायामेकोपपद्यते तंदुलाः इति न काल
भेदे हृल्लेखमहास्या लिप्यते आस्यते। पाकोपाका इति त्वत्र शब्दे भावे देकोषत्ता अतः भ्रनिदृत्तभेदा सर्वैव क्रिया ख्यातेभिधीयते श्रुतेरश काभेदानां प्रविभा
गप्रकल्पे नातदेवमाख्यातेन भावस्वरूपान्तो भेदः प्रतीयत इति द्विवचनबहुवचनाभावः यत्र तु सरूपान्तराव भेदः तत्र भवत्येव यथा उष्ट्रासिका आस्य
ते हतशायिकाः शय्यन्त इति उष्ट्राणां यासिकाः स्ता एव विलक्षणाः हताश्च नानाप्रकारं भोरउत्ताना अवतानावि कीर्णा केशा विस्तस्वस्त्रा इति तृत्ता
प्यादाख्यातेन वाच्यः पा विभावस्य सरूपान्तभेदादुभाष्यात् बहुवचनेरवश्य प्रयोगमंतरेणापि विवार्थो विगति भवितितदयमर्थः पाद्यशनिहिता नामनेक
प्रकाराणि शयनानि तादृशानि देवदत्तादिभिः क्रियंत इति केचित्वत्र कर्मणि लकारमिच्छति उष्ट्रासिका हतशायिकाल क्षणस्य भावस्य कालभावाधि
गंतव्यत्वात् इति कर्मत्वात् यथा गोदोहः सुप्यत इति॥

।ककारो गुणवृद्धिप्रतिषेधार्थ इति प्रत्ययतः इत्यत्र वृद्धिप्रतिषेधः। यग्विधान इति। ननु च कर्मवत्कर्मणा तुल्यक्रिय इत्यतिदेशादेव यक् सिद्धः किमुपसंख्यानेन तत्रा
हविप्रतिषेधाद्भीति। यगात्कर्मवत्कर्मणेत्यस्यं शास्त्रातिदेशस्तदा तेन न तेन शास्त्रेण कर्मकार्याणि भवंति तत्र कर्मणि यग्भवती स्यात्सावकाशः शुद्धं कर्म पच्यते ओ
दन इति कर्त्तरि शपि विलयस्यावकाशः शुद्धः कर्त्ता भवति पचतीति कर्मकर्त्तर्युभयप्रसंगे परत्वाच्छबेव स्यादित्यर्थः तन्नस्युपसंख्यानं कर्त्तव्यं न कर्त्तव्यं न दुहस्नु
नमां यक्चिणा विति पक्प्रतिषेधो ज्ञापयति न भवति कर्मकर्त्तरि यगिति कार्यातिदेशो तु तस्मिंस्तेनैव सूत्रेण भवन्यगेव परो भवति।। ।।कर्त्तरि शप्।। ।।

।।ककारो गुणवृद्धिप्रतिषेधार्थः यग्विधाने कर्मकर्त्तर्युपसंख्यानं वि प्रतिषेधात् यकः शपो बलीयस्त्वं क्रियते कटः
स्वयमेव पच्यते ओदनः स्वयमेव।। ।।कर्त्तरि शप्।। ।।कर्त्तर्थ्ये विनि सार्वधातुके परतो धातोः शप्प्रत्ययो भवति
पकारः स्वरार्थः शकारः सार्वधातुकार्थः भवति पचति।। ।।दिवादिभ्यः श्यन्।। ।।दिवु इत्येवमादिभ्यो धातु
भ्यः श्यन्प्रत्ययो भवति शपोपवादः नकारः स्वरार्थः शकारः सार्वधातुकार्थः दीव्यति सीव्यति।। ३६ ।।

पकारि शप्।। ।।पकारः स्वरार्थ इति। उपलक्षणमेतत् ङित्वप्रतिषेधार्थः शप श्यनोर्नित्यमिति विशेषणार्थश्च शकारः सार्वधातुकार्थ इति। संज्ञायुग्मे
च सार्वधातुकशब्दो न संज्ञिपरः सार्वधातुकसंज्ञार्थ इत्यर्थः कर्त्तरि ग्रहणात्कर्मवत्कर्मणेत्यत्रोपयोगः इह तु सार्वधातुके शप् भवति श्यन्न भवतीति सामा
न्यविधाने पिभावकर्मणोर्भावेऽपवाद इति कर्त्तर्येव शबादयो भविष्यंति।। ।।दिवादिभ्यः।। ।।भ्रासभ्लास चेषणा इति चुरादावदंते षात्मनेपदी पठ्यते तत्र
भ्लापत इति भवितव्यं दिवादिषु पिपठिषा भ्लाश्यती ति साधुः कं भ्रादिषु वा भ्लाश्योरष्ट्यः।। ।। ३६।। ।।छ।। ।।छ।। ।।छ।। ।।

॥ ॥वा भ्राशभ्लाश॥ ॥उभयत्र विभाषेयं अनवस्थानार्थो भ्रमिः क्रमित्रसी चदिवादयः त्रुटिस्तौदादिकः इतरे भौवादिकाः भ्राम्यतीति शमामष्टानां दीर्घः श्य
नीति दीर्घः भौवादिकस्य तु न भवति अशमादित्वात् क्रमेः क्रमः परस्मैपदेष्विति दीर्घः क्रमेस्तु ष्ठिवुक्लम्वाचमां शितीति क्लमेर्दिवादिपाठे चिंसे प्रयोजनं मे
स्तु पुषादिकार्यार्थः॥ ॥यसोनुप॥ ॥दैवादिको यतिर्दिवादिपाठो यसोपसर्गार्थः॥ अनुपसर्गादिति किमिति संयसश्चेत्येतत्समए वोपसर्गान्नान्यस्मादि

॥वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः॥ ॥टुभ्राशृ भ्लाशृ दीप्तौ भ्रमु अनवस्थाने भ्रमु चलने द्वयोरपि ग्रहणं क्र
मु पादविक्षेपे क्लमु ग्लानौ त्रसी उद्वेगे त्रुटी छेदने लष कान्तौ एतेभ्यो वा श्यन्प्रत्ययो भवति भ्राशते भ्राश्यते भ्लाशते भ्ला
श्यते भ्रमति भ्राम्यति भ्रम्यति क्रामति क्राम्यति क्लामति क्लाम्यति त्रसति त्रस्यति त्रुटति त्रुट्यति लषति लष्यति॥ ॥यसो
नुपसर्गात्॥ ॥यसु प्रयत्ने दैवादिकः तस्मान्नित्यं श्यनि प्राप्ते अनुपसर्गाद्विकल्प उच्यते यसोनुपसर्गाद्वा श्यन् प्रत्ययो भवति यु
स्यति यसति अनुपसर्गादिति किं आयस्यति प्रयस्यति॥ ॥संयसः॥ ॥संयसश्च॥ ॥सोपसर्गार्थ आरंभः संपूर्वाद्यसे
र्वा श्यन्प्रत्ययो भवति संयस्यति संयसति॥ ॥स्वादिभ्यः श्नुः॥ ॥षुञ् अभिषवे इत्येवमादिभ्यो धातुभ्यः श्नुप्रत्ययो भवति श
पोपवादः सुनोति सिनोति॥ ॥श्रुवः शृ च॥ ॥श्रुवः श्नुप्रत्ययो भवति तत्संनियोगेन श्रुवः शृ इत्ययमादेशो भवति शृणोति
शृणुतः शृण्वन्ति॥ ॥अक्षोन्यतरस्याम्॥ ॥अक्षू व्याप्तौ भौवादिकः अस्मादन्यतरस्यां श्नुप्रत्ययो भवति अक्ष्णोति अक्षति
॥ ॥तनूकरणे तक्षः॥ ॥तक्षू त्वक्षू तनूकरणे अस्मात्तनूकरणे वर्तमानादन्यतरस्यां श्नुप्रत्ययो भवति॥ ॥

तिनियमार्थं भविष्यतीति भावः॥ आयस्यति प्रयस्यतीति तुल्यजातीयानां हलन्तानामेव व्यावृत्तिः स्यादिति मन्यते॥ ॥संयसश्च॥ ॥इह समस्त एव वा स्तु पस
इस्तु न वक्तव्य इति तेषमवैकल्प्यस्य ग्रहणाशंकानिवृत्त्यर्थं तु संयसः इत्युक्ते एवं तर्हि समो यसः अनुपसर्गाच्चेत्यस्तु॥ ॥स्वादिभ्यः॥ ॥सिनोतीति॥ षिञ् बं
धने क्र्यादिष्वगतसिनाती स्यपि भवति॥ ॥तनूकरणे॥ ॥छ्रा॥ ॥छ्रा॥ ॥छ्रा॥ ॥छ्रा॥ ॥छ्रा॥ ॥छ्रा॥ ॥छ्रा॥ ॥

॥ अनेकार्थत्वादिति अत एव विशेषणोपादानादनेकार्थत्वं विज्ञायते प्रश्नार्थिनार्थस्तु गणे धातूनामर्थनिर्देशः संतक्षति वाग्भिः ॥ ॥ श्नम् प्रत्ययो भवतीति
॥ प्र प्रत्ययसंज्ञायां प्रकृत्युपपदे योपाधिविकारागमास्त्वर्जयित्वेत्युक्तं तथापि विधीयमानत्वेन प्राधान्यात् शवादिकृदर्थवत्वाच्छ्नमः प्रत्ययसंज्ञा भवतीति
भावः तेन शकारस्य प्रत्ययादित्वादित्वादिति संज्ञा शश्योर्वा दृश्यते द्वेधा भेदेनोभयोः सत्यपि शित्त्वे नाप्नोतेति मित्त्वात्स्यमध्यात्वादेकार्थत्वाच्छ्नयवाद्त्वं विकर
णो हि सार्वधातुकस्य यतोऽस्यार्थाभिधाने सहायतां प्रतिपद्यते । शकारः श्नान्नलोप इति विशेषणार्थः इति अथार्द्धधातुकसंज्ञा मा भूदित्येवमर्थः कस्मान्न भवति
सत्यां हि तस्याम् न क्तिभनक्ति अतो लोपः स्यात् रुणद्धि भिनत्ति युणक्ति स्यात् छिनत्ति इटो ठि इडागमः स्यात् नेड्वशि कृति सेत इति नास्ति प्रकृत्वात्सर्वमत
त श्नमः पूर्वभागस्यानंगत्वान्नभविष्यतीति कथमनंगत्वं यस्मात्प्रत्ययविधिरिति कोर्थः प्रत्यये विधीयमाने यत्स्वं च स्यादिति द्विधा तोः प्रातिपदिकादिति तदादि

॥ ॥ अनेकार्थत्वाद्धातूनां विशेषणोपादानं तक्षति काष्ठं तक्ष्णोति काष्ठं ननु करणादिति किं संतक्षति वाग्भिः ॥ ॥ तुदा
दिभ्यः शः ॥ ॥ तुद व्यथने इत्येवमादिभ्यो धातुभ्यः शप्रत्ययो भवति शपोपवादः ॥ शकारः सार्वधातुकसंज्ञार्थः तुदति नु
दति ॥ ॥ रुधादिभ्यः श्नम् ॥ ॥ रुधिर् आवरणे इत्येवमादिभ्यो धातुभ्यः श्नम् प्रत्ययो भवति शपोपवादः मकारो देशविध्य
र्थः शकारः श्नान्नलोप इति विशेषणार्थः रुणद्धि भिनत्ति ॥ ॥३१॥ ॥छ॥ ॥छ॥ ॥श्री॥ ॥

तास्मिन्प्रत्यये परतोंऽगमिति पश्चात्र पंचम्यान्निर्दिष्टं रुधादिभ्यो धातुभ्य इति न तस्मात्प्रत्ययः यस्माज्ज प्रत्ययः पूर्वभागात्स न तस्मिन्विधीयमाने यं च स्यान्निर्दि
ष्ट तस्माच्छ्रू दिति विशेषणार्थश्च शकारः नान्नलोप इत्युच्यमाने यज्ञ याच यत विच्छ प्रच्छ रक्षो न इत्युपज्ञानां यत्नानामत्रापि प्राप्नोति नामीति दीर्घत्वे कृते
नादिति सपरे शभावात्स भविष्यति यरत्वाल्लोप एव प्राप्नोति यत्तु अतो दीर्घो यञि सुपि चेति दीर्घत्वं न चैतदत्र प्रवर्त्तते किं कारणं सन्निपातलक्षणो विधिरनि
मित्तं तद्विघातस्येति इहापि तर्हि हिनस्यात् इत्यायेति कष्टाय क्रमणाद्इति निर्दिष्टादूर्ध्वं भविष्यति इहापि तर्हि यत्नानामिति तस्मादेव निर्देशात्सामान्यापेक्षया
ज्ञापनाद्दीर्घो भविष्यति एवमपि तस्य पूर्वस्मात् द्विधो यत्नानि वत्नान्न शब्द एवायमिति नलोपः स्यादेवं तस्माद्विशेषणार्थः शकारः कर्तरि श्नः अथ क्रियमाणे
पि शकारे इह कस्मान्न भवति विश्नानां प्रश्नानामिति लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य ग्रहणं ॥ ॥३१॥ ॥छ॥ ॥छ॥ ॥ ॥

॥तनादिकृञ्भ्य उः॥ ॥तनोतीत्यादि॰ तनु विस्तारे षणु दाने क्षणु हिंसायां अन्यत्तनादिकार्यमिति तनादिकार्य विशेषो नियमस्यार्थः आर्धधातुकेऽपि तनादि
भ्यस्तथासोरिति विभाषा सिचो लुङ् भवतीति न च सुलुग्विकल्पश्चतस्मादेव ह्रस्वादंगादिति लोपो भविष्यति न च विकल्पेन बाधः विकल्पप्रतिनित्यस्य सिद्धत्वात्
तनादिपाठसामर्थ्यादयवादेशो वचनप्रामाण्यादिति न्यायेनासिद्धत्वबाधाद्विकल्पेन नित्यस्य बाधः तनादिपाठस्य निष्फलत्वापत्तेश्चोत्तरितार्थत्वात् विकल्पोऽपि तत्र अत
थास्त्वादेवचरितार्थः प्रस्तुतक्रिममाणे कृञ्ग्रहणे तनादिषु कृञः पाठस्यानन्यार्थत्वाधेननाप्राप्तिन्यायेन विकल्पो नित्यविधिं बाधेत इदं हि कृञ्ग्रहणं विकरणवि
धौ तनादिषु पाठश्चरितार्थो भावि ज्ञापीसेवमर्थमेव स्यादिति कृञ्ग्रहणप्रत्याख्यानमेव न्याय्यं मन्यामहे॥ ॥धिन्विकृण्व्योः॥ ॥अतो लोपस्य स्थानिवद्भावा

॥तनादिकृञ्भ्य उः॥ ॥तनु विस्तारे इत्येवमादिभ्यो धातुभ्यः कृञश्च उप्रत्ययो भवति॰ शपोऽपवादः॰ तनोति॰ सनोति॰ क्षणोति॰
कृञः खल्वपि करोति॰ तनादिपाठादेव उप्रत्यये सिद्धे करोतेरुपादानं नियमार्थं अन्यत्तनादिकार्यं माभूदिति॰ तनादिभ्यस्तथासोरि
ति विभाषा सिचो लुङ् भवति॰ अकृत॰ अकृथाः॥ ॥धिन्विकृण्व्योर च॥ ॥इदितौ धिविकृविधातू प्रीणनार्थौ॰ कृविर्हिंसाकर
णयोः॰ इदित्त्वान्नुम् प्रत्ययो भवत्यकारश्चान्तादेशः॰ धिनोति॰ कृणोति॰ अतो लोपस्य स्थानिवद्भावाद्गुणो न भवति॰॥ ॥
क्र्यादिभ्यः श्ना॥ ॥डुक्रीञ् द्रव्यविनिमये इत्येवमादिभ्यो धातुभ्यः श्नाप्रत्ययो भवति॰ शपोऽपवादः॰ शकारः सार्वधातुकसंज्ञार्थः॥
क्रीणाति॰ प्रीणाति॰॥ ॥छ॥ ॥

द्गुणो न भवतीति। तेन प्रक्रियालाघवाय धिन्विकृण्व्योर्लोप एव नोक्त इति भावः लोपे हि गुणः स्यात् न च धातुलोप आर्धधातुक इति निषेधः प्रत्ययसंनियोगशि
ष्टत्वेन लोपस्यानार्धधातुकनिमित्तत्वात्। ननु नुम नुषक्तयोर्ग्रहणं किमर्थं नुमि कृते अत्वं यथा स्यात् धिविकृव्योरित्युच्यमाने अत्वे कृते तत एव परो नुम प्रसज्ये
त अत्वं स्यान्तरंगं प्रत्ययसंनियोगेन विधानात् नुमागमस्तु बहिरंगः उप्रत्यये प्रत्ययोत्पत्तितो विधानात्। ननु चान्तरंगस्य नुमत्वाद स्थायामेव भविष्यति न तु तावदीना
मंतरंगत्वात् तिवादिष्वेव तर्हि भविष्यति नित्यत्वेनात्वेन बाधनात् नुमागमस्तु शब्दान्तरप्राप्तेरनित्यः अंतरंगस्तर्हि नुमागमः तद्धि धोधातुग्रहणात् तन्डिधातुत
ज्ञाप्रवृत्तिकाल एव नुम भविष्यति एवं तर्हि प्रत्यासत्तिरेवमर्थं अन्यस्यापि स्तोसंभवात् कथमसंभवेऽपि यदि दानीमेचोत्कितामेरिदित्करणमनुनासिकलोपप्रतिषे
धार्थमिति। नन्वत्रापि पक्षे नुम विधावुपदेशि ग्रहणं प्रत्ययसिद्ध्यर्थमिति वचनादुपदेश एव नुम भविष्यति एवं तर्हि अंतरंगत्वादेव प्राप्तस्य नुमो यं निर्देशः॥ ॥

॥स्तम्भुस्तुम्भु॥ ॥उदित्वप्रतिज्ञानादिति। एषां स्तुकारोनुनासिक इत्संज्ञकः प्रतिज्ञायते तस्य प्रयोजनमुदितो वेति क्त्वाप्रत्ययेऽड्विकल्पः यदि चैते द्विकरणविषया एवैते स्युस्तन्नोपपद्यते तस्मादुदित्वेन प्रतिज्ञानात्सर्वार्थत्वं विज्ञायते सर्वप्रत्ययाः प्रयोजनमेषामित्यर्थः सर्वप्रत्ययशेषत्वमित्यर्थः॥ ॥हलः श्नः॥ ॥मुषाण मुषाणेति। लोटू सिप् तस्य हिः श्नादिभ्य एश्नास्तस्य शानच्चकारः स्वरार्थः अत्र संनियोगशिष्टपरिभाषया आनिसत्वादतो हेरिति हेर्लुक् न त्वत्र श्नाप्रत्ययस्य प्रकृतत्वात्तस्यैव शानजादेशो भविष्यतीति नार्थः श्न इति स्थानिनिर्देशेनात आह आदेशेति स्थानिसादिश्यादेशः इत्येषसंप्रत्ययो गमो यथास्यादित्येवमर्थ इत्यर्थः

॥ ॥स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च॥ ॥स्तम्भ्वादयश्चत्वारो धातवः सौत्राः स्कुञ् आप्रवणे· एतेभ्यः श्नाप्रत्ययो भवति श्नुश्च· स्तभ्नाति· स्तभ्नोति· स्तुभ्नाति· स्तुभ्नोति। स्कभ्नाति· स्कभ्नोति। स्कुभ्नाति· स्कुभ्नोति· स्कुनाति· स्कुनोति· उदित्वप्रतिज्ञानात्सौत्राणामपि धातूनां सर्वार्थत्वं विज्ञायते नैतद्विकरणविषयत्वमेव॥ ॥हलः श्नः शानज्झौ॥ ॥हल उत्तरस्य श्नाप्रत्ययस्य शानजादेशो भवति ह्यौ परतः· मुषाण· पुषाण· हल इति किं· क्रीणीहि· ह्याविति किं· मुष्णाति· श्न इति स्थानिनिर्देशः आदेशसंप्रत्ययार्थः· इतरथा हि प्रत्ययान्तरमेव सर्वविषयं विज्ञायेत॥ ॥३८॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

असति तु तस्मिन्किं स्यादित्याह प्रत्ययान्तरमिति। अस्तु प्रत्ययान्तरं क्र्यादिभ्यः इत्यनुवृत्ते स्तेभ्य एव हलन्तेभ्यो भविष्यतीति न कश्चिद्दोष इत्यत आह सर्वविषयमिति अक्र्यादिविषयमपीत्यर्थः क्र्याद्यनुवृत्तिर्दुर्ज्ञानेति मन्यते। शानचः शित्करणं किं प्रयोजनं स्थानिवद्भावेनैव सिद्धेः। उक्तं शिद्विदास्ते हनेदित्यादिः अत येन छन्दसि श्नात्तस्य शानजादेशः सिदम्नसिद्ध गुणानिति प्रतिषेधविषये विधीयमाने गुणो न भवतीयुनः शित्करणेन सार्वधातुकमपिदित्यस्यापि पुनः प्रवृत्तेरिति केचित्तेन निश्चयं यथैव सच्छे येन श्नाभवति एवं गुणविषयेऽकारो भविष्यति ३८

॥ चोदयति धातुग्रहणमनर्थकं यङ्ग्धो धात्वधिकारादिति धातोरेकाचइत्यत्र यङ्ग्धो यदा धातुग्रहणं तस्येहाधिकारादित्यर्थः परिहरति कृदुपपदसं
ज्ञार्थं त्विति एतदेवमाचष्टे अस्मिन्निति अस्मिन्नेवेत्यवधारणाद्दर्शयति पूर्वत्र माभूतामिति अस्मिन्नधिकारे धात्वधिकारे यत्स्म प्रत्ययोऽपि
ह्रस्वं तु उपपदसंज्ञे तावदनर्थः स्यात् तस्य पूर्वत्रापि स्यात् ञिलुङि लुङः तउपपदेऽल्लि इति एवं कृत्संज्ञापि धातोर्विहितस्यातिङो भवतीति सर्वत्रा
पि स्यात् ततश्च करिष्यती सत्र स प्रत्ययस्य कृत्संज्ञायां कृदन्तं प्रातिपदिकमिति प्रातिपदिकत्वे सति तिङश्चैकत्वे वचनग्रहणादेकवचनस्य
चोत्सर्गत्वात्तोरुत्पत्तिः प्रसज्येत तस्मादस्मिन्धात्वधिकारे यथा स्यातां पूर्वत्र माभूतामिति पुनर्धात्वधिकारः क्रियते ननु चाधिकारोऽत्र संज्ञेति

॥ धातुग्रहणमनर्थकं यङ्ग्धो धात्वधिकारात् । कृदुपपदसंज्ञार्थं तु । अस्मिन्धात्वधिकारे यथा स्या
तां पूर्वत्र माभूतामिति । आर्द्धधातुकसंज्ञार्थं च द्वितीयं धातुग्रहणं कर्तव्यं । धातोरेवं विहितस्य यथा स्यात् इ
ह माभूत् । लूभ्यां लूभिरिति ॥ ॥छ॥ ॥

यास्येते प्रत्ययसंज्ञावत् न्तते पूर्वत्र भविष्यत इत्याशंक्य प्रयोजनान्तरमाह आर्द्धधातुकसंज्ञार्थं चेति कथं पुनरार्द्धधातुकसंज्ञायां द्वितीयधातुग्रहण
स्योपयोग इत्यत आह धातोरित्येवं विहितस्येति लूभ्यां भिः इति अत्र सत्यपि प्रातिपदिकत्वे धातुत्वमप्यस्ति एवमिह ज्ञाया धातुसंज्ञाया अनिवर्त्त
नात् ततश्च धातोरेवायं विहित इति आर्द्धधातुकसंज्ञा स्यादेवं यदि तु द्वाभ्यां धातोरित्यत्र धातुग्रहणं स्याद्द्वितीयस्यार्द्धधातुकसंज्ञार्थं सविलत्वम
तिज्ञायेत अयमप्यधिकारः उआकोऽकर्तुर्वा सरूपविधिरप्यधिकारेण सिद्धस्तेन क्तादिभिः सिचः समावेशो न भविष्यति ॥ ॥ ॥

॥तत्रोपपदं॥ ॥सप्तम्यास्थमित्यस्यार्थमाह सप्तम्या निर्दिष्टमिति सप्तम्या विभक्त्योच्चारितमित्यर्थः सप्तम्यन्तेन पदेन प्रतिपादितमिति वा अस्मिन्
शेषसूत्रे सप्तमीशब्देन सप्तम्यन्तमुच्यते सप्तम्यन्तेन पदेन कर्मणीत्यादिना प्रतिपाद्यत्वेन स्थितं कुम्भादिकमित्यर्थः प्रथमे तु पक्षे कर्मणीत्यादेर्यः सप्तम्या
निर्देशः स एव कुम्भमित्यादेरपि प्रयोगात् तस्य सप्तम्या निर्देशः यथा तस्यापत्यमित्यादौ तस्येति सामान्यं विशेषोपलक्षणार्थमिति तद्वदयमेव प्राय
म्यं विशेषाणामप्यपि भवतीत्यत उक्तत्रापि कुम्भकार इति। अत्रोपपदत्वात् समासः कृदुत्तरपदप्रकृतिस्वरत्वञ्च भवति। स्थग्रहणमित्यादि सूत्रेषु पञ्चस

॥तत्रोपपदं सप्तमीस्थं॥ ॥तत्रैतस्मिन् धात्वधिकारे तत्तीये यत् सप्तमीनिर्दिष्टं तदुपपदसंज्ञं भवति। वक्ष्यति। कर्म
ण्यण्। कुम्भकारः। नगरकारः। स्थग्रहणं सूत्रेषु सप्तमीनिर्देशप्रतिपत्त्यर्थं इतरथा हि सप्तमी श्रूयते यत्र तत्रैव स्या
त्। स्तम्बेरमः कर्णेजप इति। यत्र वा सप्तमीश्रुतिरस्ति सप्तम्यां जनेर्ड इति। उपसरजो मन्दुरज इति। स्थग्रहणा
त्तु सर्वत्र भवति॥ ॥४६॥ ॥श्रीकृष्णाय नमः॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥

सप्तम्या विभक्त्या निर्दिष्टमुच्चारणं सप्तम्यन्तेन वा पदेन प्रतिपादनं तदेवं संज्ञाणामिति प्रतिपत्त्यर्थमित्यर्थः। ननु सप्तमीशब्देन साहचर्यात् सूत्रादिषु सप्त
म्या निर्दिष्टं गृह्यते नार्थ एतदर्थं न स्थग्रहणेनेत्यत्राह अन्यथा हीति मुख्यार्थसंभवे गौणस्याग्रहणात् स्थग्रहणं। तत्सप्तम्या एव संज्ञा स्यात् तत्संज्ञा
स्यात् संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधात् न चासतः संज्ञिनः संज्ञाशक्या विधातुमिति यत्र सप्तमी श्रूयते तत्रैव स्यादित्यर्थः। स्तम्बे
रम इति स्तम्बकर्णयोरपि जयोरित्यचि तत्पुरुषे कृति बहुलमित्यलुक् पत्रवेति यत्र सूत्रे सप्तमीश्रुतिः सप्तमीशब्दस्य श्रवणमित्यर्थः अशब्द
संज्ञेति स्वरूपग्रहणप्रतिषेधाद् भुपगाम्यवारोप्यं सर्वथेष्टं न सिध्यतीत्यत्रत्वाऽसर्वं स्थग्रहणात्विति स्थग्रहणे सति सोऽत्र सप्तम्युपलक्षितस्य सं
ज्ञाविधानात् सर्वत्र सिध्यतीत्यर्थः ४६ ॥

ननु च लघ्वर्थं संज्ञाकरणं तत्किमर्थं गुर्वी संज्ञा क्रियत इत्यत आह गुरुसंज्ञाकरणमिति। यो च्चारितं पदमुपपदमिति एवमर्थमनुगता संज्ञा अन्वर्थसंज्ञा समर्थप
रिभाषा व्यापारार्थमिति इह पदाः स्वार्थ द्रव्य लिंगात्मकं त्रिकः प्रातिपदिकार्थस्तदानां तेण विभक्तिं कर्माधिकरणाद्युपपद सुपपद त इत्यत्र इह सुबाधा
विभक्ति रीतिपद विधित्वादेव सिद्धः परिभाषाव्यापारः पंचकपक्षे तु प्रातिपदिकस्यैव कर्माद्यभिधायि तेन पदविधित्वाभावात्परिभाषाव्यापारो न स्यादि
त्यन्वर्थया संज्ञया बलात्प्रवर्त्तते नैतदस्ति पंचकपक्षेपि विभक्त्युत्पत्त्यापदत्वे सत्येव प्रत्यय इति प्रतिपादनात्। ननु गतिकारकोपपदानां कृद्भिः सह समासवचनं
प्राक् सुबुत्पत्तेरिति वचनात्कथं सुपपदस्य सुबन्तत्वं सामिप्यसत्त्वमिवान् उपपदमतिङिति सूत्रे हि सुप्येति तत्तीयान्तमेव निर्दिष्टं सुपिति प्रथमान्तमनुवर्त्तते इत्यगोचा
त्मकथमपरथा चर्मकारादौ न लोपादिस्यात्। परश्च कुंभंकरोतीति कटमिति। धातोरिति वर्त्तते कर्मादिशब्दाश्च संबंधिशब्दाः ततएवं विज्ञायमानः यस्य धातोर्यत्क
र्मेति एवमपि महान्तं कुंभं करोतीत्यत्र प्राप्नोति न वा भवति महाकुंभकार इति भवति यदेतद्वाक्यं महान्कुंभो महाकुंभः महाकुंभं करोतीति यदा त्वेतद्वाक्यम

॥ गुरुसंज्ञाकरणमन्वर्थसंज्ञार्थं अन्वर्थसंज्ञाविज्ञाने सति समर्थपरिभाषाव्यापारार्थं परश्च कुंभंक
रोति कटमिति प्रत्ययो न भवति उपपदप्रदेशाः उपपदमतिङिः त्येवमादयः॥ ॥ श्रीकृष्णायनमः

हान्तं कुंभं करोतीति तदानेष्यते किं च स्यात् यत्र स्यात् कुंभशब्दस्य कारशब्देन समासे कृते तदर्थ एकार्थीभावान्महच्छब्देन समासो न स्यात् न अन्वर्थत्वादेव
संज्ञायाः समसप्तमी निर्दिष्टत्वेपि प्रकृत्यर्थविशेषणान्तं द्विशेषणानां तद्विशेषणानां च उपोच्चारितपदत्वाभावात् उपपदसंज्ञा न भवतीति अथ तत्र ग्रहणं किम
र्थं धात्वधिकारः प्रतिनिर्दिष्टपते तत्रेति तस्मिन्सतीयेधात्वधिकार इति नैतदस्ति प्रयोजनं अधिकारादप्येतत्सिद्धं यदि तर्हि प्रयोजनं सप्तमीस्थस्य प्रत्ययोत्पत्ति
प्रतिनिमित्तत्वं यथा स्यादिति कथं प्रत्यय इति वर्त्तते सप्तमीस्थमुपपदसंज्ञं भवति तत्र चोपपदे सत्येव प्रत्यय इति अथ कर्मण्यणादिकाः सप्तमी तत्कृतो
सुपपदे प्रत्ययप्रसंगः न कर्मण्यणादिकासौ सप्तम्यर्थापि स्यात् तथा हि सत्यण्प्रत्ययस्याभिधेयं कर्म स्यात् यथा धः कर्मणीत्यत्र तथा चोपपदत्वे
सुपपदे प्रत्ययप्रसंगः ... निर्दिष्टत्वात् ... तत्र केवलमुपपदसंज्ञायां लिंगं सप्तमी तथा च धातोरण् भवति कर्मण्युपपद इति
न प्रतीयेत अतो यथेत्संज्ञार्थमनुनासिकत्वं प्रतिज्ञायते तथार्थनिश्चये क्वाके वलमुपपदसंज्ञायां लिंगं सप्तमी तथा च धातोरण् भवति कर्मण्युपपदमि
त्येतावानर्थः स्यात् कर्मणः प्रत्ययोत्पत्तिं प्रतिनिमित्तत्वं न प्रतीयेत तस्मात्तदर्थं तत्रग्रहणं किमिदानीं हेय एवायं ग्रंथः तत्रैत स्मिन्धात्वधिकार इति न वृ
हेय इति सोपस्कारस्तु भवति एतस्मिन्धात्वधिकारे यत्सप्तम्या निर्दिष्टं तदुपपदसंज्ञं भवति तत्र च सति प्रत्यय इति॥ ॥७ ७॥ ॥७॥ ॥

का॰ प॰ ८॰
५८

॥कृदतिङ्॥ ॥तिङ्वर्जित इति तिङ्भिन्न इति न त्वकृत्तिङ्भिन्न इत्यर्थः तिङोऽन्य इति यावत्। अतिङिति किमिति। इह क्रियमाणेऽप्ययं प्रतिषेधः स्वाश्रयामेव तिङः कृत्संज्ञां बाधितुं प्रभवति न तु लकारस्य कृत्त्वात् स्थानिवद्भावेन प्राप्तां अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति वचनादिति मत्वा प्रश्नः। तिङ्भाविनो लकारस्ये वकृत्संज्ञा प्रतिषिध्यते प्रतिषेधसामर्थ्यात् स्थानिवद्भावो न भविष्यतीत्युत्तरं चीयात् स्तूयात् स्तुयादिति ननु च ज्ञापकादेतत्सिद्धं यदयं महत्सार्वधातुकयोरि तिश्च कृत्सार्वधातुके प्रतिषेधं शास्ति तज्ज्ञापयति अकृदिति प्रतिषेधो न तिङ् भवतीति यदि स्यात् चिनुयात् सुनुयादित्यादौ सार्वधातुके पि कृत्प्रतिषे

॥कृदतिङ्॥ ॥अस्मिन्धात्वधिकारे तिङ्वर्जितः प्रत्ययः कृत्संज्ञको भवति। कर्तव्यं। करणीयं। अ
तिङिति किं चीयात्। स्तूयात्। कृत्प्रदेशाः कृत्तद्धितसमासाश्चेत्येवमादयः॥ ॥४७॥ ॥

धादेर्दीर्घो न भविष्यति किं श्यक्सार्वधातुकपर्युदासेन इह तर्हि प्रघ्नति द्रुम स्वपिति कृतिं तु गीति तुड्डा तृ इति तु स्विधौ धात्वादेरित्यतो धातुग्रह
णमनुवर्त्स्यते एवमपि चिकीर्षति जिहीर्षतीत्यत्र प्राप्नोति शप अवधानान्न भविष्यति एकादेशे कृते नास्ति अवधानं एकादेशः पूर्वविधौ स्थानि
वद्भवतीति व्यवधानमेव नात्र स्थानिवद्भावः प्राप्नोति परत्वादं तत्प्राप्तेन शाड्यते तस्माच्चिकीर्षतीत्यादौ तुङ्मा भूदित्यतिङीति प्रतिषेधः कर्तव्यः कि
च तिङं तस्य कृदंतं प्रातिपदिकमिति प्रातिपदिकसंज्ञायां पचेरन्नलोपः प्राप्नोति पपाच नाह्लणीदाप्प्राप्नोति सर्वस्मिंश्च स्वाद्युत्पत्तिः प्रसज्येत तदेतत
स्मात् स्वार्थोऽतिङिति प्रतिषेधादेव सिद्धे चीयादित्यादौ ज्ञापकं नाश्रयितव्यमिति वृत्तिकारो मन्यते स्म॥ ॥४७॥ ॥७ ४॥ ॥

ह्रम॰ ४
५८

॥वासरूपः॥ ॥असरूप इति पदच्छेदः अन्यथा लाघवे विशेषाभावात् संदेहार्थं असरूपो स्त्रियां वेति अकरणात् अपवादविषयेपि केषांचित्कृतां प्रवृत्तिर्यथा स्या
दित्येवमर्थमिदं वचनं यथोक्तं असरूपस्य वावचनमुत्सर्गस्य बाधकविषये ऽनित्यत्वार्थमिति परिभाषा चेयं अस्मिन्धात्वधिकारे अण् न असरूपस्यापवादस्य
विधायकानि शास्त्राणि तच्छेषभूतानि तत्र आचार्येण क्रियमाणे गौरवं स्यादिति साधारणरूपेण परिभाष्यते तत्र च असरूप इति मर्थं कृन्मात्रस्य विकल्पेन प्र
वृत्तेर्वासरूपत्वाद्घल्लिङ्गि च ल्युडपेक्षया असरूपपरत्वे न तत्सापेक्षं प्राप्ति योगिनिः प्रतीत्याभिन्नरूपत्वमसरूपत्वमिष्यते केनचिद्धि किंचित्सरूपमसरूपं वा भवति
तत्र केनासरूपत्वस्यापेक्षायां स्वविधानवेलायां स्वविधानवेलायां यः स्वस्मिन्विषये प्राप्तः स एव बुद्धिस्थः प्रतियोगी गम्यते अपवादविधानसमये चोत्सर्गस्याम
पि विषयमवगाहमानः उपस्थितेर्बुद्धौ भवतीति तदपेक्षया भिन्नरूपोपवादस्य वा स्यात् असरूपो विवक्षित इत्याह असरूपोपवादप्रत्यय इति एवस्थिते य

॥वासरूपोऽस्त्रियां॥ ॥अस्मिन्धात्वधिकारे समानरूपः प्रत्ययोऽपवादो
वा बाधको भवति अधिकारविहितप्रत्ययं वर्जयित्वा॥ ॥४८॥ ॥

घयमुत्पत्तिविकल्पः स्यादपवादप्रत्ययो वा भवतीति ततः स्वविषये कामं विकल्प उत्सर्गः लभ्यते न त्वुत्सर्गः प्रवर्त्तेत तत्राप्तद्विषयो ह्यसौ उत्सर्गोप्यपवादस्या
स्त्रयोर्हि प्रमितिमापादयितुं वर्तमानस्य पश्चादपि स एव प्रदेशे स्थितान् अपवादस्य पक्षे प्रवृत्तिं प्रतिबध्नाति अपवादशास्त्रेण हि स्वीकृतो विषयस्तद्व्यतिरिक्त
विषयाभावात् शास्त्रस्य प्रमितिरित्यपवादस्य प्रवृत्त्या विनैवोत्सर्गस्य तस्मिन्विषये प्रमितिः प्रवृत्तिर्वा यथा घटेत इति वक्तव्यं तद्यथा दक्षस्यापत्यमित्यत्र इञि कृते
ते पक्षे अण् न भवति अपि तु वाक्यमेव भवति कस्य हेतोः समर्थानां प्रथमाद्वेति तत्पक्षे अपवादप्रवृत्तिर्निरुध्यते न पुनरेकवाक्यतया प्राप्तिरेव विकल्प
षितेतिनिश्चेहापीति अपवादाभावपक्षे प्रकृतिरेव केवलेत्यभिधानाया अनुज्ञातास्यात् यथा चिकीर्षितारो किबादिलोपेत दाह तत्रोत्पत्तिप्रसंगो यथा तद्धि
तदिति सिद्धमुत्पत्तिविकल्पपक्षे दोषं दृष्ट्वा बाधकत्वं विकल्प्यत इत्याह वा बाधको भवतीति उक्तं च सिद्धं तु असरूपबाधकस्य वावचनात् असरूपो वा बाध
को भवतीति वक्तव्यमित्यर्थः ननु तत्र तत्रोच्यते पक्षान्तरे क्रियायां परं न श्रूयते तत्रास्ति भवन्तीपर इति तत् असरूपो वेत्युक्ते भवतीत्येवाध्याहार्ये युक्तः नपु
नर्वा बाधक इति॥ ॥छ॥ ॥

का॰ प्र॰
४९

नुच्यते उत्पत्तिविकल्पस्य प्रयोजनं केवलायाः प्रकृतेः प्रयोगः केवला च प्रकृतिः स्त्र्यर्थमात्रमभिधातुमसमर्था किं पुनः कर्त्रादिकमभिधास्यति प्रकृ
तिप्रत्ययसमुदाये हि प्रयुज्यमाने व्यतिरेकाभ्यामयं प्रकृत्यर्थः अयं प्रत्ययार्थ इति व्यवस्थाप्यते अनुत्पन्नप्रत्ययात्तु प्रकृतिर्न किंचिदप्यर्थं गमयति प्र
योगोपि हि तस्या दुर्लभः परश्चेति नियमात् तद्धिते त्वनुत्पत्तिपक्षे स्वुत्सर्गप्रवृत्तिव्यतिरेकेणापत्यप्रत्ययान्तरमस्ति षष्ठी ह तु न तथेति सामर्थ्यादिहिराममपि
बाधकत्वं विकल्प्यते ननु वचनशास्त्रं शास्त्रेण बाध्यते न पुनः कार्यं कार्येण निदानोच्छेदे नैव हि निदाननिवृत्त्युच्छेदः शक्यते कर्तुं न हि प्रदीपे अनुच्छिन्ने तमः प्रकाश
बाध्यते तत्किमुच्यते अपवादप्रत्ययबाधेति एवं तु वक्तव्यं अपवादशास्त्रमिति उच्यते भवत्येवापवादशास्त्रस्य स्वगतमसारूप्यमव्यभिचारीति प्रत्यय
द्वारकं तदाश्रयणीयमित्यपवादप्रत्ययग्रहणमुक्तं एवंभूतस्य प्रत्ययस्य विधायकं शास्त्रमित्यर्थः यद्वा प्रत्ययस्य बाधकत्वविकल्पसामर्थ्याच्छास्त्रमपि पक्षे
बाधकं भविष्यति अथवा द्वन्द्वो वस्तुमात्रं दर्शितं यथा त्वयमर्थ उपपद्यते तथा सूत्रं भाष्येयं तत्रेदं व्याख्यानं परिभाषेयमित्युक्तं तत्रैकपरिभाषावाक्य
मिदमुपस्थापयति अस्मिन्धात्वधिकारे यत्रासरूपोपवादप्रत्ययो विधीयते तत्रैवेयमुपतिष्ठते अधिकारे तु नेति किंकृतं भवति ददाति दायः ओर्विभाष
त्याद्रवतः प्रमितिरेव विकल्पः प्राप्तो भवति ततस्तद्द्वेवोत्सर्गस्य प्रकृतिसिद्धिरिति। अथासरूपः उत्सर्गप्रत्ययोपवादविषये वा भवतीति विज्ञायमाने को
दोषः न खलु कश्चिद्दोषः अपवादविकल्पे प्राप्ते विभाषा उत्सर्गविकल्पे त्वप्राप्तविभाषेति किंतु प्रातिपदिकापेक्षमसरूपपदमपवादमेव गोचरयतीत्युक्तं।
अस्त्रियामित्यत्र पक्षत्रयं संभवति अभिधेयसप्तमी वा स्यात् स्त्रियामभिधेयायां वासरूपो न भवतीति स्त्रियामित्येवं वा विहितस्यासरूपस्य निषेधः स्यात्
स्त्रियामित्युच्चार्य ये विधीयन्ते तेनेति स्त्रीग्रहणं वा स्वर्यते नाधिकारो वा गतिर्भवतीति स्त्रियां क्तिन्नित्यस्मिन्नधिकारे नेति तत्राद्ये पक्षे विक्षिपा विक्षेपिका वि
क्षेप्त्रीति कविषये ण्वुल्तृचौ न स्याताम्। द्वितीये तु कर्मव्यतिहारे णच् स्त्रियां व्यावक्रोशी व्यावकुष्टिरिति शाचोर्विषये क्तिन्न स्यात् द्वयोरपि स्त्रियामित्युच्चा
र्यविधानात् इति मत्वा द्वयोः पक्षयोर्दोषदर्शनात् तृतीयपक्षमाश्रित्याह अधिकारविहितप्रत्ययं वर्जयित्वेति केचिदाहुः अपवादप्रत्ययं वर्जयित्वेति वक्तव्ये
प्रत्ययं वर्जयित्वेति वचनं प्रत्ययमात्रपरिग्रहार्थं तेनोत्सर्गापवादयोर्द्वयोरपि स्त्र्यधिकारनिर्दिष्टयोरयं प्रतिषेधः किं सिद्धं भवति आसना आस्या अधिका
रविहितेनापि युच्चापवादेन अहलोऽपि ततः समावेशः सिद्धो भवति व्रजस्तु क्तिनादिभिरनभिधानादसमावेश इति। अन्ये तु अपवादो वा बाधको भवतीति
प्रकृते लासरावात्र प्रत्यय इति व्याचक्षते तेन व्रजः क्तिन्नादिभिरसमावेशः आस्येत्यत्र कृत्यल्युटो बहुलमिति ण्यत् इति ४८ ॥ ॥ ॥

एम॰
४९

ण्वुल्तृचौ ण्वुलुत्सर्गौ इति धातुमात्रे विधानात् इगुपधज्ञाप्रीकिरः कः इत्यपवादः इति धातुविशेषे विधानात् किं पुनः प्रयोगगतमसारूप्यमाहोस्विदुपदेशगतं किं चातः प्र
योगे लादेशेषु प्रतिषेधः स्यात् चक्रिरे इत्यत्र लुङपि प्राप्नोति प्रयोगे ह्येषां सरूपत्वात् लिटः कानज्वा क्वसुश्च कानच्प्रत्ययः लुङापत्स्यतीति चक्राणः स्वकर्त्र्येत्यत्र लुङपि प्राप्नोति ज्ञापका
त्सिद्धं यदयं हशश्वतोर्लङ् चेति लिड्विषये लङं शास्ति तज्ज्ञापयति न लादेशेषु वासरूपविधिरिति एवमपि ग्रामणीः सामनाय इति क्विलादिविषये ण्यादयो ऽप्या
दयो न स्युः न हि क्विबादयः प्रयोगे रूपवन्तः लोपविधानात्तेषां तस्मादुपदेशगतमसारूप्यं यद्येवमनुबन्धभिन्नेषु विभाषाप्रसंगः कारणोऽपि सुपदेशे भिन्नरूपप्रयो
गे तु समानं तत्र इगनुबन्धकृतमिति अनुबन्धानामनेकान्तत्वात् कृतमसारूप्यं नाश्रीयते तथा चौटीचांमाङ् इति श्रूयमाणेऽपि ङकारे तस्यानेकान्तत्वात् स्माहृतमे
जं तत्त्वमित्यालं प्रयुक्तं इत्युक्ति इत्यासो विभाषेति विभाषाग्रहणं चालिंगमसारूप्यार्थस्य अन्यथा अनुबन्धकृतादसारूप्यादेव इह विषये गोभविष्यतीति किं तेन इहेत्स

ण्वुल्तृचावुत्सर्गौ इगुपधज्ञाप्रीकिरः कः इत्यपवादस्तद्विषये ण्वुल्तृचावपि भवतः विक्षेपकः । विक्षेप्ता विक्षिपः असरूप
इति किं कर्मण्यण् इत्युत्सर्गः आतोऽनुपसर्गे कः इत्यपवादः स नित्यं बाधक एव भवति गोदः कंबलदः न त्वनुबन्धकृतमसारूप्यं
अस्त्रियामिति किं स्त्रियां क्तिन् इत्युत्सर्गः अ प्रत्ययात् इत्यपवादः स बाधक एव भवति चिकीर्षा जिहीर्षा ॥ ॥ श्री ४ ॥ ॥

ल्युट्तुमुन्ण्वुलर्थेषु वासरूपविधिः प्राप्नोति इह सितं छात्रस्य शोभनं हसनं छात्रस्य अत्र क्तल्युड्विषये ल्युडपि प्राप्नोति तुमुन् इच्छति भोक्तुं अत्र इच्छार्थेषु लि
ङ्लोटाविति लोट् प्राप्नोति तुमुन्ण्वुलौ बाध्येते लिङ् तु लिङ् क्तिन्वा द्रवस्येव यद्येवमस्मादेव नियमाल्लोडपि न भविष्यति ण्वुलर्थे आगतो याचक इषितानः अ
त्र ण्वुलपि प्राप्नोति ननु अधिकारेणावरस्त्रियामिति प्रतिषेधात् अस्याप्रवृत्तिः परस्तादपि विच्छिन्नत्वादेव न भविष्यति स्यादेतदेवं यद्ययमधिकारः स्यात् परिभा
षा त्वेषेत्युक्तं इष्यते च अस्याधिकारादूर्ध्वमपि वासरूपविधिः आसितो भुक्ते आस्यते भोक्तुमित्यपि यथा स्यात् अन्यथा भोजनार्थत्वादासनस्य पौर्वकाल्यमव
गम्यते तुमर्थाधिकाराद्भावे त्वाप्रत्ययस्तत्रैव च लकार इति समानविषयत्वात् अस्य बाधकभावः स्यात् तथा कालो भोक्तुं कालो भोक्तुं कालो भोजनस्य तुमुना
ल्युटो बाधः स्यात् तस्मात् अधिकारात् परस्तादपि वासरूपविधिरेषितव्यः अर्हे कृत्यतृचश्चेत्यत्र ऋत्यतज्यग्रहणं ज्ञापकं स्याधिकारस्य परस्तादपि नित्यं तत्र परिभाषे
ति तस्मात् क्तल्युट्तुमुन्ण्वुलर्थेषु प्रतिषेधो वक्तव्य एव ॥ ॥ छ ॥ ॥

का॰ पद॰
५०

॥कृत्याः प्राक्॥ ॥ण्वुल्तृचाविति वक्ष्यतीति योगात्प्राक् ण्वुल्ब्रकुल मित्यर्थवधिर्न भवति किमर्हे कृत्यत्वेश्चेति एथक्त्वं चेोग्रहणात्तयद्येवं प्राङ्
ण्वुल इति न वक्तव्यं कृत्या इत्येवास्तु तत्र ग्रहणादेव ज्ञापकात्सर्वतोनुवृत्तिर्न भविष्यति योगापेक्षं व्याख्यायके ण्वुल्तृचाविति समायोगात्प्राक् कृत्यसंज्ञाधिकार
इति सर्वसंज्ञकत्वात्कृत्येनानुवर्तते यदितं सूत्रकारेणानुवृत्तिकारस्तु भाष्ये पूर्वपक्षरूपेण पठितं सूत्रे प्रक्षिप्तवान्विचित्राद्दृष्टेः इति वृत्तिकारेण कृत्याः इति बुद्धवच
नमनुक्रमसमुच्चयार्थं तेन केलिमरउपसंख्यानमित्यादिनोपसंख्येयं भवति॥ ॥तव्यानीयौ॥ ॥वसेरिति वसनिवासः स्यस्य ग्रहणं न तु वस आच्छादन इत्यस्य तु

॥कृत्याः प्राङ् ण्वुलः॥ ॥ण्वुल्तृचाविति वक्ष्यति प्रागेतस्मात् ण्वुल्संज्ञाद्वाक्यानि तत ऊर्ध्वमनुक्रमिष्यामः
कृत्यसंज्ञकानि वेदितव्यानि तत्रैवोदाहरिष्यामः। कृत्यप्रदेशाः कृत्यैरधिकार्थवचने। कृत्यानां कर्तरि वेत्येवमा
दयः॥ ॥तव्यानीयौ॥ ॥धातोरिति वर्तते। धातोस्तव्यत तव्यअनीय इत्येते प्रत्यया भवन्ति। तकारे
योस्वार्थौ। कर्तव्यं। कर्तव्यं। करणीयं। वसेस्तव्य कर्तरि णिच्चवा वास्तव्यः। केलिमर उपसंख्यानं। पचेलिमामा
षाः। भिदेलिमानि काष्ठानि। कर्मकर्तरि साधयिष्यते॥ ॥४७॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

एस॰
५०

ण्विकारणस्य तयोरेव कृत्यत्वम् कृत्यल्युटो बहुलम् इति वचनात्कर्तरि लिङ्गप्रोक्तेति वचनात् योगविभागार्थं वा वास्तव्य इति तद्धितान्तो वा पुनरेष भविष्यति वास्तु नि भवो वास्त
व्यः द्विगादित्वाद्यत् अवास्तव्य इत्यत्र स्वरभेदो नास्तिकल्पोके शाकुन्तिपर्णोदाहरण तद्यत्र देवपथादिभ्यो तद्व्यत्वर्थ इत्यनेन भविष्यति। केलिमर इति ककारो गुणवृद्धि
प्रतिषेधार्थः रेफः स्वरार्थः कर्मकर्तरि चायमिष्यत इति भाष्ये नु पचेलिमा माषाः पक्तव्याः भिदेलिमाः सरला भेत्तव्या इति शुद्धे कर्मणि प्रदर्शितं॥ ४९ ॥

॥ ॥अचो यत्॥ ॥अज्ग्रहणं किमिति पूर्वसूत्र एव पद्ग्रहणं कर्त्तव्यमिति प्रश्नः। पावतेत्यादिद्व्ये हि धातवः अजंता हलंताश्च तत्र हलंतस्य तं व स्यतिश्च
नः पारिशेष्यादजंतादेव पद्ग्रहणं विष्यतीत्यभिप्रायः अजंतभूतपूर्वादपीति पूर्वं भूतो भूतपूर्वः सुप्सुपेति समासः अजंतश्चासौ भूतपूर्वश्च अजंतभूत
पूर्वः दित्स्यं धित्स्यमिति दाञो धाञश्च सन द्विर्वचनं सनि मीमाघुरभ्यासस्येत्यभ्यासलोपः स्याद्यार्धधातुक इति नत्वं अत्र लोपोऽभ्यासस्येति धित्स्य इति स्थिते अनुनास
एगाईधातुके वुद्धिस्य एवातो लोपे कृते संप्रत्ययं हलंत इति एवं तस्यादजग्रहणान्नु भूतपूर्वमजंतत्वमाश्रित्य यद्भवतीति तेन यतोऽनाव इत्याद्युदात्तत्वं प्राप्यतीति तु तित्स्वरितं
स्यात चिकीर्ष्यमिति सादेतु तु यद्यपि तोर्विशेषाभावः यतोऽनाव इत्यत्र हि यद्यप्यनिवर्त्तितेय इत्यलाधार्धधातुके परतो लोपः तदेतदज्ग्रहणं न कर्त्तव्यमेव तक्किशसी त्या
दिलकि हसने शसु हिंसायां चते चदे याचने यती प्रयत्ने जनी प्रादुर्भावे यतोऽनाव इति स्वरार्थं जने र्यद्विधानं जन्यमिति रूपं तु एयतापि सिद्धं जनिवृद्धोश्चेति वृद्धि

॥अचो यत्॥ ॥अजंताद्धातोर्यत्प्रत्ययो भवति· तकारो यतोऽनाव इति स्वरार्थः गेयं· पेयं· चेयं· जेयं· अज्ग्रहणं किं· याव
ताहलंतात्स्यन्तं वस्यति अजंतभूतपूर्वादपि यथा स्यात्· दित्स्यं· धित्स्यं· तकिशसिचतियतिजनीनामुपसंख्यानं· तकि· तक्यं·
शसि· शस्यं· चति· चत्यं· यति· यत्यं· जनि· जन्यं· हनो वा वध च· वध्यं· घात्यं॥ ॥पोरदुपधात्॥ ॥पवर्गान्ताद्धातोर
कारोपधाद्यत्प्रत्ययो भवति· ण्यतोऽपवादः· शप्· शप्यं· लभ· लभ्यं· पोरिति किं· पाकं· वाक्यं· अदुपधादिति किं· कोप्यं· गो
प्यं· तपाकरणात्कालार्थं· आप्यं॥ ॥शकिसहोश्च॥ ॥शक्लृ शक्तौ· षह मर्षणे· अनयोर्धात्वोर्यत्प्रत्ययो भवति·
शक्यं· सह्यं॥ ॥
प्रतिषेधात् शंसिमपि केचित्स्मरंति तन्द्व्यंनराशंसं यदा श्वंच हनो वा वधश्चेति हंतेर्वा यत्प्रत्ययो भवति तत्संनियोगेन च वधादेशः।
वध्य इति तद्विर्तानो वा पुनरेवमभिद्ध्यनिवधमर्हतीति वध्यः दंडादिभ्य इति यत तयदितद्धितः समासोनप्राप्नोतिम्य मिवध्योमुसलव इति कृतिपुनः स
तिकर्तृकरणे कृता बहुलमिति समासः सिद्धो भवति। घात्य इति हनस्तोऽचिण्णलोरिति तत्वं हो हंतेर्ञ्णिन्नेष्विति कुत्वं॥ ॥पोरत्॥ ॥पाकं वाक्यमिति
चजोः कु घिण्यतोरिति कुत्वं कोप्यं गोप्यमिति कुप कोपने गुपू रक्षणे आप्यमिति आप्लृ व्याप्तौ एषु त्रिषु यतोऽनाव इत्याद्युदात्तत्वं न भवतीति स्वरित
एव तु भवति। ॥शकिसहोः॥ ॥शक्लृ शक्तावितिउपलक्षणमेतत् शक विभाषितो मर्षणे इत्यस्यापि ग्रहणं षह मर्षण इति ननु षह शक्त्यर्थ इत्यस्यैव
परस्मैपदिनो निरनुबंधकस्य ग्रहणं शसंनैव दोषः प्रत्ययविधिविषयत्वादनुनिरनुबंधकपरिभाषाया अस्तस्माद्द्वयोरपि ग्रहणं। अस्मेतु कृत्यल्युटो बहुलमिति

का॰प॰३॰
५१

गदमद॥ ॥अनुपसर्गेभ्य इति सूत्रे। अनुपसर्ग इति व्यस्तपयेन पंचम्यर्थे सप्तमीति भावः। अत एवोपसर्गादस्मोनुपसर्गस्तस्मिन्ननुपसर्गे उपपदे इत्यर्थो
न भवति एवं हि केवलेभ्यो न स्यात्। वदः सुपि क्यप् चेत्यत्र च सुबन्तग्रहणमनर्थकं स्यात्। अनुपसर्ग इति हि वर्त्तते तत्र न जिवपुक्तमाये नोपसर्गे सुबन्त
स्य सुबंतस्य ग्रहणं भविष्यति नियमार्थमिति। अनुपसर्गादेव यद्यथा स्यात् सोपसर्गान्मा भूदिति कथं तर्हि तेन तत्र भवे हि नियमस्येति प्रमाद्यादी
यं विनियाम्यमिति पाठः। एते न इति यलोपश्चर्यते इति व्याख्यातं। चरेराङि चागुराविति। सोपसर्गार्थं वचनं। आचर्यो देश इति गंतव्य इत्यर्थः। उपनेता
गुरुः॥ ॥अवद्यपण्य॥ ॥अवद्यमिति निपातस्य तद्इति वदेर्नञ्युपपदे वदः सुपि क्यप् चेति यत्क्यपोः प्राप्तयोर्यदेव यथा स्यात्। गर्ह्य एव च यथा स्या

॥गदमदचरयमश्चानुपसर्गे॥ ॥गद व्यक्तायां वाचि। मदी हर्षे। चर गतिभक्षणयोः। यम उपरमे। एतेभ्यश्चानुपसर्गे
भ्यो यत्प्रत्ययो भवति। गद्यं। मद्यं। चर्यं। यम्यं। अनुपसर्ग इति किं। प्रगाद्यं। प्रमाद्यं। यमेः पूर्वेणैव सिद्धे नियमार्थं वचनं। च
रेराङि चागुरौ। आचर्यो देशः। अगुराविति किं। आचार्य उपनेता॥ ॥अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु॥
॥अवद्य पण्य वर्या इत्येते शब्दा निपात्यन्ते गर्ह्य पणितव्य अनिरोध इत्येतेष्वर्थेषु यथासंख्यं। अवद्यमिति निपात्यते
गर्ह्यं चेत्तद्भवति। अवद्यं पापं। अनुद्यमन्यत्। वदः सुपि क्यप् च। पण्यमिति निपात्यते पणितव्यं चेत्तद्भवति। पण्यः कं
बलः। पण्या गौः। पाण्यमन्यत्। वर्येति स्त्रियां निपात्यते अनिरोधश्चेद्भवति। अनिरोधो प्रतिबंधः। शतेन वर्या। सहस्रे
ण वर्या। वृत्यान्या। स्त्रीलिंगनिर्देशः किमर्थः। वार्या ऋत्विजः॥ ५० ॥ ॥

दित्युभयार्थं निपातनं। अवद्यं पापमिति। अवदनार्हत्वात्। अनुद्यमन्यदिति गुरुनामादिः। तद्धि गर्ह्यं न भवत्यथ च वदनार्हमपि न भवति। अत्र अवे
भति यज्ञादित्वात्संप्रसारणं नलोपो नञः। तस्मान्नुडचि। यत्पण्यं व्यवहर्तव्यमिति। निपातनस्य रूढ्यर्थत्वात्। पण्यशब्दस्य तत्रैव रूढत्वात्। उक्तं च धा
तु साधनकालानां प्राप्त्यर्थं नियमस्य च। अनुबन्धविकाराणां रूढ्यर्थं च निपातनमिति। पाण्यमन्यदिति स्तुत्यमित्यर्थः। वर्येति स्त्रियां निपात्यत इति
सूत्रे वयादीनि अविभक्तिकानि एकवचनरूपाणि न तु टंटस्य जसंतनिर्देश इति भावः। शतेन वर्येति इह संभक्ता वित्यस्यार्थे निपातनं तत्रैवानिरोध स
भवात् वृत्यान्येति हजन्वाणोऽपि न तु ऋत्विक्सादिनाक प्रकार्यक्रि त्विजः इति स्तुशास्त्रिस्त्र हजो ग्रहणं स्तुत्वी। लिंगात् ह्लोपश्चैव

रा॰सं॰
५१

।।वह्यं करणं।। ।।वहेर्धातोः करणे यत्प्रत्ययो निपात्यत इति अर्थव्याख्यानमेतत् वह्यमिति निपात्यते करणं चेद्भवतीति वक्तुं युक्तं।। ।।अर्यः।। ।।स्वा
मिन्यन्तोदात्तत्वं चेति· अर्यर्योवैश्यः स्वामी च तत्र कथं उच्यते वैश्यस्यापि यायामाद्युदात्तत्वं स्वाम्याख्यायामन्तोदात्तत्वं तथाचार्यस्य स्वाम्याख्यायामिति फिट्सू
त्रे आख्याग्रहणं कृतं। आर्यो ब्राह्मण इति प्राप्तम इत्यर्थः।। ।।उपसर्या।। ।।उपपूर्वात्सर्त्तेरिति भ्वादिकस्य जुहोत्यादिकस्य च सर्त्तेर्ग्रहणं त्रिभि

।।वह्यं करणं।। ।।वहेर्धातोः करणे यत्प्रत्ययो निपात्यते· वहत्यनेनेति वह्यं शकटं· करण इति किं वाह्यमन्यत्।। ।।अ
र्यः स्वामिवैश्ययोः।। ।।ऋगतौ अस्मात् ण्यति प्राप्ते स्वामिवैश्ययोरभिधेययोर्यत्प्रत्ययो निपात्यते· अर्यः स्वामी· अ
र्यो वैश्यः· यतो ऽनाव इत्याद्युदात्तत्वे प्राप्ते स्वामिन्यन्तोदात्तत्वं च वक्तव्यं· स्वामिवैश्ययोरिति किं· आर्यो ब्राह्मणः।। ।।
उपसर्या काल्या प्रजने।। ।।उपसर्येति निपात्यते काल्या चेत्प्रजने भवति· उपपूर्वात्सर्तेर्यत्प्रत्ययः प्राप्तकाला काल्या·
प्रजनः प्रजननं प्रथमगर्भग्रहणं· गर्भग्रहणे प्राप्तकाला उपसर्या गौः· उपसर्या वडवा· काल्या प्रजन इति किं· उप
सार्या शरदि मधुरा।। ।।अजर्यं संगतं।। ।।अजर्यमिति निपात्यते संगतं चेद्भवति· जीर्यतेर्नञ्पूर्वात्संगते संगम
ने कर्तरि यत्प्रत्ययो निपात्यते· न जीर्यतीत्यजर्यं· अजर्यमार्यसंगतं· अजर्यं नो ऽस्तु संगतं· संगतमिति किं अज
रिता कंबलः।। ।।छ।। ।।

श्चेति निर्देशात् सृजादिहिंपिलुकादि दृष्टः। प्राप्तकाला काल्येति तदस्य प्राप्तमिति वर्तमाने कालाद्यदिति यत् प्रजननं प्रजनः भावे घञ् जनिवध्यो
श्चेति वृद्धिप्रतिषेधः उपसर्पणो गौरिति। गर्भधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः वृषभोपगमनस्य प्राप्तकालेति यावत् उपसार्येति उपसरणी
यामाप्रमित्यर्थः।। ।।अजर्यं।। ।।संगमने कर्तरीति सूत्रे संगतमिति नेष्टके भावे क्त इति दर्शयति कर्तरीति। तयोरेव कृत्यक्तखलर्था इति भा
वे मा भूदिति निपातनाश्रयणं तेन भावे संगतकर्तृके विशेषणे भवति अजर्यमार्यसंगतेनेति। अजरितेति तृच।। ।।छ।। ।।छ।। ।।

वदः सुपि॥ ॥अनुपसर्ग इति वर्त्तत इति सत्यपि द्वितीयादौ सूत्रे वक्ष्यति उपसर्गग्रहणं ज्ञापकमन्यत्र सुब्ग्रहणे उपसर्गग्रहणं न भवतीति तज्ज्ञापकस्य
तथैवाश्रयणीयं सुप्यजातौ स्थः शोनुदके क्विन्निसादावनुपसर्गग्रहणं मा भूदिति ततश्च नार्थ इहानुपसर्गग्रहणानुवृत्त्या सुबन्त उपपदे अनुपसर्ग इति य
द्यपि पूर्वं बहुव्रीहेः पञ्चम्यर्थे सप्तमीति व्याख्यातं इह तु विरोधाभावात्तत्पुरुषात्स्वार्थ एव सप्तमीति भावः ब्रह्माद्यमिति भावे क्यप् पूर्ववत्सम्प्रसारणं ब्रह्म वेदः
तस्य वदनमित्यर्थः कथं पुनः सकर्मकाद्भावे कृत्यप्रत्ययः पावतामावे चाकर्मकेभ्यः तयोरेव कृत्यक्तखलर्था इति वक्ष्यति न च कर्माविवक्षया कर्मकर्मक
त्वं ब्रह्मेति कर्मणः श्रुतत्वात् तस्मादुत्तरसूत्रादिह भावग्रहणमपेक्षणीयमित्याहुः॥ ॥भुवो भावे॥ ॥यत्तु नानुवर्त्तत इति पूर्वसूत्रे वानुकृष्टत्वा

वदः सुपि क्यप् च॥ ॥अनुपसर्ग इति वर्त्तते॥ वदेर्धातोः सुबन्त उपपदे अनुपसर्गे क्यप्प्रत्ययो भवति चकाराद्यच्च·
ब्रह्मोद्यं· ब्रह्मवद्यं· सत्योद्यं· सत्यवद्यं· सुपीति किं· वाद्यं· अनुपसर्ग इत्येव· प्रवाद्यं॥ ॥भुवो भावे॥ ॥सुप्यनुपसर्ग
इत्यनुवर्त्तते· भवतेर्धातोः सुबन्त उपपदे ऽनुपसर्गे भावे क्यप्प्रत्ययो भवति यत्तु नानुवर्त्तते· ब्रह्मभूयं गतः ब्रह्मत्वं ग
तः देवभूयं· देवत्वं भावग्रहणमुत्तरार्थं· सुपीत्येव· भव्यं· अनुपसर्ग इत्येव· प्रभव्यं॥ ॥हनस्त च॥ ॥सुप्यनु
पसर्ग इति वर्त्तते भाव इति च· हन्तेर्धातोः सुबन्त उपपदे ऽनुपसर्गे भावे क्यप्प्रत्ययो भवति तकारश्चान्तादेशः ब्रह्महत्या·
अश्वहत्या· सुपीत्येव· घातो वर्त्तते· यत्तु भावे न भवत्यनभिधानात्· अनुपसर्ग इत्येव· प्रघातो वर्त्तते॥ ५१ ॥

त्वं ननु तयोरेव कृत्यक्तखलर्था इति भावकर्मणोः कृत्या विधीयन्ते अनुपसर्ग इति वानुवर्त्तते अनुपसर्गश्च भवतिरकर्मक एवातः सामर्थ्याद्भावे भवि
ष्यति· ननु च प्राप्त्यर्थः सकर्मक एव सत्यं किन्निर्देशात् प्राथम्याच्च सत्तार्थस्यैव ग्रहणं न च कालादिकर्मणि प्रसङ्गः अनभिधानात् तत्किमर्थं
भावग्रहणमित्यत्राह भावग्रहणमुत्तरार्थमिति हनस्त चेति सकर्मकादपि हन्तेर्भावे यथा स्यात् ब्रह्महत्या वर्त्तत इति कर्मणि मा भूत् त्वया घात्यो वृषल
इति॥ ॥हनस्त॥ ॥ब्रह्महत्येति स्वभावतः स्त्रीलिङ्गत्वमस्य क्यबन्तस्य यथान्येषां भावे कृत्सानां नपुंसकत्वं छन्दसि तु क्यबन्तस्यापि नपुंसकत्वमि
ष्यते मनाद्देवकृतस्य हत्यापयजाविशेषे छन्दसि च स्त्रियां विहितः क्यपः अस्येव ब्रह्महत्या पेत्य तीयं परिग्रहाणोति घातो वर्त्तत इति किं पुनः कारणं घुजनसुदाहृ
यते न रायत्रित्यत आह यत्तु भावेन भवतीति। कर्माविवक्षायामकर्मकत्वे सप्तमीति भावः सकर्मकात्तु भावे यतः प्राप्तिरेव नास्ति॥ ५१ ॥ ॥

॥एतेस्तु॥ ॥एतीतितिपा निर्देशः किमर्थं धातोर्ग्रहणं यथा स्यादिवर्णान्तस्य मा भूदिति अत्र चेण एव ग्रहणं नेङिकोः तयोरधिपूर्वयोरेव प्रयोगाद्
ती तिनिर्देशानुपपत्तेः तथा च रक्षार्थं वेदानामध्येयं व्याकरणमिति भाष्ये यद्देवं प्रयुक्तः । केचित्तु स्वावद्विक इति वक्तव्यमिति वदन्तः धीयामातेसप्तु
शाहरन्ते स्तुत्य इति॰ ह्रस्वस्य तुक् । शिष्य इति । शास इदङ्हलोरिती त्वं शासिवसिघसीनां चेति षत्वं आङः शासु इच्छायामित्यस्यापि ग्रहणमपि ष्येष्वा
ततेनाशास्यमिति धातुसत्वेऽपि मध्योऽन्तत्वं पदं भवति एतिस्तुगतिकारकोपपदात्कृदिति अन्तस्वरितत्वं स्यात् । केचित्तु शासु अनुशिष्टावित्यस्यैव ग्र
हणमिच्छन्ति ओरावश्यके इत्यादि इह स्तुग्रहणमावकाशः आवश्यकाभिव्याप्त्या स्तुत्य इति ओरावश्यक इत्यस्यावकाशः अवश्यलाव्यमिति
अवश्यस्तुत्य इत्यत्रोभयप्रसंगे परत्वात् ण्यत् स्यात् पुनः क्यब्ग्रहणात् क्यबेव भवतीह ग्रहणे वृङो ग्रहणमिष्यते तेन वृङः इति ज्ञापकात्तयदयमीड

॥एतिस्तुशास्वृदृजुषः क्यप्॥ ॥सुप्यनुपसर्गेभाव इति निवृत्तं॰ सामान्येन विधानमेतत्॰ एतिस्तुशास्वृदृजुष इत्येतेभ्यः क्यप्प्रत्ययो भवति॰ इत्यः॰ शिष्यः॰ स्तुत्यः॰ आदृत्यः॰ जुष्यः॰ कब्विति वर्त्तमाने पुनः क्यब्ग्रहणं बाधनार्थं ओरावश्यके इति ण्यतं बाधित्वा क्यबेव भवति अवश्यस्तुत्यः॰ वृग्रहणे वृङो ग्रहणमिष्यते तेन वृङः॰ वार्या ऋत्विजः॰ शंसिदुहिगुहिभ्यो वेति वक्तव्यं॰ शस्यं॰ शंस्यं॰ दुह्यं॰ दोह्यं॰ गुह्यं॰ गोह्यं॰ आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानं॰ आज्यं घृतं॰ कथमुपेयं । एतेर्ण्यद्यनेन ॥ ॥छ॥ ॥

वंदह्रशांसदुहां ण्यत इति वार्त्तिकं शस्यादयुदात्तत्वं शास्तितत्र चेङिवं दृभ्यां साहचर्यादात्मनेपदिनो वृङो ग्रहणं शंसिदुहीत्यादि शंसु स्तुतौ दुह
प्रपूरणे गुहू संवरणे शस्यमिति कश्यपे उपधालोपः भाष्ये एतदुपसंख्यानेन दृष्टं आङ्पूर्वादिति । अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु आज्यमि
ति क्वसलुटो वक्तव्यमिति कर्णो अप्पूर्वविदुपधालोपः अथ कस्मादस्य त्येवोपधालोपो नोक्तः कुत्वप्रसंगात् निःत्वप्रसंगाच्च तस्मात्क्यबेव तदए
षः यद्येवमवग्रहः प्राप्नोति आज्यमित्यात्राज्यमिति अवग्रहस्य नाको दोषः नाहि लक्षणेन पदकारा अनुवर्त्याः किं तु पदकारैर्नाम लक्षणम
नुवर्त्त्यं पदविच्छेदो हि पौरुषेयः संहितैव तु नित्यात थावार्थनिश्चयाभावे नावग्रहस्तियथा हरिवरति किं हरिशब्द इकारान्त उत हरिच्छब्दस्तकारा
न्त इति संदेहात् कथमितिदीर्यइकारो येविभाषेत्यात्वबाधनार्थः ॥ एत्य ॥ इत्यादि एवेतद्रूपमिति सिभमानस्य

॥अदुपधात्॥ ॥ऋपिचृतीवर्जयित्वेति ऋदृशामर्थेच्चृतीहिंसाग्रथनयोः रूपेऽतत्वस्यासिद्धत्वाद् ऋकारलृकारयोः सवर्णसंज्ञाविधानाच्चात्र अदुप
धत्वं। कृतसंशब्दनेराण्देव भवतीति। अनिसराय ताम्बुरात्यइति णिजभावपक्ष इति भावः। इदमेव च तपरकरणे लिङ्गमनिसरण्यं ताम्बुरात्य इति
णिजन्तात् णिलोपे कृते चात्र नेचदित्यधिस्त्रामिति विधिदेव भवति या णिसर्ग्येति। पाणिभ्यां सृज्यत इत्युपपदसमासः पूर्ववत्कुत्वं एवं समवसर्ग्ये
त्यत्रापि॥ ॥इखनः॥ ॥दीर्घोच्चारणं किमर्थं न इखन इत्येवोच्येत दीर्घस्य ह्रस्वस्य वा आदेशे नास्ति विशेषः ह्रस्वादेशेषत्वं तु कोरसिद्ध इत्येका
देशस्यासिद्धत्वाद्बहुलाश्रयस्तु कस्मादिति चेत् नपरान्तपदाघोरेकादेशस्तु स्विधासिद्धः अन्यथा द्वयेनत्रमिति आवादुरणस्यासिद्धत्वाच्छेचेतिद्द

॥अदुपधायाश्चाकॢपिचृतेः॥ ॥अकारोपधाच्च धातोः क्यप् प्रत्ययो भवति कॢपिचृतीवर्जयित्वा। वृतु वृत्यं। वृधु वृध्यं। अकॢपिचृतेरिति किं। कल्प्यं। चर्त्यं। तपरकरणं किं। कृतसंशब्दने राय्यदेव भवति। कीर्त्यं। पाणौ सृजेर्ण्यः॥ ॥पाणिसर्ग्या रज्जुः। समवपूर्वाच्च। समवसर्ग्या॥ ॥इखनः॥ ॥खनेर्धातोः क्यप् प्रत्ययो भवति इकारश्चान्तादेशः। खेयं। दीर्घनिर्देशः प्रश्लेषार्थः। तत्र द्वितीय इकारो ये विभाषेत्यात्वबाधनार्थः॥ ॥५१॥ ॥

स्याश्रयो नित्यस्तु कस्यादित्यत आह दीर्घनिर्देश इत्यादि एतेन ह्रस्व एवात्र विधीयते न दीर्घ इति दर्शयति पूर्वं तु यथाश्रुताश्रयणेनोक्तम् ईकारस्या
तादेश इति तत्रेति प्रश्लेषे सति। ये विभाषेत्यात्वबाधनार्थ इति अन्यथा ये विभाषेत्यस्यावकाशः खायते खन्यते अस्य त्ववकाशः यस्मिन् पक्षे आत्वं ना
स्ति आत्वपक्षे उभयप्रसङ्गे परत्वादन्तरङ्गत्वाच्चात्वं स्यात् एतच्च ये विभाषेति विषयसप्तमीपक्षे उच्यते तदा हि यकारादौ बुद्धिस्थ एव भवदात्वमन्तरङ्गं
अयं त्विकारः क्यप्सह विधानाद्बहिरङ्गः परसप्तमीपक्षे त्विदमेव लभ्यं तारङ्गं परनिमित्तमनपेक्ष्य विधानात्॥ ॥५१॥ ॥छ॥ ॥ ॥

भृञः ॥ ॥भृञ्यर्थ्याः इत्यर्थ इति एतेन क्रियाशब्दत्वं दर्शयन् संज्ञात्वमपाकरोति संपूर्वाद्विभाषेति असंज्ञायामेव सूत्रेण नित्यं प्रसक्तस्य क्यपोऽयं विकल्पः प्राप्तवि
भाषेयमर्थः। संज्ञायामित्यादिः प्रतिषेधस्येति शेषः असंज्ञायामिति स एष प्रतिषेधस्य भार्या नाम क्षत्रिय इत्यत्र पुंसि दृष्टत्वात् स्त्रीत्वे तत्रार्थत्वान्न तेन सूत्रकारस्य भार्या शब्दः
सिध्यतीत्यर्थः पुंसि चरितार्थे हि प्रतिषेधे स्त्रियां क्यपा भावत्वम् ननु भार्याशब्दोऽपि संज्ञा अभिधीयमानापि हि भार्या भार्येत्युच्यते तत् कुतोऽस्य क्यप्प्रसंगः
न ह्यसौ नेन क्यपा भवितव्यमिति यत्तु संज्ञायामेव विधीयते संज्ञायां समजनिषद इत्यादिना तस्यात्र प्रसंगः न च तस्यापि प्रतिषेधसामर्थ्यान्निवृत्तिः पुंसि
प्रतिषेधस्य चरितार्थत्वात् इति चोद्यं उत्तरमाह स्त्रियां भावाधिकारोऽस्तीति। ननु संज्ञायां समजनिषद इत्यत्र च क्यप् इति भाव इति न स्मर्यते एवार्थो वि

॥भृञोऽसंज्ञायां॥ ॥भृञो धातोरसंज्ञायां विषये क्यप् प्रत्ययो भवति। भृत्याः कर्मकराः। भर्तव्या इत्यर्थः। असंज्ञा
यामिति किं। भार्या नाम क्षत्रियाः। संपूर्वाद्विभाषा। संभृत्याः। संभार्याः। संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिध्य
ति। स्त्रियां भावाधिकारोऽस्ति तेन भार्या प्रसिध्यति॥ ॥मृजेर्विभाषा॥ ॥मृजेर्धातोर्विभाषा क्यप् प्रत्ययो भ
वति। ऋदुपधत्वात् प्राप्ते विभाषेयं। परिमृज्यः। परिमार्ग्यः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

कार इति तथा समजेति तस्यामिति समज्यानिषदं तिजस्यामिति निषद्येत्यादि भवति तत्कथमिदमुच्यते स्त्रियां भावाधिकारोऽस्तीति नेदमपूर्वं चोद्यं
जिकार एव हि तत्र वर्तत इति कथं तदुक्तं स्त्रियां भावाधिकारोऽस्तीति स्त्रियां स्त्रीप्रकरणे संज्ञायां समजेत्यादिनापि विधीयमाने भावस्याधिकारः अभिधे
यभावे पामलक्षणो व्यापारो नित्यशब्दशक्तिस्वाभाव्यात् भाव एव तेन क्यप्प्रभवति न कर्मणि तेन भार्या प्रसिध्यतीति कर्मणीत्यभिप्रायः एकानुबन्धक
ग्रहणे न द्व्यनुबन्धकस्येति मृजं भरणाद्यस्यैव कार्यं वृद्धिः ग्रहणे न तु भृञ् धारणपोषणयोरित्यस्य अतस्तस्माद्धाम्भृञ् भरणाद्यस्मादीर्घोऽत्यद्वाभा
वीति प्रसिध्यतीति परिहारान्तरमप्यत्र संभवति॥ ॥मृजेः॥ ॥परिमार्ग्य इति मृजेर्वृद्धिः पूर्ववत्कृतं॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥राजसूय॥ ॥राज्ञासोतव्य इति। अभिषिक्तः क्षत्रियो राजा तेन सोतव्यः अभिषवद्वारेण निष्पादयितव्य इत्यर्थः कर्मणि क्यप् दीर्घत्वं च निपात्यते राज्ञा
वा इह सूयत इति। अत्र पक्षे लतात्मकः सोमो राजा। राजानं क्रीणातीत्यादौ दर्शनात् सुनोतिरत्राप्यभिषवे अधिकरणे क्यप् निपात्यते न रूपं यथा तेन ज्योतिष्टो
मादीनां भवति पूर्वस्मिन्नपि पक्षे श्वमेधादावतिप्रसंगः सूसर्त्तिभ्यामिति तिननुसर्त्तेरुत्वं सुवतेर्वा रुडागम इत्यभिधानादिकल्पोत्राभिप्रेत इति वार्थीभा
वाद्धि ह्यानुपपत्तेः भाष्यकारप्रयोगात्तु द्वन्द्वः प्रयुक्तं हि भाष्ये सूसर्त्तिभ्यां च सर्त्तेरुत्वं सुवतेर्वा रुडागम इति सर्त्तेरुत्वमिति दीर्घत्वं तु रपरत्वे सति हलि चे
ति वसिद्धं सुवतेर्वा रुडागम इति सुवतेरिति यच्च मी सुवतेः परस्य क्यप इत्यर्थः रुडागम इति पाठे षष्ठी सर्त्तेरिति आकारो सुवतीति प्रश्ने णी तुदादिः कर्म

॥राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः॥ ॥राजसूय·सूर्य·मृषोद्य·रुच्य·कुप्य·कृष्टपच्य·अव्यथ्य·इत्ये
ते शब्दाः क्यपि निपात्यन्ते· राज्ञा सोतव्यः राज्ञा वा इह सूयते राजसूयः क्रतुः। सूसर्त्तिभ्यां क्यप्· सर्त्तेरुत्वं· सुवतेर्वा रुडागमः
सरति सुवति वा सूर्यः· मृषापूर्वस्य वदतेः पक्षे यति प्राप्ते क्यप् निपात्यते· मृषोद्यं· रोचतेसौ रुच्यः कर्त्तरि क्यप्· गुपेरादि
कत्वं च संज्ञायां· कुप्यं· गोप्यमन्यत्· कृष्टे पच्यन्ते कृष्टपच्याः कर्मकर्त्तरि निपातनं· न व्यथते अव्यथ्यः॥ ॥भिद्योद्ध्यौ न
दे॥ ॥भिद्य उद्ध्य क्यप् निपात्यते नदेभिधेये· उद्ध्ये धत्वं च· भिनत्ति कूलं भिद्यः उज्झत्युदकं उद्ध्यः· नद इति किं· भेत्ता·
उज्झिता॥ ॥पुष्यसिद्ध्यौ नक्षत्रे॥ ॥पुषेः सिधेश्चाधिकरणे क्यप् निपात्यते नक्षत्रेभिधेये· पुष्यन्त्यस्मिन्नर्था इति पुष्यः
सिध्यन्त्यस्मिन्निति सिध्यः· नक्षत्र इति किं· पोषणं सेधनं ॥५२॥ ॥

णि लोकं प्रेरयतीत्यर्थः उदिते हि तस्मिन् क्रियासु लोकस्य प्रवृत्तिः कर्तृप्रत्ययेन कर्त्तरि निपातनं दर्शयति एवं रुच्याव्यथ्ययोरपि द्रष्टव्यं आह च सूर्यरु
च्याव्यथ्याः कर्त्तरीति। कुप्यमिति संज्ञायामेतदिष्यते सुवर्णरजतव्यतिरिक्तस्य धनस्येयं संज्ञा सर्वत्रातिप्रसंगो निपातनाश्रयेणापरिहार्यः कर्मक
र्त्तरि निपातनमिति। अन्तोदात्तत्वं चेति द्रष्टव्यं आह हि कृष्टपच्यस्यान्तोदात्तत्वं कर्मकर्त्तरि चेति शुद्धे तु कर्मणि कृष्टपाक्या इत्येव भवति॥ ॥पुष्य
सिद्ध्यौ॥ ॥पुष्यन्त्यस्मिन्नर्था इति आहृत्वा इति शेषः सिध्यन्त्यस्मिन्निति अत्राप्यर्था इत्यपेक्ष्यते पुष्यसिध्यशब्दौ पर्यायौ स्वरूपपरत्वात्तु सूत्रे द्वन्द्वः॥५२॥

॥ ॥विपूया॥ ॥विपूयो मुंज इति रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः॥ विनीयः कल्क इति कल्कशब्दोपमत्ति पिष्टमौषधं यस्य शुंठीसैंधवादिकस्य कल्कः पेषो निःसंभवं रोग ह्रयापेति तैले घृते वा औषधप्रक्षिप्य दूरीषं तत्रापि वर्त्तते पापे च प्रसिद्धः तयोन कल्को धयनेन कल्क इत्यादौ रहतु प्रथमस्य ग्रहणमिति केचित् विशेषेणोतिव यंत थाचमाघः प्रयुंक्ते अविनीयं संभ्रमविकासिभक्तिभिरिति जित्य इति॥ बले नाकृष्यः॥ कृष्टसमीकरणीयस्थलं काष्ठं हालिरित्युच्यते॥ ॥पद्वास्वैरि॥ ॥आसे रिणीति ईरप्रेरणे स्वयमेवेरितुं शीलमस्य इति ताच्छील्ये णिनिः स्वाङ्गे रेरणेरिति द्वि:

॥विपूयविनीयजित्या मुंजकल्कहलिषु॥ ॥विपूय॰ विनीय॰ जित्य॰ इत्येते शब्दा निपात्यंते यथासंख्यं मुंजकल्कहलिइत्येतेष्वर्थेषु वाच्येषु॰ विपूर्वात्पवतेर्नयतेश्च तथा जयतेर्यति प्राप्ते कर्मणि क्यप् निपात्यते॰ विपूयो मुंजः॥ विपाव्यमन्यत॰ विनीयः कल्कः विनेयमन्यत॰ जित्यो हलिः जेयमन्यत॰॥ ॥प्रत्यपिभ्यां ग्रहेश्छंदसि॥ ॥प्रति अपि इत्येवंपूर्वाद्ग्रहेः क्यप्प्रत्ययो भवति छंदसि विषये॰ मत्तस्य न प्रतिगृह्यं तस्मान्नापिगृह्यं॰ छंदसीति किं प्रतिग्राह्यं॰ अपिग्राह्यं॰॥
॥पदास्वैरिबाह्यापक्ष्येषु च॥ ॥पदे अस्वैरिणि बाह्यायां पक्ष्ये चार्थे ग्रहेर्धातोः क्यप्प्रत्ययो भवति॰ पदे तावत्॰ प्रगृह्यं पदं यस्य प्रगृह्यसंज्ञा विहिता॰ अवगृह्यं पदं यस्यावग्रहः क्रियते॰ अस्वैरी परतंत्रः गृह्यकाइमे॰ गृहीतका इत्यर्थः॰
बाह्यायां॰ ग्रामगृह्या सेना॰ नगरगृह्या सेना॰ ग्रामनगराभ्यां बहिर्भूतेत्यर्थः॰ स्त्रीलिंगनिर्देशादन्यत्र न भवति॰ पक्षे भवः पक्ष्यः॰ वासुदेवगृह्याः अर्जुनगृह्याः तत्पक्षमाश्रिता इत्यर्थः॥ ॥
बाह्यायामिति बाह्ये भवा बहिसः टिलोपश्चेति यञ् टिलोपो पक्षे भवः पक्ष्यः दिगादित्वाद्यत् यस्य प्रगृह्यसंज्ञा विहितेति न तु पदावयवस्य द्विवचनादेः प्रगृह्यसंज्ञा न तु पदस्य संयोगिकस्तत्पदशब्दः प्रयतेऽग्न्यते अनेनार्थ इति यद्वा प्रातिशाख्ये द्विवचनं तपद एव प्रगृह्यशब्दः प्रसिद्धः स निकर्षोत्र गृह्यते र्थः स्वसंभवाभावाद्वग्री इत्यादौ क्रियतापि कालेन व्यवधानात्परस्परं संयोगे सं निकृष्यते अवगृह्यमिति समासे पूर्वपदं तत्र हि पदकाले अवग्रहो विच्छेदः गृह्यकाइमे गृहीतका इत्यर्थ इति उभयत्रानुकंपायां कन् यंजादिबंधेन परतंत्रीकृताः शुकादय उच्यंते ग्रामगृह्येति होपल क्षणायाः षष्ठ्याः

॥विभाषा॥ ॥कृष्यमिति कृषु सेचने॥ ॥युग्यं च॥ ॥पतत्यनेनेति पत्रमिति दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ष्ट्रन् तदन्ततिरथ युग्यप्रासंगमितिप्रा गीमती पनेनैवयत्नासिद्धं स्वरे विनास्ति भेदः काविषातु स्वरः यत्स्विय तो नावइत्याद्युदात्तत्वं अयुग्यमित्यत्रापि न स्वरे भेदः ययतोश्चातदर्थे इति सोकषायुवात्रोगरयश्चेमुभयत्रांतोदात्तविधानात्॥ ॥अमावा॥ अमाशब्दः सहार्थे वर्त्तत इति। अमा सह वसतोऽस्मिन् दर्शनात्। तस्मिन्नुपपद इति। उपपदत्वमपि निपातनादेव अमेति वा समममव्ययकाम निर्देशः तकारो वा सूत्रात्मकृतस्य कायस्ता वन्निपातनेन भवति यदि तु परमप्रकृतत्वस्य पतो निपातनं स्यात्तदा विशेषः स्यादिति समतिव स्याद्रेयतो नावइत्याद्युदात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वे यिष एव स्वरो व निष्टेत एव पतित्वं तस्य इति लंभ

॥विभाषा कृवृषोः॥ ॥कृञो वृषश्च विभाषा क्यप्प्रत्ययो भवति· करोतेर्ण्यति प्राप्ते वर्षतेः ऋदुपधत्वान्नित्ये क्यपि विभाषारभ्यते· कृत्यं· कार्यं· वृष्यं वर्ष्यं·॥ ॥युग्यं च पत्रे॥ ॥युग्यमिति निपात्यते पत्रं चेद्भवति· पतत्यनेनेति पत्रं वाहनमुच्यते· युग्यो गौः युग्योऽश्वः· युग्यो हस्ती· युजेः क्यप् कुत्वं च निपात्यते· पत्र इति किं· योग्यमन्यत्॥ ॥अमावस्यदन्यतरस्याम्॥ ॥अमाशब्दः सहार्थे वर्त्तते· तस्मिन्नुपपदे वसेर्धातोः कालेऽधिकरणे ण्यत्प्रत्ययो भवति तत्रान्यतरस्यां वृद्ध्यभावो निपात्यते·॥ ५४ ॥ ॥छ॥ ॥

वतितथायताद्युक्ते अमावास्येत्यधिकरणे ण्यत्प्राप्नोति कृत्यल्युटो बहुलमिति भविष्यति एवमप्युपपदसमासो न प्राप्नोतिमयूरव्यंसकादित्वाद्भविष्यति एवमपि गतिकारकोपपदात् कृदिति स्वरो न प्राप्नोति तथा अमावास्यायां वेति ण्यत्प्रत्ययकार्यं तद्यदंतस्याभावस्मशब्दस्य न स्यात् भिन्नत्वादिति यदंतपक्षे सेषं दृष्टुः प्रकृतस्यापि ण्यत एव निपातनमित्याह ण्यत्प्रत्ययो भवतीति किं तर्हि उच्यते ण्यत्प्रत्ययो भवतीति न पुनः ण्यत्प्रत्ययो निपात्यत इति ससंसवार्थः निपातनाच्यन्प्रत्ययो भवतीत्यर्थः अन्यतरस्यां वृद्ध्यभावो निपात्यत इति। ण्यत्प्रत्ययो नित्यः वृद्ध्यभावस्तु पाक्षिक इत्यर्थः॥ ॥५४॥ ॥

॥सह वसत इति संनिकृष्टौ वसत इत्यर्थः। यदुक्तं ण्यदसौ निपात्यत इति तत्रायं गुणः अस्या हि एकदेशविकृतस्यानन्यत्वादिति ण्यत्येव तिष्ठत्यमावास्येति ख
तः प्राप्तं रूपं द्वे अमावस्या तु तस्य विकार इति भावः यद्यप्येवं ण्यति ह्रस्वीकृतयोः प्रसिद्धः स्यात्तथापि निपात्यते स एव ह्रस्व अमावस्या उक्तः एवं श्लोकेऽप्यवृद्धितामिति कि
मत्र निपात्यत इत्याशङ्काऽपाश्लोकः अमावसोरित्यादि ह द्विभावाभावकृततद्विशेषाश्रयो द्विवचननिर्देशः निपातयामीति एकस्येवेति शेषः अमापूर्वयो

सह वसतोऽस्मिन्काले सूर्याचन्द्रमसाविति अमावास्या· अमावस्या· एकदेशविकृतस्यानन्यत्वादमावास्यायां वेत्यत्रामावस्या
शब्दस्यापि ग्रहणं भवति· अमावसोरहं ण्यतो निपातयाम्यवृद्धितां· तथैकवृत्तिता तयोः स्वरश्च मे प्रसिध्यति॥ ॥छन्दसि निष्ट
र्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि॥
॥निष्टर्क्यादयः शब्दाश्छन्दसि विषये निपात्यन्ते प्रकृतिप्रत्ययलक्षणानुपपन्नं तत्सर्वं निपातनात्सिद्धं· निष्टर्क्य इति कृती छेदने इ
त्यस्मान्निस्पूर्वात्क्यपि आद्यन्तविपर्ययश्च निसश्च षत्वं निपात्यते· निष्टर्क्यं चिन्वीत पशुकामः· देवशब्दे उपपदे
ह्वयतेर्जुहोतेर्वा क्यप् दीर्घश्च तुगभावश्च· देवहूयः· प्रपूर्वादुत्पूर्वाच्च नयतेः क्यप्· प्रणीयः· उन्नीयः· उत्पूर्वाच्छिषेः क्यप्· उ
च्छिष्यं· मृङ् प्राणत्यागे· स्तॄञ् आच्छादने· ध्वृ हूर्छने· एतेभ्यो यत्प्रत्ययः· मर्यः· स्तर्या स्त्रियामेव निपात्यते· ध्वर्यः· खनेर्यत्·
खन्यः· एतस्मादेव ण्यत्· खान्यः· देवशब्दे उपपदे यजेर्यत्· देवयज्या स्त्रीलिङ्गं निपात्यते· आङ्पूर्वात्पृच्छेः क्यप्· आपृच्छ्यः।
प्रतिपूर्वात्सीव्यतेः क्यप् षत्वं च· प्रतिषीव्यः। ब्रह्मण्युपपदे वदेर्ण्यत्· ब्रह्मवाद्यः। भाव्यः स्ताव्यः· भवतेः स्तौतेर्ण्यत् आवादेश
श्च भवति· उपपूर्वस्य चिनोतेर्ण्यत् आयादेशो· उपचाय्यपृडं· पृडे चोत्तरपदे निपातनमेतत्॥ ॥

र्वसोर्निपात्यतयोर्मध्ये एकस्य वृद्ध्यभावमहं निपातयामीत्यर्थः सूत्रकारेणैव समापन्नस्यैतद्वचनं तथा सति किं सिद्धमित्यत्राह तथेति एकान्तादितर
त्रैकदेशविकृतस्यानन्यत्वात् एतयोरेकवृत्तित्वं सिध्यतीत्यर्थः स्वरश्च मे प्रसिध्यतीति ण्यतं निपातयतो मम स्वरोऽपि सिध्यतीति आख्यातः स्वरः॥ ॥
छन्दसि॥ ॥तुगभावश्चेति पदाज्जुहोतेस्तदेतिभावः उपचाय्यपृडमिति निम उस्तुवे ह उचरस्येतस्मादिग्रुपधलक्षणः कः उपचाय्यं चतस्थं चेति कर्म

का॰ प॰
५६

॥हिरण्ये चेति वक्तव्यमिति हिरण्ये भिधेय इत्यर्थः अत्ययमिति आद्यंत विपर्यास इत्यर्थः रायदेकस्मादिति एकस्माद्धातो रायेत्प्रत्ययो निपात्यते तद
न्तरेषु देव ह्यादिषु चतुर्षु चतुर्भ्यो धातुभ्यः कप्रत्ययो निपात्यते उपसर्गभेदान्न्ययतेर्भेदः क्षेमायाविति द्वाभ्यां धातुभ्यां डो मप्रत्ययो निपात्यते इत्यर्थः रायदि
षिश्चनु रिति सुज्ञंतमेतत् क्रियाप्रधानत्वात् गोचिचतुरेवारायरिक्षीयत इत्यर्थः ॥ ॥ आह लोः ॥ ॥ अवर्णान्ता दिति अत्तेस्तु ग्रहणं न भवति
हलात्ताह चाघाति यरंकार्यमिति निर्देशात् ईडवंदवृञ्‌शसदुहांण्यत इति लिंगाच्च ॥ ॥ ओरावश्यके ॥ ॥ अवश्यं भाव आवश्यकमिति मनो
ज्ञादित्वाद्वुञ् अव्ययानां भमात्रे टि लोपः किंपुनरवश्यार्थ व्याचिन्युपपदे प्रत्यय आहोस्विदावश्यके घोत्ये तत्राद्ये पक्षे उपपदे श हि तात्प्रत्ययो

॥ हिरण्य इति वक्तव्यं हिरण्याद्यन्यत्र उपचेयपृष्ठमेव निष्टर्कोव्यत्ययविधानात् अत्यं निपातनात् रायदायादेशस्त्यो
नात्वुपचाय्ये निपातितो रायदेकस्माच्चतुर्भ्यः कप्रत्ययस्तुर्भ्यश्चयतो विधिः रायदेकस्मा घञावश्च क्षेमप्रियमरोयरोपयोहिषि
श्वनुः ॥ ॥ आह लोर्ण्यत् ॥ ॥ पंचम्यर्थे षष्ठी अवर्णान्ता द्धातो हलंता च्च ण्यत्प्रत्ययो भवति कार्यं हार्यं वाम्यं
पाक्यं ॥ ॥ ओरावश्यके ॥ ॥ अवश्यंभाव आवश्यकं उवर्णान्ताद्धातोर्ण्यत्प्रत्ययो भवत्यावश्यके घोत्ये य
लोपवादः लाव्यं पाव्यं आवश्यक इति किं लव्यं आवश्यके घोत्य इति चेत्स्वरसमासानुपपत्तिः अवश्यला
व्यं अवश्यलाव्यं अवश्यपाव्यमिति नैष दोषः मयूरव्यंसकादित्वात्समासः उत्तरपदप्रकृतिस्वरेच यत्नः क

ए॰ म॰
५६

नस्यात् लाव्यं पाव्यमिति तस्माद्द्वितीयः पक्ष आश्रीयत इत्याह आवश्यके घोत्य इति स्वरसमासानुपपत्तिरिति उपपदस्य सेउपपदसमासो लभ्य
ते गतिकारकोपपदात् कृदित्युत्तरपदप्रकृतिस्वरत्वं च घोत्यपक्षे तदुभयमपि न सिध्यतीत्यर्थः अवश्यलाव्यमिति लुंपेदवश्यमः कृत्ये इति मलोपः घो
तितार्थस्यापि क्वचित्प्रयोगो दृश्यते लाघवं प्रस्तावादगतत्वेन स्त्रवक्तव्यं लुंपेदवश्यमः कृत्ये इति वचनादेव घोतिते अवश्यमः प्रयोग इति तस्या
वश्यकत्वं व्याहोचक्षितार्थत्वात् मयूरव्यंसकादित्वादिति तस्याकृतिगणत्वादिति भावः उत्तरपदप्रकृतिस्वरत्वे चेति मयूरव्यंसकादिनिपातना
देव स्वरोपि भविष्यतीत्यपि शाकंवर्क्कं ॥ ५५ ॥ ॥

॥आसुयु॥ ॥युग्रस्मतीनां छेदेन आसुनोतेर्ह्रस्वाउः सुनोतेरभिसंबंधस्तदाह आङ्पूर्वात्सुनोतेरिति सुग्रसवेष्वर्यर्योपि सप्तत्वग्रहणं कृत्सत्पुटोब
हुलमिति युइति युमिश्रणइत्यस्य ग्रहणं युजबंधनइत्यस्य तु मानुबंधकत्वादग्रहणं घंतोपयादइति अचो यत् योरदुपधादिति यथायोगं प्राप्तस्य ण्य
मितिहृमेर्ध्रुतुष्पहितस्यापि चुरादौ बहुलमेतन्निदर्शनमिति वचनाच्छिष्टप्रयोगाच्च क्षपयपसर्थयसवधीरयस्याटिकाद्युतुलं द्रष्टव्यं॥ आनाय्यः॥ ॥
हृदिरेषेति तेन घटादावाग्निमग्नोनोद्भावनीय इति भावः निपातनाद्वृद्धि त्वं उक्तं हि हृदायार्थं च निपातनमिति कुतः पुनरनित्यत्वमिस्यत्राह तस्य चानित्यत्व
मिति नित्यमजागरणादिति मतं तत्र ज्वलनादित्यर्थः ज्वलनमेव हितस्य जागरणं दक्षिणाग्नावपि विशिष्ट एवेष्यते न सर्वत्रैवेति दर्शयति यश्चेति योनि

॥आसुयुवपिरपिलपित्रपिचमश्च॥ ॥आङ्पूर्वात्सुनोतेः युवपिरपिलपित्रपिचम इत्येतेभ्यश्च ण्यत्प्रत्ययो भवति यतोपवादः आ
साव्यं याव्यं वाप्यं राप्यं लाप्यं अपत्राप्यं आचाम्यं अनुक्तसमुच्चयार्थश्चकारः दभि दाभ्यं॥ ॥आनाय्योनित्ये॥ ॥आनाय्य
इति निपात्यते अनित्ये भिधेये नयतेराङ्पूर्वाण्ण्यत् आयादेशश्च निपात्यते आनाय्यो दक्षिणाग्निः रूढिरेषा तस्मादनित्यविशेषे दक्षिणा
ग्नावेवावतिष्ठते तस्य चानित्यत्वं नित्यमजागरणात् यश्च गार्हपत्यादानीयते सहैकयोनित्वात्तत्र निपातनं दक्षिणाग्निमात्रे तस्य
हियो निर्विकल्प्यते वैश्यकुलादिवाहृतो भ्राष्ट्राद्वा गार्हपत्याद्वेति आनाय्योनित्य इति चेद्दक्षिणाग्नौ कृतं भवेत् एकयोनौ तु तं
विद्याद्दानेयोन्यस्तथा भवेत्॥ ॥प्रणाय्योऽसंमतौ॥ ॥अविद्यमाना संमतिरस्मिन्नित्यसंमतिः संमननं संमतिः संमतता पूजा प्रणा
य्य इति निपात्यते संमतावभिधेये प्रणाय्यश्चौरः असंमताविति किं प्रणेयोमोन्यः यद्येवं कथमेतत् ज्येष्ठाय पुत्राय पिता ब्रह्म प्र
ब्रूयात्प्रणाय्यायान्तेवासिने नान्यस्मै कस्मै चनेति संमतिरभिलाषोप्युच्यते तदभावेन निष्कामतया असंमतिरन्तेवासी भवति तस्मै
११ निष्काममायमो श्राद्धीयतमानायान्तेवासिने प्रणाय्याय ब्रह्म ब्रूयादिति प्रयुज्यते॥ ॥

हृत्सन्निस्थानं वैश्यकुलादित्यादिना पौ निर्विकल्पं दर्शयति आनाय्योऽनित्य इति चेदिति घटादिष्वपि प्रसंग इति शेषः भवेदिति संभावने लिङ् निपात
नादेव संभाव्यत इत्यर्थः एकयोनाविति आहवनीयेन आनेयोन्यथा भवेदिति घटादावनित्येभिन्नयोनौ च दक्षिणाग्नावप्यत्रोपयादिति यदेव मत्तोत्यर्थः॥
॥प्रणाय्य४॥ ॥असंमताविति बहुव्रीहिरित्याह अविद्यमानास्य संमतिरस्मिन्निति संमतिश्चात्र संमननं प्रीतिविषयभावोपगमनं कर्मव्यापारो विव
क्षितेन संमतस्य व्यापारः तथा सत्यसंमतेति निपातनप्रसंगात् तस्माद्वा निष्ठाविदित्यभिप्रायेणाह संमतास्य संमतिरिति संमतिरभिलाषोप्युच्यत इति भोगावि
षयोप्यादरः संमतिशब्देनोच्यते तन्नेत्यर्थः॥ ॥

॥पाय्यसांनाय्य॥ ॥मीयतेनेनेतिमानंलक्ष्यतइतिहविः निवसंत्यस्मिन्निति निवासः समिध्यमाधानीऋक् सामिधेनी माङोपात्प्रत्ययइतिकरणेत
त्रआतोयुक्चिण्कृतोरितियुक् मेयमन्यदितिभावकर्मणोर्यदेवभवतीत्यर्थः सान्नाय्यमितिसम्पूर्वान्नयतेर्ण्यत्संप्रतीतिकर्मणिण्यत् हविर्वि
शेषइति ऐंद्रंदध्यमावास्यायामैन्द्रं पयो मावास्यायामितिविहितयोर्दधिपयसोः सान्नाय्यशब्दोहीहविर्मात्रेप्रायुं कुतमयमवलीढेसोध्व
सान्नाय्यमितिचिरिति निचीयतेस्मिन्धान्यादिकमितिअधिकरणेण्यत् धाय्येतिधीयतेनयासमिदितिकरणेण्यत् एवंवधुकं अपिशेषस्येतिभावः

॥पाय्यसांनाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु॥ ॥पाय्यादयः शब्दानिपात्यंतेयथासंख्यंमाने
हविषिनिवासेसामिधेन्यांचाभिधेयायां पाय्यइतिमाङो ण्यत्प्रत्ययआदेः पत्वंचनिपात्यतेमाने पाय्यंमानं मे
यमन्यत् संपूर्वान्नयतेर्ण्यदायादेशउपसर्गदीर्घत्वंचनिपात्यते सान्नाय्यंहविः सन्नेयमन्यत् रूढित्वाच्चह
विर्विशेषएवावतिष्ठते निःपूर्वाच्चिनोतेर्ण्यदायादेशआदिकुत्वंचनिपात्यते निकाय्योनिवासः निचेयमन्यत् धा
ञोण्यदायादेशोनिपात्यतेसामिधेनीचेत्साभवति धाय्यासामिधेनी धेयमन्यत् सामिधेनीशब्दऋग्विशे
षस्यवाचकः तत्रचधाय्येतिनसर्वासुसामिधेनीषूच्यतेकिंतर्हिकासुचिदेव रूढिशब्दोयंयेनतथाचसामिधेन्यामपि
दृश्यतेधाय्याः शंसतिअग्निर्नेतात्वंसोमक्रतुभिरिति॥ ५६ ॥

जात्प्रभिघवदृस्यादिकस्यकिंतर्हिकासुचिदेवेतिसमिध्यमानवतीसमिद्धवतीचांतरेणविकृतिषुप्रक्षिप्यमाणाष्ट्युपाजात्प्रमर्स्यदृस्यादिकाकथंपुनरयं
विशेषोलभ्यतइत्याहरूढिशब्दोयमितिअतएवनिपातनमाश्रयणमितिभावः रूढित्वमेवद्रढयतितथाचेतिधाय्याः शंसतीतिजोतिष्टोमेमरुत्वती
येशस्त्रेविधानमेतत् सामिधेयनीग्रहणंप्रयोगविषयोपलक्षणार्थमितिभावः॥ ॥५६॥ ॥७॥ ॥७॥ ॥७॥ ॥

॥ क्रतौ कुण्ड॰॥ ॥ एयतिप्रकृतेर्यत्प्रत्ययान्तः कुण्डपाय्यशब्दो निपात्यत इत्युक्तं तत्र प्रयोजनमाह यतोऽनाव इतीति यद्युत्तरपदस्याद्युदात्तत्वं कृद्युत्तरप
दप्रकृतिस्वरेण एष एव स्वरः सिद्धो भवतीत्यर्थः। णयति तु स्वरितत्वं स्यात्॥ ॥ अग्नौ॥ ॥ अग्नाविति निर्ज्वलने कितं हितं दर्थ इष्टिकाचयनविशेषे तत्रैव रू
ढत्वात्। इह संपूर्वाद्वूहवितर्के इत्यस्मादनेकार्थत्वाद्धातोरर्थे वर्तमानाद्ध्यलन्तत्वात् णयति समूह्यमिति सिद्धं तथा च समूह्यं चिन्वीत पशुकामः पशवो वै पु

॥ क्रतौ कुण्डपाय्यसंचाय्यौ॥ ॥ कुण्डपाय्य संचाय्य इत्येतौ शब्दौ निपात्येते क्रतावभिधेये· कुण्डशब्दे तृतीयान्त उपप
दे पिबतेर्धातोरधिकरणे यत्प्रत्ययो निपात्यते युक् च कुण्डेन पीयतेऽस्मिन् सोम इति कुण्डपाय्यः क्रतुः यतोऽनाव इति स्वरः संपूर्वा
च्चिनोतेर्ण्यदायादेशो निपात्येते· संचीयते सोमोऽस्मिन् संचाय्यः क्रतुः। क्रताविति किं· कुण्डपानं· संचेयः॥ ॥ अग्नौ परिचाय्योप
चाय्यसमूह्याः॥ परिचाय्य उपचाय्य समूह्य इत्येते शब्दा निपात्यन्ते अग्नावभिधेये· परिपूर्वादुपपूर्वाच्च चिनोतेर्ण्यदायादेशौ नि
पात्येते· परिचाय्यः उपचाय्यः संपूर्वाद्वहेः संप्रसारणं दीर्घत्वं च निपात्यते· समूह्यं चिन्वीत पशुकामः अग्नाविति किं परिचे
यं· संचाय्यं॥ ॥ चित्याग्निचित्ये च॥ ॥ चित्यशब्दोऽग्निचित्याशब्दश्च निपात्यते· चीयतेऽसौ चित्योऽग्निः अग्निचयनमेवाग्निचि
त्या भावे यप्रत्ययस्तुक् च निपात्यते· तेनान्तोदात्तत्वं भवति· अग्नावित्येव चेयमन्यत्॥ ॥ ण्वुल्तृचौ॥ ॥ धातोरि
त्येव वर्तते· सर्वधातुभ्यो ण्वुल्तृचौ प्रत्ययौ भवतः· कारकः कर्ता· हारकः हर्ता· चकारः सामान्यग्रहणाविघातार्थः। तुम्
इति· तुरिष्टेमेयस्विति·॥ ॥छ॥ ॥

इषः पशुकामेनाग्नौ संचिते समूह्य इतीति विवक्षार्थेनो हि तावत्प्रसारणे समूह्यशब्दो निरुक्तः॥ ॥ चित्याग्नि॥ ॥ चित्योऽग्निरिति कर्मणि यद्यपवादः यत्प्रनिपात्यते ते
नाद्युदात्तत्वं भवति भावे यकारप्रत्यय इति· किमर्थं पुनरत्रापि न बेवन निपातितः एवं हि तुक् न स्यात् न भवतीत्याह तेनान्तोदात्तत्वं भवतीति अग्नावित्ये
वेति तत्र चित्यशब्द इत्येव विशेषणार्थेनाग्निचित्याशब्दस्य भावे निपातितत्वात् तदेतद् इष्टिं चेयमन्यदिति॥ ॥ ॥ ॥

॥नंदिग्रहि॥ ॥आदिशब्दः प्रत्येकमभिसंबध्यत इति गणत्रयपाठादिति भावः। अपोद्धृत्य प्रकृतयो निर्दिश्यंते इति। तेन ल्युंतस्तत्र चयः। आपोद्धृत्येति तु आपृथ
क्कृत्येत्यर्थः। किमर्थं पुनरपोद्धृत्य प्रत्ययविधानं शब्दतानंदनादीनां गणपाठादेव सिद्धं साधुत्वं उच्यते अस्मिन्नसति नष्टाभ्यां क्वचिदप्यनुपयोगाद्द्
र्गणत्रयपाठो नार्थो भवतीत्येतन्नंदिवाशीत्यादि। टुनदि समृद्धौ· वाशृ शब्दे· मदी हर्षे· दुष वैकृत्ये· राध साध संसिद्धौ· वृधु वृद्धौ· शुभ शुंभ शोभार्थे·

॥नंदिग्रहिपचादिभ्यो ल्युणिन्यचः॥ ॥आदिशब्दः प्रत्येकमभिसंबध्यते। त्रिभ्यो गणेभ्यस्त्रयः प्रत्यया यथा
संख्यं भवंति· नंद्यादिभ्यो ल्युः· ग्रहादिभ्यो णिनिः· पचादिभ्योऽच्· नंदिग्रहिपचादयश्च न धातुपाठतः संनिविष्टा गृह्यंते·
किं तर्हि नंदनरमण इत्येवमादिषु प्रातिपदिकगणेषु अपोद्धृत्य प्रकृतयो निर्दिश्यंते· नंदिवाशिमदिदूषिसा
धिवर्द्धिशोभिरोचिभ्यो ण्यंतेभ्यः संज्ञायां नंदनः। वाशनः। मदनः। दूषणः· साधनः· वर्द्धनः· शोभनः· रोचनः· स
हितपिदमः संज्ञायां· सहनः· तपनः· दमनः· जल्पनः· रमणः। दर्पणः· संक्रंदनः· संकर्षणः· संहर्षणः· जना
र्दनः· मधुसूदनः· यवनः· विभीषणः· लवणः· निपातनात्णत्वं· चित्तविनाशनः· कुलदमनः· इति नंद्यादिः ५७

रुच दीप्तौ· दूषणा इति दोषो णाविति ल्युत्वं· सहितपीत्यादि· षह मर्षणे· तप संतापे· शमु दमु उपशमे· जल्पन इत्यादि· जल्प व्यक्तायां वाचि· रमु क्रीडा
यां· दृप हर्षविमोचनयोः· क्रदि आह्वाने रोदने च· कृष विलेखने· हृषु अलीके· अर्द हिंसायां· जनमर्दयतीति जनार्दनः· कर्मण्युपपदे एव मुत्तरत्रा
पि कर्मण्युपपदे द्रष्टव्यं· युमिश्रणे· षूद क्षरणे· मधुर्नामासुरः तं सूदयतीति मधुसूदनः। ञिभी भये· णिचि भियो हेतुभये षुक्· लूञ् छेदने· णश अदर्श
ने· दमु उपशमे· ण्यंतौ चित्तं नाशयतीति चित्तनाशनः· कुलं दमयतीति कुलदमनः ५७

ग्राहीत्यादि· ग्रह उपादाने· षह मर्षणे· तसु उपक्षये दसु च· मस्मसु मत्सीमर्षणे· तिष्ठतेर्णातोयुक् · मत्रि गुप्तभाषणे चुरादिः अर्द हिंसायां· रक्षे-
त्यादि· रक्ष पालने· श्रु श्रवणे· टुवप् बीजसंताने· ज्वल न कारणे· एषां निरुपपदे णिनिः· पाची त्यादि· डु याचृ याञ्चायां· हृञ् हरणे· व्रज गतौ·
वद व्यक्तायां वाचि वस निवासे· एषां प्रतिषिद्धानां णिनिर्भवतिप्रतिषिद्धार्थोनामिसर्थः प्रतिषिद्धार्थता च नञ् पूर्वाणां भवतीति दर्शयति अया-
चीत्यादि· पचयिवि शद्धोपि तिगर्हभराथी रसादौ प्रतिषेधे दृष्टः यानामादिम्नां तु विपूर्वाणां णिनिर्नदृश्यत इति नञ्येव णिनिर्विज्ञायते· अचामित्ये-
दि। अज्ञे तावां धातूनामचित्तकर्तृकाणां प्रतिषिद्धार्थानां णिनिर्भवति न विधते चित्तमस्येत्यचित्तः सकर्तायेषां ते तथोक्ताः विशायी विषयीति· शीङ्

ग्राही· उत्साही· उद्दासी· उद्भासी· स्थायी· मंत्री· संमर्दी· रक्षः श्रुवपज्वलां नो· निरक्षी· निश्रावी· निवापी· निशायी· याच्
व्याहृ संव्याहृव्रज वदवसां प्रतिषिद्धानां· अयाची· अव्याहारी· अव्राजी· अवादी· अवासी अचामचित्तकर्तृकाणां
प्रतिषिद्धानामित्येव· अकारी· अहारी· अविनायी· अविशायी· विशयी विषयी देशे· अभिभावी भूते· अभिभावी·
अपराधी· उपरोधी· परिभावी· परिभवी· इति ग्रहादिः पच वच वपि वद चल पत नदट् भषट् प्लवट्
चरट् गरट् तरट् चोरट् ग्राम· क्षप· सूरट् देवट् सेक कोप मेष मेध नर्त व्रण दर्श सर्प जारभरः श्वपचे ॥ ॥

श्वप्ने षिद्दबंधके ह्रस्वभावो निपातनात्· अभिभावी भूत इति अभिभूतवानभिभावी· अपराधी अपरोधी राध साध संसिद्धौ· रुधिर् आवरणे· परिभवी
परिभावीतियक्षे ह्रस्वभावः पचेत्यादिडु पचष् पाके· वचपरिभाषणे डु वपिहकार्यः एवं वदिश्यपि· चल कंपने· पत्लृ गतौ· नदट् इति· नदअव्यक्ते शब्दे·
टकारो ङीबर्थः एवमुत्तरत्रापि· भष भर्त्सने· प्लुङ् गतौ च रायसर्थः गरनिगरणे· तृप्लवनतरणयोः चुरस्तेये· दिवु क्रीडादौ· सदिहकार्थः ज बधये
हानौ· सृङ् प्राणत्यागे· क्षमूष सहने· षिवु तंतु संताने· मिष स्पर्द्धायां· कुप क्रोधे· मिधृ मेधा हिंसयोः व्रण गात्रचूर्णने चुरादिः नृत गात्रविक्षेपे·
दृशिर् प्रेक्षणे· सृप्लृ गतौ· डु भृञ् धारणपोषणयोः जारंबिभर्तीति जारभरः श्वानं पचतीति श्वपचः अङ्कादिषु श्वपाक शब्दस्य पाठस्य क्षेकर्मण्य
णपि भवति॥ ॥सू॥ ॥

।।पचादिराकृतिगणा इति। ततः सर्वधातुभ्य आदिशब्दस्य प्रकारवचनत्वात् तथा च शिवशमरिष्टस्य करे इति कृञो ऽच् प्रत्ययः कृतः घञ्श्च कर्मणि घटोऽग्नि
तितथापडं तानायडो चिचेतियडो भिन्न चितु गुरुः। भाष्ये चाप्यपि सर्वधातुभ्यो वक्तव्यः स्तुकं पचाद्यनुक्रमणं तु नदट् इत्यादि अनुबन्धासञ्जनार्थं
कर्मण्युपपदानां इगुपधानां च बाधकत्वबाधनार्थं इदं वदि लुभयार्थं मन्ये धातु प्रपंचार्थं दृष्टम्।। ।।इगुपध।। ।।इगुपधादीनां समाहारद्वन्द्वे नपुंसकत्वेन
ह्रस्वप्रसंगादितरेतरयोगे द्वन्द्वः अल्पाच्तरम् इति पंचम्येकवचनं तत्र कृ शब्दस्य धात्वनुकरणत्वात् प्रकृतिवदनुकरणं विभक्त्या विलंबत इति आतो लोप

।।पचादिराकृतिगणः।। ।।इगुपधज्ञाप्रीकिरः कः।।इगुपधेभ्यो धातुभ्यो जानातेः प्रीणातेः किरतेश्च कप्रत्ययो भव
ति। विक्षिपः।।विलिखः। विबुधः कृशः। जानातीति ज्ञः प्रीणातीति प्रियः किरतीति किरः। देवमेवमेषादयः पचादिषु
द्रष्टव्याः।। ।।आतश्चोपसर्गे।। ।।आकारान्तेभ्यो धातुभ्य उपसर्गे उपपदे कप्रत्ययो भवति। णप्रत्ययस्यापवा
दः प्रस्थः सुग्लः।। ।।पाघ्राध्माधेट्दृशः शः।। ।।पा। घ्रा। ध्मा। धेट्। दृश् इत्येतेभ्यो धातुभ्यः शप्रत्ययो भवति उत्पि
बः। विपिबः। घ्रा। उज्जिघ्रः। विजिघ्रः। ध्मा। उद्धमः। विधमः। धेट्। उद्धयः। विधयः। दृश। उत्पश्यः। उपसर्ग इति केचिदनु
वर्तयंति। पश्यतीति पश्यः। जिघ्रतेः संज्ञायां प्रतिषेधः। व्याघ्रः ५८ ।। ।।छ।। ।।छ।। ।।

इति च प्रिय इति प्रीञ् तर्पणे इय् अङादेशः। किर इति। कॄ विक्षेपे ऋत इद्धातोः पचादिषु द्रष्टव्या इति। यद्यप्यच् पचादिवत्सर्वधातुभ्यो भवति तथाप्य
प्यादबाधनार्थमेते पचादिष्ववरुद्धा इत्यर्थः।। ।।पाघ्राध्मा।। ।।पा पाने। घ्रा गन्धोपादाने। ध्मा शब्दाग्निसंयोगयोः। धेट् पाने। दृशिर् प्रेक्ष
णे। पा रक्षणा इत्यस्य तु लुग्विकरणत्वादग्रहणं उत्पिब इत्यादि। पाघ्रादिसूत्रेण यथायोगं पिबादय आदेशाः। व्याघ्र इति अत्रातश्चोपसर्ग इति कप्र
वतिरत्र च व्याघ्रादिभिरिति वचनं लिंगं ५८ ।।

।।अनुपसर्गात्।। ।।अनुपसर्गादिति व्यस्यैनेकवचनमित्याह अनुपसर्गेभ्य इति लिप उपदेहे विद्लृ लाभे आगामिना नुमा सनुम्कस्योग्रहणं तेन विघंतरा
णामग्रहणं धृञ् धारणे ध्वञ् अवस्थाने णिजंतयोर्द्वयोरपि ग्रहणं पार तीर कर्मसमाप्तौ विद चेतनाख्याननिवासेषु चुरादिः ज्ञानाद्यर्थानामन्यतमो ग्राह्ये तुम
र्णतः एज् कंपने णिजंतः चिती संज्ञाने चुरादिः साति हेतुमण्ण्यंतः षह मर्षणे चुरादिर्हेतुमण्ण्यंतो वा लिंपः विंद इति तुदादिभ्यः शः शे मुचादीनामिति नुम् धा
रणादिषु शबगुणायादेशाः नौ लिंपेरिति छंदसि तु धन्तोश्च विधर्तश्च विधारय इति दृश्यते अरविंद इति अरा कारणीरला सरशब्देनोच्यन्ते।। ।।ददाति।। ।।
ददः दध इति शः श्लुः द्विर्वचनं आभ्यस्तयोरात इत्याकारलोपः दद दाने दध धारणे इत्येताभ्यामपि विहितेऽदद दध इति सिद्धं द्वाभ्यामपि णे कृते दायो धाय
इति इदं तु वचनं स्वरार्थं अददः अदध इति अचकावशङ्का विसंतोदात्तत्वं माभूत् तनजः स्वर एवं यथा स्यादिति।। ।।ज्वलिति।। ।।इति शब्द आद्यर्थ इति

।।अनुपसर्गाल्लिंपविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च।। ।।अनुपसर्गेभ्यो लिंपादिभ्यः शप्रत्ययो भवति· लिंपतीति लि
पः· विंदतीति विंदः· धारयतीति धारयः· पारयतीति पारयः· वेदयतीति वेदयः ४ उदेजयतीत्युदेजयः· चेतयतीति चेतयः· सातिः सौत्रो धा
तुः· सातयः· साहयः· अनुपसर्गादिति किं· प्रलिपः· नौ लिंपेरिति वक्तव्यं· निलिंपा नाम देवाः· गवादिषु विंदेः संज्ञायां· गोविंदः· अर
विंदः।। ।।ददातिदधात्योर्विभाषा।। ।।ददातेर्दधातेश्च विभाषा शप्रत्ययो भवति· ददः· दधः· दायः· धायः· अनुपसर्गादित्येव· प्रदः·
प्रधः।। ।।ज्वलितिकसंतेभ्यो णः।। ।।इतिशब्द आद्यर्थे वर्तते· ज्वल दीप्तावित्येवमादिभ्यो धातुभ्यः कस गतावित्येवंपर्यंतेभ्यो
विभाषा णप्रत्ययो भवति· अचोपवादः· ज्वलः· ज्वालः· चलः· चालः· अनुपसर्गादित्येव· प्रज्वलः· तनोतेर्ण उपसंख्यानं· अवतनो

अनेकार्थत्वान्निपातानां उच्चावचेष्वर्थेषु निपतंतीति निपाता इति निरुक्तकारो निपातशब्दं निराह ज्वलितीत्यविभक्तिको निर्देशः ज्वलादिभ्य इत्यर्थः कश्चि
रंते येषां नेकसंतास्ति तत्र केचित् समधातुरिति पठंति तेषां मते कसंतग्रहणं चिंत्यप्रयोजनं ननु च ज्वल दीप्तावित्यादिः पठ्यते घटादिषु पाठ्यास्तेषामस्य
स्मिन् विशेषणे संदेहः स्यात् किं पूर्वे ज्वलितादिरुत पर इति अतः कसः समीपभूतेभ्यो ज्वलादिभ्य इति विशेषणमर्थवत् नैतदस्ति ख्यातेऽपर्यंतशब्दः समीपवच
नो वक्तुं नाहो तत्पुरुषे च कसेर्ग्रहणं न प्राप्नोति पूर्वत्र ज्वलताद्वावभिप्रेतेन दन्तत एव धातुरूपादीयत यत्रोपदेशे नैव ज्वलतेर्ग्रहणं सिद्धं घटादिपाठश्चापि
संज्ञायां चरितार्थः इतरस्तु चरितार्थ इति एवादिभिर्विष्यति अचोपवाद इति तत्राणपि सर्वधातुविषयत्वादिति भावः अभुचलत इत्यस्य ज्वलादिपाठः किम
र्थः यावता पचाद्यच् विभ्रम इति सिद्धं णोऽप्येतदेव रूपं नोदात्तोपदेशस्येति वृद्धिप्रतिषेधात् रहाभ्रम इति अचकावशङ्का विनिस्वरो माभूदिति।। ।। ।।

॥श्याव्यधास्रु॥ ॥अनुपसर्गादिति निवृत्तमिति उत्तरसूत्रे पुनरनुपसर्गग्रहणात्। विभाषेति चेति निवृत्तमित्यस्य येऽस्मिन्ते विभाषाग्रहणं यदनुपसर्ग
ग्रहणात्। विभाषेति चेति निवृत्तमित्यस्य येऽस्मिन्ते विभाषाग्रहणं त्वनुपसर्गग्रहणेन संबद्धमतस्तन्निवृत्तावस्यापि निवृत्तिः इयेङ इति इयेङ् तानि तस्मात् शी
आत इत्यादि इति शीङो यणादेशेन ग्रहणं न भवति व्याख्यानात् सौ इति प्रतीता वृत्तावेहाश्वा। आकारान्तेभ्य इति एतेन अतेः अच्छद्वा तानां मतिप्रभृती
नां अकारान्तानां च ग्रहणं न भवतीति दर्शयति एतदपि व्याख्यानादेव अवतारणेन सुगतौ आङ्पूर्वः संपूर्वश्च इणगतौ अतिपूर्वः षोऽन्तकर्मणि लिह जहर

॥श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च॥ ॥अनुपसर्गादिति निवृत्तं विभाषेति च। इयेङः आकारान्तेभ्यो
धातुभ्यः व्यध आस्रु संस्रु अतीण् अवसा अवहृ लिह श्लिष श्वस इत्येतेभ्यश्च णप्रत्ययो भवति। स्यापतेराकारान्त
त्वादेव सिद्धे प्रत्ययेऽपवादेन बाधकबाधनार्थं उपसर्गे कं बाधित्वा अयमेव भवति। अवश्यायः प्रतिश्यायः आतृ दायः धायः।
व्याधः आस्रावः संस्रावः अत्यायः अवसायः अवहारः लेहः श्लेषः श्वासः॥ ॥दुन्योरनुपसर्गे॥ ॥दुनोतेर्नयतेश्चा
नुपसर्गाण्णप्रत्ययो भवति। दुनोतीति दावः नयतीति नावः। अनुपसर्गादिति किं प्रदवः प्रणयः॥ ॥५९॥ ॥ ॥

णो अवपूर्वौ लिह आस्वादने श्लिष आलिंगने श्वस प्राणने येऽत्र सोपसर्गाः तेभ्यः सोपसर्गेभ्य एव भवति शेषेभ्यस्त्वविशेषेण बाधकबाधनार्थमिति आ
तश्चोपसर्गे इति विशेषविहितः कः सामान्यविहितस्य णस्य बाधकस्तद्बाधनार्थमिदं एतेन अवश्यपते रूपादानं व्याख्यातं अवश्याय इति पूर्ववद्युक्॥ ॥
दुन्योः॥ ॥दाव इति वनवह्निः कथं तत्रैव दव इति नयति साहचर्यात् सानुबंधकस्य दुनोतेरिह ग्रहणं निरनुबंधकाद्दवतेः पचाद्यच् विभाषितिकारणास
धनो दावाग्निर्दोषरविलंबितः ५९ ॥ ॥

।। ।।विभाषा।। ।।अवस्थितविभाषा चेयमिति एतदेव स्पष्टयति जलचर इति भवति भवत्येव न तु कदाचिन्न भवतीति भवोऽत्र वः संसारस्थ भावाः पदार्थाः।।
।।गेहेकः।। ।।गेह इति प्रत्ययार्थस्य कर्तुर्विशेषणं नोपपदं गृह्णाति नाम संयुक्त इति निर्देशात् ह्रिस्राह गेहे कर्तरीति तात्स्थ्यात्ताच्छब्द्यमिति गेहमित्यर्थ एव नेतेन गोणा
एतापि गेहस्य ग्रहणमिति दर्शयति तच्च तत्रापि स्त्रीष्वेतदृश प्रयोगेनल्पनेत तत्रैवेशमनि पुल्लिङ्गो बहुवचनान्तश्च गृहान् दाराः वं चैव को भवति गृहा नु तत्स्था
सं काशयते गृहानाच्छन् गृहपतीन् गृहान् सुमनसः प्रयच्छ इति नपुंसकलिङ्गोऽभिधेयवचनः एकदारेष्वपि अस्ये तु गृहशब्दोऽवेश्मन्येव मुख्यः दारेषु गौण इति व
दन्ति तथा न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यत इति वेश्मन्येव मुख्यातां दर्शयति यथाऽत्र निकाशेऽोक्तं तथा दारेष्वपि मुख्य एवेति लक्ष्यते।। ।।शिल्पि

।।विभाषा ग्रहः।। ।।ग्रहेर्धातोर्विभाषा णप्रत्ययो भवति· अचोऽपवादः· ग्रहः· अवस्थितविभाषा चेयं· जलचरे ग्राह एव
ज्योतिषि ग्रह एव· भवतेश्चेति वक्तव्यं· भवतीति भावः भवः।। ।।गेहे कः।। ।।ग्रहेर्धातोः कप्रत्ययो भवति गेहे कर्तरि· गे
हं वेश्म· तात्स्थ्यात्ताच्छब्द्यं· गृह्णन्तीति गृहा दाराः गृहाणि वेश्मानि।। ।।शिल्पिनि ष्वुन्।। ।।धातोः ष्वुन्प्रत्ययो भवति
शिल्पिनि कर्तरि· नृतिखनिरञ्जिभ्यः परिगणनं कर्तव्यं· नृतीगात्रविनामे नर्तकः· खनुज विदारणे· खनकः· नर्तकी·
रञ्ज रागे· रञ्जेरनुनासिकलोपश्च· रजकः रजकी·।। ।।गस्थकन्।। ।।गायतेर्धातोस्थकन्प्रत्ययो भवति शिल्पि
नि कर्तरि· गाथकः।। ।।ण्युट् च।। ।।चकारेण गायतिरनुकृष्यते गायतेर्धातोर्ण्युट्प्रत्ययो भवति शिल्पिनि कर्तरि·
गायनः गायनी· योगविभाग उत्तरार्थः।। ।।

नि।। ।।पूर्वेणाप्यह वयति शिल्पिनी सापि प्रत्ययार्थस्य विशेषणं नोपपदमित्याह शिल्पिनि कर्तरीति क्रियाकौशलं शिल्पं तद्यस्यास्तीति शिल्पी
नृतिखनीत्यादि एतद्वचनमेवं तेनाक्तातायाकथकइत्यादौ न भवति रञ्जेरनुनासिकलोपश्चेति एतत्तु ज्ञापकात्सिद्धं यत्ययं जनीन्द्रषु क्रमपुरं जोमताश्च
तिमित्यंरंजांशस्तित ज्ञापयति रंजेरक्ङि सप्यनुनासिकलोपो भवतीति।। ।।गः स्थ।। ।।गायतेरिति कैगै शब्दे गामासम्प्रहणोप्यविशेषः इति गाङः तावृत्तसत्ता
श्रिग्रहणं प्रासंत्र अनभिधानान्न भवति थकन्प्रत्ययो हि गायत्यर्थविषय मेव शिल्पिनमभिधातुं समर्थः।। ।।ण्युट्च।। ।।णकारो युगर्थः टकारो ङीबर्थः।। यो
गविभाग उत्तरार्थ इति उत्तरत्र ण्युडेवानुवृत्तिर्यथा स्यान्न थकनो मा भूदिति।। ।।छ।। ।।छ।। ।।छ।। ।।छ।। ।।छ।। ।।

॥हश्च॥ ॥जहातेरिति। ओहाक् त्यागे जिहातेरिति ओहाङ् गतौ प्रायेण जिहीतेरिति पाठः सत्यपुस्तकः ण्वुल्पुस्तकः ण्वुल् पिलादीत्वाभावात्। जहातेः ककारोत्रमा मान्यग्रहणार्थः अन्यथा एकानुबन्धकत्वात् स्यैव स्यात् अथ हाङ् इत्युच्येत एवमपि तस्य ग्रहणं न स्यात् तस्माद्द्वयोरपि ग्रहणं व्रीहिकालयोरिति कर्तृवि शेषणं नोपपदं त्रिचतुर्भ्यं हि। यनस्य इमहायनो नाचेति वचनादिति मत्वाह व्रीहौ काले चकर्तरीति जहत्सुदक्षामिति कृत्वेति व्रीहौ हायन शब्द स्य प्रवृत्ति निमित्तं दर्शितं जांगलदेशोद्भवाः केचिद्व्रीहयो हायनाः सत्याङ्गः। जिहीते भावानिति भावाः पदार्थास्तान् जिहीते गच्छतीति परिच्छेदकत्वेन प्राप्नोतीत्यर्थः॥ ॥प्रुसृल्वः॥ ॥प्रुसृल्व इतीयं प्राप्तः स्थाने जस ओः सुपीति यणादेशः साधुकारित्वं लक्ष्यत इति। प्रायः सहचरितत्वात् पुनः पुनरनुष्ठानं समभिहारः

॥हश्च व्रीहिकालयोः॥ ॥चकारेण ल्युडनुकृष्यते जहातेर्हाजो जिहीतेश्च ल्युट् प्रत्ययो भवति व्रीहौ कर्तरि काले च। हाय नानाम व्रीहयो भवन्ति। जहत्सुदकमिति कृत्वा। काले। हायनो नाम संवत्सरः जहाति भावानिति कृत्वा॥ ॥प्रुसृल्वः समभि हारे वुन्॥ ॥प्रुङ् सृङ् गतौ लूञ् छेदने इत्येतेभ्यो धातुभ्यः समभिहारे वुन् प्रत्ययो भवति। प्रवकः सरकः लवकः समभिहारग्रहणेनात्र साधुकारित्वं लक्ष्यते। साधुकारिणि वुन् विधानं सकृदपि यः सुष्ठु करोति तत्र भवति बहुशोपि यो दुष्टं करोति तत्र न भवति॥ ॥आशिषि च॥ ॥आशिषि गम्यमानायां धातुमात्राद्वुन् प्रत्ययो भवति। जीवतात् जीवकः नन्दतात् नन्दकः भवतात् भवकः आशीः प्रार्थनाविशेषः स च क्रियाविषयः अमुष्याः क्रियायाः कर्ता भवेदित्येवमाशा स्यते॥ ॥इति काशिकायां वृत्तौ तृतीयस्याध्यायस्य प्रथमः पादः॥ ६० ॥

यश्च यां क्रियां पुनः पुनरनुतिष्ठति तस्य तत्र प्रायेण कौशल्यमुपजायते अतः प्रायः साहचर्यात्साधुकारित्वं लक्ष्यते लक्षणया तत्र वर्तत इत्यर्थः तेन किं सिद्धं भवतीत्याह सकृदपीति॥ ॥आशिषि च॥ ॥आशिषि गम्यमानायामिति निर्वाच्यायां कर्तरीच्छ इतिकर्तुरेव वाच्यत्वात्। प्रार्थनाविशे षइति अप्राप्तस्याभिलषितस्य प्राप्तुमिच्छा प्रार्थना आशीः स चेत् क्रियाविषय इति। धातोरित्यधिकारात्तथा तोश्च क्रियावचनत्वात्। अमुष्याः क्रियाया इति जीवनादिकायाः अनेन प्रयोक्तृधर्मत्वमाशिषो दर्शयति जीवतादिति आशिषि लोट् प्रयोगेणोदाहरणे आशिषं दर्शयति॥ ॥७॥ ॥इति श्री हरदत्तमिश्रविरचितायां पदमञ्जर्यां तृतीयस्याध्यायस्य प्रथमः पादः समाप्तः॥ ॥ ६० ॥ ॥ ७ ७ ॥ ॥ ॥ ॥१॥ ॥

॥ ॥कर्मप्रकरण॥ ॥कर्मणीति नेदं स्वरूपग्रहणं अशब्दसंज्ञेति प्रतिषेधात् नन्वनुवार्थस्येयं संज्ञा न शब्दस्य अशब्दसंज्ञेति नैवं विज्ञायते यत शब्द
स्य संज्ञा अशब्दसंज्ञेति किं तर्हि रूढे संज्ञा शब्दसंज्ञेति शब्दः शब्देन शब्दानामनुशासनं व्याकरणमुच्यते असति च व्याघेहत त्रिमाकृत्रिमयोः कृत्रिमस्ये
व ग्रहणं तेन कर्तुरीप्सिततममित्यस्य कर्मणो ग्रहणमंगीकृत सावंतभेदमाह त्रिविधं कर्मेति ता एव तिस्रो विधा दर्शयति निर्वर्त्यं विकार्यं प्राप्यं चे
ति यदसज्जायते सद्वा जन्मना प्रकाश्यते तन्निर्वर्त्यं यथा कुंभं करोति पुत्रं प्रसूत इति यस्य तु सत एव कश्चिद्विकारः क्रियते तद्विकार्यं स च विकारः
कश्चित्तत्वान्तराभ्यः यथा काष्ठानि भस्म करोति सुवर्णं कुंडलं करोतीति कश्चिच्छाद्गुणान्तरः व्रीहीन् प्रोक्षतीति अत्र प्रोक्षणेन व्रीहिषु कश्चिद

॥ ॥कर्मप्रकरण॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ० ॥

तिशयो जन्यत इति शास्त्रादेवगम्यते एतावता च भेदेन संस्कार्यमेतत् कर्मेति चातुर्विध्यं भीमो हकामश्च ते क्रियाकृतविशेषाभावे तु प्राप्यं
कर्म यथा वेदमधीयते वर्ण्यपारयतीति। ननु च कर्तुरीप्सिततममित्यत्र देवकर्म त्रिविधमन्यदप्यस्ति तथा युक्तं चानीप्सितमिति तच्चाप्सिवि
धं द्वेष्यमितरच्च तथा अकथितं च एवं द्विविधः कर्म च तथा अधिशीङ्स्थासां कर्मेति तदेव भवान्तरभेदविवक्षायां सप्तविधं कर्मोक्तं च निर्वर्त्यं च
विकार्यं च प्राप्यं चेति त्रिधा मतं तत्रेप्सिततमं कर्म चतुर्धान्यत्तु संहितं औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितं॥ संज्ञान्तरैरनाख्यातं यद्य
च्चाप्यन्यपूर्वकमिति तत्किमुच्यते॥ ॥छ॥ ॥

॥त्रिविधं कर्मेति किं विहाङ्कः कर्त्तुरीप्सिततममेवात्र कर्मगृह्यते अस्मत्राण न भवतीति अन्ये त्वाहुः आदित्यं पश्यतीत्यादौ माभूदित्येवमर्थं कर्मणि निर्वर्त्त्य मानेविक्रियमाणे इति च कत्थमित्याशंक्य वार्त्तिककारेणोक्तं कर्मणि निर्वर्त्त्यमाने विक्रियमाणे इति चेद्वेदाध्यायानामुपसंख्यानमित्यादि तद्वेनप्र दर्श्यते त्रिविधमपि कर्म गृह्यते न पुनः प्रार्थनगृह्यते तत इति न तु सूत्रांतरोक्तं वावर्त्यते तथा च द्विविधः कर्म चैस्य त्रसमावेशस्य प्रयोजनमुक्तं मनसा देव इत्यत्र कर्मत्वादणकरणत्वात्तृतीयेति एवं च हृश्रावासः पर्वताधिवासः इत्यादयपि यथादर्शनं भवतीति अनभिधानादिति तद्यानभिधानं यत्रासेहक्तं

॥त्रिविधं कर्म निर्वर्त्त्यं विकार्यं प्राप्यं च सर्वत्र कर्मण्युपपदे धातोरण्प्रत्ययो भवति॰ निर्वर्त्त्ये॰ कुंभकारः न गरकारः॰ विकार्ये॰ काण्डलावः शरलावः प्राप्ये॰ वेदाध्यायः चर्चापारः॰ ग्रामं गच्छति आदित्यं पश्यति हिमवंतं शृणोतीत्यत्र न भवति॰ अनभिधानात्॰ शीलिकामिभक्ष्याचरिभ्यो णः॰ पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यं॰ मांसं शीलयति मांसशीलः॰ मांसशीला॰ मांसकामः मांसकामा॰ मांसभक्षः मांसभक्षा॰ कल्याणाचारः कल्याणाचारा॰ ॥१॥ ॥

तन्नैवं अन्यत्र तु यथालक्षणं भवत्येव तथा च यठतिय यथालक्षणमप्रयुक्त इति शीलिकामीत्यादि शीलमस्माघो भक्ष्य अदने चुरादिः कमु कान्तौ णिङ् न्तः चर पार्थ आङ् पूर्वः णस्य शील्करणं चरेर्हि अर्थं पूर्वपदप्रकृतिस्वरत्वं चेति कृदुत्तरपदप्रकृतिस्वरस्यापवादः मांसशीलेति अत्राणि मतिङ् प्रमाणात् णोपि क्वचिदणकृतं भवतीत्येतत्तु नाच्छीलिक एवाणो भवति मनेर्द्दर्घश्चेति मप्रत्ययान्तो मांसशब्दः कल्याणशब्दो लघ्वावंते द्वयोश्च बहुनो गुरुरिति मध्योदात्तः अस्यायमर्थः अंते लघ्वौ परतो द्वयोश्चांतयोर्लघ्वोः परतो बहुषः शब्दस्य योगुरुः स उदात्तो भवति विद्वक्षपरतिबहुर्क च इत्यर्थः अपित्यच्च पूर्वाचार्यसंज्ञा॥१॥ ॥

क्षिप्रक्षिप्रं चेति। अत्रापि पूर्वपदप्रकृतिस्वरत्वं चेत्येव वाक्यभेदस्तु वैचित्र्यार्थः। इह यो मांसं भक्षयति मां स तस्य भक्षो भवति तत्र भक्षयतेः कर्मण्ये
रजंतस्य बहुव्रीहिणा सिद्धं एवमन्यत्रापि यः पुनरापतत्यस्तद्घजंतस्य बहुव्रीहिर्नार्थः एतेन ननु बहुभक्ष इत्यत्र बहोर्नञ्वदित्युत्तरपदांतोदात्तत्वं
प्राप्नोति एवं तर्हि भावे घञंतेन अधिकरणापदो बहुव्रीहिर्भविष्यति बहुषु भक्षो यस्य बहुभक्ष इति तत्रोत्तरपदार्थस्य बहुत्वाभावाद्बहुभक्षोन भ
विष्यति सत्यं अणा बाधनार्थं तु वचनं। अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेन यच्चात्र भिन्नोच अनुपपदो कारान्तस्यावकाशः पचतीति प
चः कर्मोपपदस्यावकाशः कांडलावः शरलावः ओदनपाचः इत्यत्रोभयप्रसंगे परत्वात्प्रथमे वाणा भवति तेनोपधाज्ञादिरुपपदसमासश्च नित्यो
भवति अपि तु षष्ठीसमासो विकल्पितः स्यात् न च वा अयुगपद्विवक्षायां भवतु हि प्रतिषेधः केवले यच्च यदि विवक्षितेन अविकृते यस्मादोदनसंबं
धे विवक्षिते ओदनपचः इयपि प्राप्नोति एकत्वात् प्रयोगस्य न हि तस्मिन्नेव प्रयोगे विवक्षितं चाविवक्षितं च कर्म भवति तस्मादोदनपचं इत्यसाधु

ईषत्क्षिप्रक्षिप्रं चेति वक्तव्यं। सुखप्रतीक्षः सुखप्रतीक्षा। बहुक्षमः बहुक्षमा॥ ॥ह्वावामश्च॥ ॥ह्वेञ् स्पर्द्धायां
शब्दे च। वेञ् तंतुसंताने। माङ् माने। इत्येतेभ्यः कर्मण्युपपदे अण्प्रत्ययो भवति। कप्रत्ययस्यापवादः। स्वर्गह्वायः।
तंतुवायः। धान्यमायः॥ ॥छ॥ ॥

एवं गंगाधरः श्रीधरः वज्रधरः स्रग्धरेति तु संज्ञाशब्दाः यदा तज्जापि सर्वधातुभ्य इति पक्षे तदापवादत्वादेव तस्याणो बाधकाः तथाह्युपधङ्गा
प्रीकिरश्च कः अनुपपदः तस्यावकाशः विक्षिपः विलिखः कर्मोपपदस्य स एव काष्ठभेद इत्यत्रोभयप्रसंगे परत्वादयमेवाण्भवति तथा अनुप
संगीलिंपविंदेत्यनुपपदः शः तस्यावकाशः लिंपतीति लिंपः कर्मोपपदस्य स एव कुड्यलेप इत्यत्रोभयप्रसंगे परत्वादयमेवाण्भवति तथा
तश्चोपसर्गे इति कोनुपपदस्तस्यावकाशः सुग्लः सुम्लः कर्मोपपदस्य स एव गोसंदाय इत्यत्रोभयप्रसंगे परत्वादयमेवाण्भवति॥ ॥
ह्वावामश्च॥ ॥वेञ्तंतुरिति॥ ॥वागातिगंधनयोरित्यस्य ग्रहणं न भवति अकर्मकत्वात् भ्रमणार्थोप्ययं सोपसर्गो दृश्यते आवाति वातः आवातु
भेषजमिति सोपसर्गस्य तु सकर्मकत्वेप्यग्रहणं पूर्वेणैवाणः सिद्धत्वात् वाता वांति हिमशोर इत्यप्रयोगाच्चेत्यसः अथापि कश्चित्कथंचित्सकर्म
कत्वं तथापि केनाप्यसाहचर्यान्नानुबंधकस्यैव वेञो ग्रहणं। माङः माङ् माने इति ङितो माङ्रूपस्योपलक्षणमेतत् तेन मेङः प्रणिदाने इत्यस्यापि ग्रहणं
मामाने इत्यस्य तु संभवतार्थस्याकर्मकत्वादग्रहणं॥ ॥छ॥ ॥

का॰प॰
६३

॥आतोनुपसर्गेकः॥ ॥कविधौसर्वत्रप्रसारणिभ्योडोवक्तव्यः संप्रसारणभाजः प्रसारणिनः ज्याव्येञोह्वेञोब्रह्मजिनातीति ब्रह्मज्यः सर्वत्रग्रहणा
न्नावरूपमिहैव आतश्चोपसर्गे आह्वः प्रह्वः केहिसंप्रसारणप्रसंगः आह्व आङ् इति स्थिते संप्रसारणे पूर्वत्वे च कृते उवङादेशे आहुवः प्रहुव इति प्राप्नो
ति एवं ब्रह्मजिय इति प्राप्नोति ननु संप्रसारणे कृते आतोलोप इति तस्य एव स्यान्निवृत्ताद्वादियङुवङोन भविष्यतः लोपो न सिध्यति अंतरंगत्वात्पूर्वत्वं प्राप्नोति
समानाश्रये च वार्णादांगंबलीय इति एवं तर्हि प्रागेव संप्रसारणादातोलोपो भविष्यति परत्वात् नित्यं संप्रसारणं कृताकृतप्रसंगित्वात् आतोलोपस्त्व
नित्यः कृते संप्रसारणे पूर्वत्वेन वा अतेयस्य चानिमित्तंलक्षणांतरेण विहन्यतेन न तदनित्यं तदेवं परत्वादातोलोपः ततः संप्रसारणं ततइयङुवङोप्रसक्ता
वाल्लोपस्यास्यान्निवृत्तान्नभविष्यतः अनुयोगादिष्टाद्वः पूर्वतस्य विधिं प्रति स्थानिवद्भाव आदिष्टाद्बेषोचः पूर्व इदानीमेव प्रयुक्तं पूर्वमाल्लोपः य

॥आतोनुपसर्गेकः॥ ॥आकारांतेभ्योनुपसर्गेभ्यः कर्मण्युपपदे कप्रत्ययो भवति। अणो
पवादः। गोदः। कंबलदः। पार्ष्णित्रं। अंगुलित्रं। अनुपसर्ग इति किं गोसंदायः। वडवासंदायः २

आत्संप्रसारणमिति एवं तर्ह्याकारलोपस्यासिद्धत्वादुवङ् न भविष्यति इहापि तर्हि जुहुवतुः जुहुवुः आल्लोपस्यासिद्धत्वादुवङ् प्राप्नोति आभी
यमसिद्धत्वमनित्यमित्यत्र न भविष्यति अथवा संप्रसारणाच्चात् ऊः परान्तादित्यत्र एङः इति योगविभागः संप्रसारणादेङि परतः पूर्वपरयोः पूर्वमे
कादेशो भवतीति किमर्थमिदं न संप्रसारणाच्चेत्येव सिद्धं ज्ञापनार्थं यत्र संप्रसारणात्परएङ् संभवति तत्रादेच उपदेशेऽशितीत्यात्त्वं न भवतीति यदि
स्यात्पूर्वत्वेन तस्य निवृत्तिविधानमनुपपन्नं स्यात् तेन जुहुवतु रित्यत्रानैमित्तिकत्वे नांतरंगमप्यात्वमकृत्वा एङः नादेव लिटि द्विर्हिते संप्रसार
णं पूर्वत्वं च न स्यादिति वक्तव्यं नासिद्धत्वमिति सिद्धमिष्टं आह्वः प्रह्वः ब्रह्मज्य इत्यत्राप्याकारांतलक्षणः प्रत्ययो नाम तत्त्वे भवितुमर्हतीति पूर्वमात्वे

ततः प्रत्ययः आल्लोपः संप्रसारणं असिद्धत्वादियङुवङोरभावः॥ २ ॥

एस॰
६३

।।सुपिस्थः।। ।।सुपीतिन सप्तमीबहुवचनस्य ग्रहणं किं तर्हि प्रत्याहारस्य सुपिडितं पदस्य आत्मनः का च सुपो धातुप्रातिपदिकयोः अव्ययादाप्सुपः
न द्वित्वे सेवप्रसिद्धत्वात् द्वाभ्यां पिबतीति ननु इहैक द्विप्रियाः यः तत आसंततमप्यवचार्थमाश्रित्य कर्मोपपदत्वं कः कारिष्यते नैतदेवं द्वाभ्यां पि
बतीत्यादेरन्वार्थं स्यात् भवतीत्यपीत्यादोनैवं सुप्यत्तौ प्रसंभवं स्यात् समस्याः कल्पनाया अयुक्तत्वात् तयत्र तसंतमसंभवः युक्तात्तत्र समाकल्पनाय यात्वे
लपायिकाद्यो अनेनभावे यथा स्यादिति आरंभसामर्थ्यात् आवश्यकं कर्तुरुपकल्प्यते न चान्यो योगो निर्दिश्यते अनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवंतीस्वा
र्थ्यश्च धात्वर्थो भाव एव ननु द्व्यर्थकविधानमितिभावे कः सिद्धः सत्यं नित्यसमासार्थं तु वचनं अन्यथा याशिकः षष्ठीसमासः स्यात् नित्य एव तत्

।।सुपिस्थः।। ।।सुबंत उपपदे तिष्ठतेर्धातोः कप्रत्ययो भवति समस्थः विषमस्थः अत्र योगविभागः कर्तव्यः सुप्या
कारान्तेभ्यो धातुभ्यः कप्रत्ययो भवति द्वाभ्यां पिबतीति द्विपः पादपः स्थः स्थश्च सुपि कप्रत्ययो भवति किमर्थमिदं क
र्तृग्रिपूर्वयोगः अनेनभावे यथा स्यात् आखूनामुत्थानं आखूत्थः इत उत्तरं कर्मणि सुपीति च द्वयमप्यनुवर्तते तत्र
सकर्मकेषु धातुषु कर्मणि सेत्स्यति इतरेष्वन्यत्र सुपीति।। ।।तुंदशोकयोः परिमृजापनुदोः।। ।।तुंदशोकयोः कर्मणो
रुपपदयोः परिमृजापनुदोर्धात्वोः कप्रत्ययो भवति तुंदपरिमृज आस्ते शोकापनुदः पुत्रो जातः आलस्यसुखाहरणा
योरिति वक्तव्यं अलसस्तुंदपरिमृज इत्युच्यते तुंदपरिमार्ज एवान्यः सुखस्याहर्ता शोकापनुदः शोकापनोद एवा
न्यः कप्रकरणे मूलविभुजादिभ्य उपसंख्यानं मूलानि विभुजतीति मूलविभुजो रथः नखानि मुंचतीति नखमुचानि ध

पपदसमासो भवति तथा चाखूनामुत्थानमित्यस्य पदे न विग्रहः कृतः द्व्यर्थकविधानमित्यत्र स्थग्रहणं कर्तृवर्जिते कारकेपि यथा स्यादिति।। ।।
तुंदशोकयोः।। ।।तुंदपरिमृज इति मृजेरजादौ संक्रमे इत्यत्र यासि वृद्धिस्तदादाविति वृत्तिकृदाशिष्य ग्रहणं मुख्याजादिपरिग्रहार्थं तेन खर्वदरिद्वा
वेनाजादौ कप्रत्यये वृद्धिर्भवति। आलस्येत्यादि आलस्ये गम्यमाने सुखे चाहरणे च प्रत्ययः स्यादर्थः। तत्र सामर्थ्याद् अलसे कर्तरि सुखस्य चाहर्तरि प्रत्ययो भ
वतीत्युक्तं भवति शोकापनोदस्त्वन्यस्त्विति य सरणानिलतायुपदेशेन शोकमेव केवलमपनुदतीति न तु सुखमुत्पादयति सशोकापनोदः मूलवि
भुजादिभ्य इति तादर्थ्ये एवात्र तु यथा मूलविभुजादिसिद्धमित्यर्थः आकृतिगणश्चायं तेन महीध्रकुध्रशिरोरुहादिसिद्धं भवति।। ।। ।।

काकगुहा इति काकेभ्यो गूहितव्या इति कर्मणि कप्रत्यय इष्यते अतो ऽत्र नार्थकविधानमिति सूत्रे टंड्डप्यं॥ ॥प्रेदाज्ञः॥ ॥ददातेरिति उपलक्षणमेत
त् गामादाग्रहणेष्वविशेष इति सर्वेषामेव दारूपाणां ग्रहणमिष्यते। जानातेश्चेति जनेस्तु लोपे नायं निर्देशो न भवति खनो घञ्च चहलश्च ख इत्यादौ धा
तुनिर्देशे अल्लोपस्याकरणात् प्रेणोपसृष्टादिति। प्रशब्देनोपसर्गेण संबद्धादित्यर्थः अनुपसर्ग इति चानुवर्तते तेन केवलेन प्रेणोपसृष्टादित्यर्थः तत

॥काकगुहास्तिलाः कोमोद्स्ते कुमुदं॥ ॥प्रेदाज्ञः॥ ॥सोपसर्गार्थ आरंभः॥ दधातेर्जानातेश्च धा
तोः प्रे उपसृष्टात् कर्मण्युपपदे कप्रत्ययो भवति॥ अणोऽपवादः॥ सर्वप्रदः॥ पथिप्रज्ञः॥ प्र इति किं॥ गोसंदायः॥ ॥स
मि ख्यः॥ ॥सोपसर्गार्थ आरंभः॥ संपूर्वात् ख्यातेस्तस्माद्धातोः कर्मण्युपपदे कप्रत्ययो भवति॥ गां संचष्टे गोसंख्यः॥
पशुसंख्यः॥ ॥गापोष्टक्॥ ॥कर्मण्यनुपसर्ग इत्यनुवर्तते॥ गायतेः पिबतेश्च धातोः कर्मण्युपपदे अनुपस
र्गे टक्प्रत्ययो भवति॥ कस्यापवादः॥ शक्रं गायति शक्रगः॥ सामगः॥ शक्रगी॥ सामगी॥ सुरासीध्वोः पिबतेरिति वक्त
व्यं॥ सुरापः॥ सीधुपः॥ सुरापी॥ सीधुपी॥ सुरासीध्वोरिति किं॥ क्षीरपा ब्राह्मणी॥ पिबतेरिति किं॥ सुरां पातीति सुरापः॥
अनुपसर्ग इत्येव॥ शक्रसंगायः॥ सामसंगायः॥ बहुलं छन्दसि वक्तव्यं॥ या ब्राह्मणी सुरापी भवति नैनां देवाः पति
लोकं नयंति॥ या ब्राह्मणी सुरापी भवति नैनां देवाः पतिलोकं नयंति॥ २॥

श्च गोसंप्रदाय इत्यणेव भवति॥ ॥गापोः॥ ॥गापतेरिति गामादाग्रहणेष्वविशेष इति गाङो लुग्विकरणस्य पा पिबतेर्ग्रहणं प्राप्तं पिबतिर्गाह वर्षा
तुन भवति सामगीति। कटः किलादातो लोपः टित्वान्ङीप् सुरासीध्वोः पिबतेरिति वक्तव्यमित्यत्र पिबतेरिति लुग्विकरणे लुग्विकरणपरिभा
षा लभ्यस्यैवार्थस्य कथनमुपपादपरिगणनं तु वाचवनिकमेव। क्षीरपेति स्त्रियामेव विशेषात् स्त्रीलिंगमुदाहृतं॥ ३ ॥ ॥ ॥

॥ ॥हरतेः॥ ॥अच्प्रकरणे इति लिंगविशिष्टपरिभाषयैव घटग्रहणेन घटीग्रहणेपि सिद्धे घटीग्रहणं परिभाषाया अनित्यत्वज्ञापनार्थं सू-
त्रग्राह एवान्य इति यः सूत्रं केवलमुपादत्ते न तु धारयति तत्राणेव भवतीत्यर्थः॥ ॥वयसि च॥ ॥संभाव्यमानं वेति तेनात्रस्यैकवचग्रहणेऽपि
वयसि गम्यमानेऽनेकवचहर इति भवतीति भावः॥ ॥आङि॥ ॥पुष्पाद्याहरणं इत्यादिना ताच्छील्यमुदाहरणे दर्शयति। स्वाभाविकीति स्वभा-

॥हरतेरनुद्यमनेऽच्॥ ॥हरतेर्धातोरनुद्यमनेऽर्थे वर्त्तमानात्कर्मण्युपपदेऽच्प्रत्ययो भवति· अणोऽपवादः· उद्य-
मनमुत्क्षेपणं· अंशहरः· रिक्थहरः· अनुद्यमन इति किं· भारहारः· अच्प्रकरणे शक्तिलांगलांकुशयष्टितोमर-
घटघटीधनुष्षु ग्रहेरुपसंख्यानं· शक्तिग्रहः· लांगलग्रहः· अंकुशग्रहः· तोमरग्रहः· घटग्रहः· घटीग्रहः· धनु-
र्ग्रहः· सूत्रे च धार्यर्थे· सूत्रग्रहः· सूत्रं धारयतीत्यर्थः· सूत्रग्राह एवान्यः॥ ॥वयसि च॥ ॥वयसि गम्यमाने
हरतेर्धातोः कर्मण्युपपदेऽच्प्रत्ययो भवति· अणोऽपवादः· उद्यमनार्थोयमारंभः· कालकृता शरीरावस्था यौवना-
दिर्वय उच्यते· यदुद्यमनं क्रियमाणं संभाव्यमानं वा वयो गमयति तत्रायं विधिः॥ अस्थिहरः श्वा· कवचहरः क्षत्रि-
यकुमारः॥ ॥आङि ताच्छील्ये॥ ॥आङ्पूर्वाद्धरतेः कर्मण्युपपदेऽच्प्रत्ययो भवति ताच्छील्ये गम्यमाने· ता-
च्छील्यं तत्स्वभावता· पुष्पाहरः· फलाहरः· पुष्पाहरणे स्वाभाविकी फलनिरपेक्षा प्रवृत्तिरस्येत्यर्थः· ताच्छील्य इति
किं· भारमाहरतीति भाराहारः॥ ॥अर्हः॥ ॥अर्हः पूजायामर्हतेर्धातोः कर्मण्युपपदेऽच्प्रत्ययो भवति· अ-
णोऽपवादः॥ स्त्रियां विशेषः· पूजार्हा ब्राह्मणी· गंधार्हा माल्यार्हा·॥ ॥

वे भवा स्वाभाविकी अध्यात्मादिः स्वणाद्यादिषु पठ्यते न दारिविधिश्च तत्रैव पठ्यते भाष्यकारप्रयोगात्तु ह्रस्वादिकार्याभावः स्वार्थिक स्वाभाविक
शब्दो भाष्ये प्रयुक्तो। अस्य पुष्पाणां फलानपेक्षेति। कथं पुनः फलमनपेक्ष्य तत्र प्रवर्त्तेत न हि स भावः यः पर्यनुयोगमर्हतीति॥ ॥छ॥ ॥

॥स्तंबकर्णयो॥ ॥रमेरकर्मकत्वादिति॥ ननु आङ्परिभ्यो रमः व्याङ्परिभ्यो रमः इत्यत्रोदाहृतं देवदत्तमुपरमतीति एवं मन्यते अनुपसर्ग इति वर्त्तते इति जपेश्च शब्दकर्मकत्वादिति मंत्रं जपतीत्यादौ तत्रैव प्रयोगदर्शनात् कर्म न संभवतीति केवलस्य स्तम्बे जपेर्थे करणे षष्ठ्यन्तं कमिति भावः स्तम्बकः पिशुनः स्तंबेरम इति नसुरुषेत्तु तिविकुलमिमल्लुक् कर्णेजपितामश्रुक इत्युपांशु ग्राहापिजेत्यर्थः॥ ॥शमि धातोः॥ ॥धातुमात्रादिति

॥स्तंबकर्णयो रमिजपोः॥ ॥स्तंबकर्ण इत्येतयोः सुबंतयोरुपपदयोर्यथासंख्यं रमिजपोर्भवति। रमेरकर्मकत्वाज्जपेः शब्दकर्मकत्वात्कर्म न संभवतीति सुप्युपपदे हस्त्यभिसंबध्यते। हस्तिसूचकयोरिति वक्तव्यं। स्तंबेरमते स्तंबेरमो हस्ती। कर्णेजपतीति कर्णेजपः सूचकः। हस्तिसूचकयोरिति किं। स्तंबे रंता। कर्णेजपिता मशकः॥ ॥शमि धातोः संज्ञायां॥ ॥शम्युपपदे धातुमात्रात्संज्ञायां विषये अच्प्रत्ययो भवति। शंकरः। शंभवः। धातुग्रहणं किं। यावता धातोरिति वर्त्तत एव। शमि संज्ञायां धातुग्रहणं कृञो हेत्वादिषु टप्रतिषेधार्थं। शंकरा नाम परिव्राजिका। शंकरा नाम शकुनिका तच्छी

एम॰ ६५

मात्रग्रहणेनाप्यवाट्विषयेपि विधानं भवतीति दर्शयति। शंकर इति ऐहिकामुष्मिकं सौख्यं च सुखं करोतीति शंकरः। धातुग्रहणस्य प्रयोजनं दर्शयन्मात्रग्रहणप्रतिपादितमेवार्थं स्पष्टीकरोति शमि संज्ञायामिति। अस्मिन्सूत्रे इत्यर्थः। असति धातुग्रहणे शमि संज्ञायामित्यस्यावकाशः शंभवः शंवद इति कृञो हेतुताच्छील्य इत्यस्यावकाशः श्राद्धकर इति शंकर इत्यत्रोभयप्रसंगे परत्वाट्टः स्यात् धातुग्रहणसामर्थ्यादजेव भवति कुंभकारा उक्तं त्वाचार्यैर्मन्यते टप्रत्ययान्तेः शब्दकर्मण्यत्र दूषंश्लोकशब्दादिकलहगाथा करः इति तन्मते धातुग्रहणं विसप्रयोजनं॥ ॥४॥ ॥ ॥

॥अधिकरणे॥ ॥पार्श्वादिष्विति। अनधिकरणार्थमिदं तद्धि ग्रहेणार्स्पर्शयतिया पार्श्वाभ्यामिति। दिग्धसहशाय इति दिग्धेन सह शेते इत्यत्र विकृतेन सहत्वं स
कारित्वात्समासः दिग्धसहशः इति सप्तम्यंसकादिः तत्सोपदसमासः अत्र मूर्द्धशय इति अत्र वनन्तो मूर्द्धीयस्य अत्र मूर्द्धा अधोमुखः शेते इत्यर्थः गिरौ डश्छंद
सीति यदि छंदसीत्युच्यते कथं गिरिशमुपचचार प्रत्यहं हां सुकेशी आरोपितं याद्म गिरिशो न पश्यादिति निरंकुशाः कवयः अन्ये तु लादुः इह यो गिरौ शेते गिरि

॥अधिकरणे शेतेः॥ ॥सुपीति संबध्यते शेतेर्द्धातोरधिकरणे सुबंते उपपदे अच्प्रत्ययो भवति खे शेते खशयः ग
र्तशयः पार्श्वादिषूपसंख्यानं पार्श्वाभ्यां शेते पार्श्वशयः उदरशयः दिग्धसहपूर्वाच्च दिग्धेन सह शेते दिग्धसहश
यः उत्तानादिषु कर्तृषु उत्तानः शेते उत्तानशयः अवमूर्द्धा शेते अवमूर्द्धशयः गिरौ डश्छंदसि गिरौ शेते गिरिशः
॥ ॥चरेष्टः॥ ॥अधिकरणे इति वर्त्तते चरेर्द्धातोरधिकरणे सुबंत उपपदे टप्रत्ययो भवति कुरुषु चरतीति कुरुचरः
मद्रचरः कुरुचरी मद्रचरी प्रत्ययांतरकरणं ङीबर्थं॥ ॥भिक्षासेनादायेषु च॥ ॥अनधिकरणार्थ आरंभः भि
क्षासेनाआदायेषु सुबंतेषूपपदेषु चरेर्द्धातोष्टप्रत्ययो भवति। भिक्षाचरः सेनाचरः आदायचरः॥ ॥छ॥ ॥

त्तस्यास्तीति लोमादिषु दर्शनाच्छप्रत्ययः तथा चात्रैव गत्तिकं तद्धि लोके इति न च लोमादि दिग्धापिच्छं शेग्रहणामस्तीति नभाषायामपि गिरिश इति
भवति एवं च छलानि वृंदं सुपाठे पुप्रयत्नो भवति गिरौ शेते इति गिरौ वसतीत्यर्थः॥ ॥निक्षासेना॥ ॥भिक्षाचर इति चरतिरत्र तत्पूर्वकेऽर्जने व
र्त्तते चरणेन भिक्षामार्जयतीत्यर्थः। सेनाचर इति सेनां प्रविशन्नुच्यते आदायचर इति। आदाय गच्छतीत्यर्थः भक्षयतीति वा कथं सहचरः सहचरी
तिपचादिषु चरडिति यच्यते सुप्सुपेति समासः॥ ॥छ॥ ॥

॥पुरोऽग्रतो॥ ॥अग्रेइत्येतेष्विति एतेनाग्रशब्दस्यैकारान्तत्वं निपात्यत इति दर्शयति एतच्चाग्रेशब्दस्य परनिपातनादेव विज्ञायते अन्यथा अजाद्यदन्तमिति पूर्वनिपातः स्यात् किमर्थं पुनरेकारान्तत्वं निपात्यते यावता सप्तम्या अलुका अप्यग्रेसर इति सिद्ध्यत्येव तत्त्वर्थं अग्रं सरतीत्यग्रसर इति वाक्यविग्रहे तेनैतदग्रेसर इत्येवं यथा स्यात्· कथं पूर्वं तदग्रसरणाविति कुम्भसारमिति च रूपं तुल्यमेव कुलमिति समर्थनीयं॥ ॥कृञो हेतु॥ ॥करोतेर्द्धातोरिति। अप्रसिद्धतरत्वाद्धनुर्वेदस्याप्यस्येव ग्रहणं नानु कृञ हिंसायामित्यस्येति भावः आनुलोम्ये च गम्यमान इति। एतेन हेत्वादीति नोपपदानीति दर्शयति। एतच्च शमि धातोरित्यत्र धातुग्रहणात् कृञो हेत्वादिषु प्रतिषेधार्था हि स्यात् तेषूपपदत्वे हि शम्युपपदे टप्रत्ययस्य प्राप्त्यभावादनर्थकं तत्स्यात् अतो नैषामुप

॥पुरोऽग्रतोऽग्रेषु सर्त्तेः॥ ॥पुरस् अग्रतस् अग्रे इत्येतेषूपपदेषु सर्त्तेर्धातोष्टप्रत्ययो भवति· पुरः सरतीति पुरःसरः· अग्रतःसरः· अग्रेसरः॥ ॥पूर्वे कर्त्तरि॥ ॥पूर्वशब्दे कर्तृवाचिन्युपपदे सर्त्तेर्धातोष्टप्रत्ययो भवति· पूर्वः सरतीति पूर्वसरः· कर्त्तरीति किं पूर्वं दिशं सरतीति पूर्वसारः॥ ॥कृञो हेतुताच्छील्यानुलोम्येषु॥ ॥कर्मण्युपपदे करोतेर्धातोष्टप्रत्ययो भवति हेतौ ताच्छील्ये आनुलोम्ये च गम्यमाने· हेतुरैकान्तिकं कारणं ताच्छील्यं तत्स्वभावता· आनुलोम्यमनुकूलता· हेतौ तावत्· शोककरी कन्या· यशस्करी विद्या· कुलकरं धनं· ताच्छील्ये· श्राद्धकरः· अर्थकरः· आनुलोम्ये· प्रेषकरः· वचनकरः· एतेष्विति किं· कुम्भकारः॥ ५ ॥ ॥

पदत्वं नापि प्रत्ययार्थत्वं कर्त्तरि कृदिति परिबाधप्रसङ्गात् न चासतीति विरोधे वाधायुक्ता हेतुरैकान्तिकं कारणमिति। एकान्तशब्दो विनयादिषु द्रष्टव्यः नियतमव्यभिचारीत्यर्थः एतेन लौकिकस्य हेतोर्ग्रहणमिति दर्शयति न हि केवले कृञि प्रत्ययो जनकत्वं संभवतीति॥ ॥भावः॥ नेनु लौकिकेनापि हेतुना कर्त्तुर्विशेषणमयुक्तं अव्यभिचारात् न हि कर्त्तुर्निमित्तत्वमस्तीति सत्यं पुनर्हेतुशब्दोपादानादैकान्तिकत्वमाश्रीयते अन्यथा निमित्तमात्रमुपादीपेत अनुकूलता आराध्यचित्तानुवर्तनं। यशस्करी विद्येति। अत एकमीसादिनाविमर्द्दनीयस्य सत्वं॥ ॥५॥ ॥छ॥ ॥

॥दिवाविभा॥ ॥पश्चाद्योगमिति। तत्र दिवाशब्दोऽधिकरणभूतं तस्यार्थे वर्तत इति तस्य कर्मत्वानुपपत्तेः सुपीत्यनेनाभिसंबंधः शेषाणां तु कर्मणीत्यनेन यद्दितु शेषा भस्मभद्दिवा भस्मा रात्रिरिति विद्धि विषये कर्मत्वमभ्युपगम्यते तदा दिवाशब्दस्यापि कर्मणा त्वनेन संबंधः सकारस्येति भाशब्दस्य प्रसंगयसंनि योगेन सकारो निपात्यते तस्माद्भास्कर इत्यत्र विसर्जनीयजिह्वामूलीयौ न भवतः अथवा सकारस्य विसर्जनीयजिह्वामूलीयौ न भवतः कुतः निपातनात् तत्र स्करोतेति सूत्रे सकारोच्चारणमेव निपातनं। कारकर इति कर एव कारः प्रज्ञादित्वात्स्वार्थेऽण् अनंतकार इति अंतकशब्देन नञ् समासे ऽप्येतद्रूपं भवति

॥दिवाविभानिशाप्रभाभास्कारांतानंतादिबहुनांदीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजंघाबाह्व हर्यत्तद्धनुररुष्षु॥ ॥कर्मणि सुपीति चद्वयमप्यनुवर्त्तते तत्र यथायोगं संबंधः दिवादिषूपपदेषु करोतेर्हेतौ ष्ट प्रत्ययो भवति॰ अहेत्वाद्यर्थ आरंभः दिवाशब्दो ऽधिकरणवचनः सुपीत्यस्य विशेषणं दिवा करोति प्राणिनश्चेष्टायुक्ता निति दिवाकरः॰ विभां करोतीति विभाकरः॰ निशाकरः॰ चित्रकरः॰ क्षेत्रकरः॰ संख्या॰ एककरः॰ द्वि॰ प्रभाकरः॰ भास्कर सकारस्य निपातनाद्विसर्जनीयजिह्वामूलीयौ न भवतः॰ कारकरः॰ अंतकरः। अनंतकरः॰ आदिकरः॰ बहुकरः। नांदीकरः। किंकरः। लिपिकरः। लिबिकरः। बलिकरः। भक्तिकरः॰ कर्तृकरः॰ चित्रकरः॰ क्षेत्रकरः॰ संख्या॰ एककरः॰ द्वि करः॰ त्रिकरः॰ जंघाकरः॰ बाहुकरः॰ यत्करः तत्करः॰ धनुष्करः। अरुष्करः। किंयत्तद्बहुषु कृञो ऽज्विधानं॰ किंकरा॰ यत्करा॰ तत्करा॰ बहुकरा॰ अथवा अजादिषु पाठः कल्प्यते॥ ॥

स्वरे हि दोषः स्यात् सति शिष्टोऽव्ययस्वरं यदप्रकृतिस्वरः प्रसज्येत इष्यते चैवं प्रति कारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तत्वं। बहु कर इति बहुग्रहणं वैपुल्यवचनः संख्यावचनस्य तु संख्याग्रहणेनैव सिद्धं लिपिलिबिशब्दौ पर्यायौ। अहस्कर इति अहन्नरो सुपीति रेफः पूर्व वत्सत्वं धनुष्करः अरुष्कर इति नित्यं समासे नुत्तरपदस्थस्येति षत्वं। किंयत्तद्बहुषु कृञो ऽज्विधानमिति वार्त्तिकं न सूत्रस्य बाधितत्वाद्दप्यभावाद्दिवा दिष्वमत्र किंकरीत्यसाधुरित्यसाधुः क्वचिद्दृष्टः अथवा पचादिषु यावत्कल्प्यत इति तत्रायमर्थः इह किमाद्यस्य ग्रहणमपनीय पचादिष्वेव किंयत्तद्बहुषु

का॰ पद॰
६

॥कर्मणि॥ ॥कर्मणीति स्वरूपग्रहणमिति॰ अनुवृत्तेनैव कर्मणीत्यनेन विशेषणात् कर्मनिर्देश इति कर्मक्रियापातस्य निष्क्रयायस्येयं भक्तादि
द्रव्यमित्यर्थः॥ ॥स्तंबशकृतोः॥ ॥स्तंबकरिति निलात्कुड्मलपरस्य कृतिस्वरेणोत्तरपदमाद्युदात्तं भवति॥ ॥हरतेः॥ ॥पशौ कर्तरीति ए
तेन प्रत्ययार्थस्य कर्तुः पशुर्विशेषणं न तु तस्य बाधक इति दर्शयति धातोर्हि प्रत्ययविधानात्तदर्थस्य पेन संबंधस्तत्र गोचरप्रत्ययो भवितुमर्हति या

॥कर्मणि भृतौ॥ कर्मणीति स्वरूपग्रहणं॰ कर्मशब्द उपपदे कर्मवाचिनि करोतेष्टप्रत्ययो भवति भृतौ गम्यमानायां॰
भृतिर्वेतनं कर्मनिर्वेशः॰ कर्म करोतीति कर्मकरः॰ भृत्याविति किं कर्मकारः॥ ॥न शब्दश्लोककलहगाथावैरचाटुसूत्र
मंत्रपदेषु॥ ॥शब्दादिषूपपदेषु करोतेष्टप्रत्ययो न भवति॰ हेत्वादिषु प्राप्तः प्रतिषिध्यते॰ शब्दकारः श्लोककारः
कलहकारः गाथाकारः वैरकारः चाटुकारः सूत्रकारः मंत्रकारः पदकारः॥ ॥स्तंबशकृतोरिन्॥ ॥स्तंबश
कृत इत्येतयोः कर्मण्युपपदयोः इन्प्रत्ययो भवति॰ व्रीहिवत्सयोरिति वक्तव्यं॰ स्तंबकरिर्व्रीहिः शकृत्करिर्वत्सः
व्रीहिवत्सयोरिति किं॰ स्तंबकारः शकृत्कारः॥ ॥हरतेर्दृतिनाथयोः पशौ॥ ॥दृतिनाथ इत्येतयोः कर्मणो
रुपपदयोः इन्प्रत्ययो भवति॰ व्रीहिवत्सयोरिति वक्तव्यं॰ स्तंबकरिर्व्रीहिः शकृत्करिर्वत्सः व्रीहिवत्सयोरिति किं
स्तंबकारः शकृत्कारः॥ ॥हरतेर्दृतिनाथयोः पशौ कर्तरि इन्प्रत्ययो भवति॰ दृतिहरिः पशुः नाथहरिः पशुः पशाविति किं दृतिहारो
नाथहारः॥ ॥६॥ ॥

त्वर्थस्य च क्रियायाः साधनेन संबंधः पशुश्च द्रव्यं तु तस्याज्जातीयं स्तु स्वरूपेणावष्टेन शक्तिमद्रूपेणानन्तरं शक्तिरूपेणेति निजपरस्परार्थः स्वरूपेण प्रत्य
यार्थो भवितुमर्हतीति युक्तमुक्तं पशौ कर्तरीति एवं सर्वत्र प्रत्ययार्थविशेषणं द्रष्टव्यं ६॥ ॥७॥ ॥८॥ ॥९॥ ॥

राम॰
६

॥ ॥फलेग्रहिः॥ ॥उपपदस्यैकारांतत्वमिति छंदस्यकारांतत्वमपि दृश्यते यो वनस्पतीनां फलग्रहिरिति सकुक्षिंभरिवच्चकारेण समुच्चेतव्यः
॥ ॥छंदसि॥ ॥वनषणसंभक्तौ विजिगणोत्सहयरितयो भावे क्रियायां वग्रहणं न तु वनु याचने षणु दाने इत्तिनां क्रियायामिति भावः अत्रसा
हचर्यमेव हेतुः निरनुबंधकत्वं च वनषणवनिमितिविप्रलंबनं ति स्त्रंबनतीति विवक्षायामिन प्रत्ययः तदंतात् द्वितीयैकवचनं गोषणिमिति। गां सनती
तिविग्रहः पथिरक्षी इति यथा मंत्र्सेतरतिविग्रहः हविर्मथ्नातीति हविर्मथयः तेषां हविर्मथीनां॥ ॥एजेः खश्॥ ॥एपंतात् इ एजत्वधमि कानिर्दे

॥फलेग्रहिरात्मंभरिश्च॥ ॥फलेग्रहिः आत्मंभरी इत्येतौ शब्दौ निपात्येते· उपपदस्य एकारांतत्वं इन प्रत्ययश्च ग्रहेर्निपा
त्यते· फलानि गृह्णातीति फलेग्रहिर्वृक्षः आत्मन् शब्दस्योपपदस्य मुमागम इन् प्रत्ययश्च भृञो निपात्यते· आत्मानं बिभ
र्ति आत्मंभरिः अनुक्तसमुच्चयार्थश्चकारः कुक्षिंभरिः उदरंभरिः॥ ॥छंदसि वनसनरक्षिमथां॥ ॥वन षण संभ
क्तौ· रक्ष पालने· मथ विलोडने· एतेभ्यः कर्मण्युपपदे छंदसि विषये इन् प्रत्ययो भवति· ब्रह्मवनिं त्वा क्षत्रवनिं· गो =
षणिं· पथिरक्षी· अग्ने हविर्मथीनां·॥ ॥एजेः खश्॥ ॥एजृ कंपने इत्यस्मात् ण्यंतात् कर्मण्युपपदे खश्प्र =
त्ययो भवति· खकारो मुमर्थः· शकारः सार्वधातुकसंज्ञार्थः· अंगमेजयति अंगमेजयः· जनमेजयः· खश्प्रकरणे वा
वातशुनीतिलशर्धेषु अजधेट्तुदजहातीनामुपसंख्यानं· वातमजा मृगाः· शुनिंधयः· तिलंतुदः। शर्धंजहा माषा

शोन भवति खशः शित्करणात्तत्सार्वधातुकत्वे सति शप् अयास्यादिति न चैजेः प्रकृत्यंतस्य शपि सत्यसति वा विशेषोस्ति न चैवमिहार्थत्वं संभव
ति केवलोत्तरार्थत्वं पुंक्तं खित्करणं मुमर्थमिति अरुर्द्विषदजंतस्येति खित्कार्यपलक्षणमेतत् शुनिंधयः नाडिंधयः नासिकंधय इति खित्वमन
युस्याति रूपत्वमप्रयोजनं शकारः सार्वधातुकार्थ इति सार्वधातुकसंज्ञार्थ इत्यर्थः गातशुनीत्यादि वातादिषु यथासंख्यमुपपदेषु अजादि
भ्यो धातुभ्यः खश्प्रत्ययो भवतीति शर्धंजहा इति ओहाक् त्यागे जुहोत्यादित्वाच्छपः श्लौ द्विर्वचनेऽभ्यासस्य पोरत्व इसाकारलोपः॥ ॥ ॥

नासिका॥ ॥नासिकंधम इति या धा दिसूत्रेण धमादेशः तच्चेतरस्मादितरेतरा यथासंख्याभावहेतुमाह तच्चेतरत यथासंख्याभावलक्षणं कार्यं एते
न च कारणात् स्तनम् । ललेन सूत्रकारस्य आपत्र किंचिदिति पठितमिति तावत्स्यात् ततो नैतन्नोरस्तीयं उत्तरसूत्रवत्समस्तैकमभिसंबंधः कस्मान्न भवति
विपर्ययो वा कस्मान्न भवतीति स्तनंधयतीति अत्रैव ङीविषयतेनान्यत्रेत्याहुः॥ ॥नाडीमुष्ट्योः॥ ॥ घटिंधमः खरिंधम इति घटीचटः खरीग

॥नासिकास्तनयोर्ध्माधेटोः॥ ॥नासिकास्तनयोः कर्मणोरुपपदयोर्ध्माधेटोर्धात्वोः खश्प्रत्ययो भवति । यथासंख्य
मत्र नेष्यते । स्तने धेटः स्तनंधयः । नासिकायां तु ध्मश्च धेटश्च । नासिकंधमः नासिकंधयः तच्चेतन्नासिकास्तनयोरिति निर
भ्यासमिच्चारवितानल्पाच्तरस्य पूर्वनिपातेन लभ्यते । धेटष्टित्त्वात् स्त्रियां ङीप्प्रत्ययो भवति । स्तनंधयी॥ ॥नाडीमुष्ट्यो
श्च॥ ॥नाडीमुष्टिरित्येतयोः कर्मणोरुपपदयोर्ध्माधेटोः खश्प्रत्ययो भवति अत्रापि अंतरस्य पूर्वनिपातो लक्षणव्यभि
चारचिह्नं तेन संख्यातानुदेशो न भवति नाडिंधमः मुष्टिंधमः नाडिंधयः मुष्टिंधयः अनुक्तसमुच्चयार्थश्चकारः घटिंधमः
घटिंधयः खरिंधमः खरिंधयः वातंधमः वातंधयः॥ ॥उदि कूले रुजिवहोः॥ ॥रुजो भंगे । वह प्रापणे । एताभ्यामुत्पू
र्वाभ्यां कूले कर्मण्युपपदे खश्प्रत्ययो भवति । कूलमुद्रुजतीति कूलमुद्रुजो रथः । कूलमुद्वहः॥ ॥वहाभ्रे लिहः॥ ॥
वहाभ्र इत्येतयोः कर्मणोरुपपदयोः लिहेर्धातोः खश्प्रत्ययो भवति । वहं लेढीति वहंलिहो गौः अभ्रंलिहो वायुः॥७॥

ष्टीजातिलक्षणो ङीष् पूर्वाणीत्यमेतेपदं तिस्त्वयथिमात्र वचनः वा वशादेन द्वः॥ ॥उदि कूले॥ ॥यत्र प्रत्येकमुपपदत्वमिष्टमिति तत्र समुदाय
स्य सप्तमीमुच्चारयति यथा नाडीमुष्ट्योरिति इह तु विपर्ययः कृतः तस्मादुदीति सप्तमी कूल इति त्वर्थनिरपेक्षेणोपपदसंज्ञायां लिंगं तत्र च वतेः प्रा
ग्धातोरिति उत्पूर्वस्य धातोः प्राक्प्रयोगः ततः सर्वः कूलशब्दः तदेतद्दर्शितं उत्पूर्वाभ्यां कूले कर्मण्युपपद इति॥ ॥७॥ ॥ ॥

॥३३॥३३॥

॥ ॥परिमाणे॥ ॥परिमाणशब्दः काष्ठादिनिर्मितप्रस्थादौ वर्त्तते न तत्परिच्छिन्ने द्रव्ये वाचिना पचिना पचिना कर्मत्वेनान्वयः अतो न स्वरूपग्रहणं
किं तर्हि तद्विशेषाः प्रस्थादयो गृह्यंते ते च परिमाणे परिमेये च द्रोणादौ च वर्त्तंते तत्र परिमाणनिष्ठानां न पचिनान्वय इति परिमेयनिष्ठेषु प्रत्ययः ने
र्हि परिमाणवाचित्वं। न परिमाणे आरोपेणाय परिमेये प्रस्थादिशब्दस्य प्रवृत्तेः॥ ॥मितनखे च॥ ॥नखंपचेति पचिस्त्रेतायवचनः॥ ॥विध्वरु
षोः॥ अरुंतुद इति अरुर्मर्म तंतस्य मुमिति उकारान्तस्य मुमः प्रयोगात् सलोपः॥ ॥असूर्य॥ ॥असूर्यंपश्य इति पाठ्या दिस्त्रेणापर्षदेशः

॥परिमाणे पचः॥ ॥परिमाणं प्रस्थादि तस्मिन् कर्मण्युपपदे पचेः खश्प्रत्ययो भवति· प्रस्थंपचति प्रस्थंपचा स्थाली·
द्रोणंपच· खारिंपच४ कटाहः॥ ॥मितनखे च॥ ॥मितनखयोः कर्मण्युपपदयोः पचेः खश्प्रत्ययो भवति· अपरि
माणार्थ आरंभः· मितंपचति मितंपचा ब्राह्मणी· नखंपचा यवागूः॥ ॥विध्वरुषोस्तुदः॥ ॥विधु अरुस् इत्येतयोः कर्म
णोरुपपदयोः तुदेर्धातोः खश्प्रत्ययो भवति। विधुंतुदः· अरुंतुदः॥ ॥असूर्यललाटयोर्दृशितपोः॥ ॥असूर्यलला
ट इत्येतयोः कर्मणोरुपपदयोर्यथासंख्यं दृशितपोर्धात्वोः खश्प्रत्ययो भवति· असूर्यंपश्या राजदाराः· ललाटंतप आदि
त्यः· असूर्य इति चासमर्थसमासोयं दृशिना नञः संबंधात्· सूर्यं न पश्यंतीति· गुप्तिपरं चैतत् एवं नाम गुप्ता यदपरिहा
र्यदर्शनमपि सूर्यं न पश्यंतीति॥ ॥उग्रंपश्येरंमदपाणिंधमाश्च॥ ॥उग्रंपश्य इरंमद पाणिंधम इत्येते शब्दा निपात्यं
ते· उग्रंपश्यतीत्युग्रंपश्यः। इरया माद्यतीति इरंमदः· पाणयो ध्मायंते येष्विति पाणिंधमाः पंथानः॥ ॥छ॥ ॥

गुप्तिपरं चैतदिति यदेतद्वचनं असूर्यंपश्या राजदारा इति एतद्गुप्तिप्रधानं तेन सत्यपि सूर्यदर्शने प्रयोगो न विरुध्यत इति भावः गुप्तिपरत्वमेव प्रकटयति ए
वं नामेति॥ ॥उग्रंपश्य॥ ॥उग्रंपश्यतीति क्रियाविशेषणमेतत्॥ ॥इरंमद इति इरमदी हर्षे दिवादिरिलाच्छ्यनि प्राप्ते तदभावो निपातनात् इरा उदकं
पाणिंधमाः पंथान इति ते पुनर्येषु गाढछिद्रेषु सर्पादिभयनोदनाय पाणयो ध्मायंते शब्द्यंते॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥प्रियवशे॥ ॥चकारः खचित्ह्रस्व इति विशेषणार्थ इति वेद्ह्रस्वः इत्युच्यमाने एजेः खश् इत्यंगमेजयः जनमेजयः अत्रापि प्राप्नोतीति एकानुबंधकग्रहणे
न द्व्यनुबंधकस्येत्यत्र न भविष्यति इह तर्हि कुलात्खः कुलीनः पसेतिलोयनिदृत्तपेद्ह्रस्वः स्यात तत्रधातुप्रत्ययस्य ग्रहणात् तस्मकारण सहचर्यात्तस्य
पचितप्रयोक्तुनस्यकारः प्रत्ययान्तस्करणमुच्चार्थमिति द्विषंतपः स्तत्र ह्रस्वणिलोपो यथास्यात् आश्रमभाभूदिति यथेवमुत्तरत्रैव कर्तव्यः इह कारणो किं प्रयो
अनेमयोपि भवतीति ज्ञापनार्थं तत्र गमेः सुप्युपसंख्यानमिति नवक्तव्यं भवति मितंगम इति अस्त्रार्थमिदं ज्ञायांनुगमस्थेति व क्ष्यमाणेनैव सिद्धं॥
द्विषत्परयोः॥ ॥द्विषंतप इति सुमिसंयोगांतलोपः द्विनकाकोनिर्देश इति नत्रेकेन द्विषच्छब्दो विशिष्यते तकारो नोयाद्विषच्छब्द इति सोत्र लान्निर्दि

॥प्रियवशे वदः खच्॥ ॥प्रियवश इत्येतयोः कर्मण्युपपदे योर्वदेर्द्धातोः खच्प्रत्ययो भवति॰ प्रियंवद इति प्रियंवदः वशंवदः चकाः
रः खचि ह्रस्व इति विशेषणार्थः खकारो मुमर्थः मस्यातारुणस्य मुख्यार्थे खच्प्रकरणे गमेः सुप्युपसंख्यानं॰ मतंगमो हस्ती॰ मे
तंगमाहस्तिनी॰ विहायसो विह च॰ विहायसा गच्छति विहंगमः॥ खच्चडिद्वा वक्तव्यः विहंगः विहंगमः डे च विहायसो विहादे
शो वक्तव्यः विहगः॥ ॥द्विषत्परयोस्तापेः॥ ॥द्विषत्परयोः कर्मणोरुपपदयोस्तापेर्द्धातोः खच्प्रत्ययो भवति॰ तपदाहे चु
रादिः तपसंतापे भूवादिः द्वयोरपि ग्रहणं॰ द्विषंतं तापयति द्विषंतपः परंतपः द्विषत्परयोरिति द्वितकारको निर्देशः तेन स्त्रियां
न भवति॰ द्विषंतीतापयतीति द्विषतीतापः॥ ॥वाचियमो व्रते॥ ॥वाक् शब्दे कर्मण्युपपदे यमेर्द्धातोः खच्प्रत्ययो भवति
व्रते गम्यमाने॰ व्रत इति शास्त्रितो नियम उच्यते वाचंयम आस्ते॰ व्रत इति किं वाग्यामः॥ ॥८॥ ॥

शब्दविशेषणास्य परनिपातः तेन स्त्रियां न भवतीति॰ अन्यथा लिंगविशिष्टपरिभाषया स्यादेव प्रसंग इति भावः॥ ॥वाचियमः॥ ॥शास्त्रित इति शा
स्त्रशब्दाद्विधाने धात्वर्थे णिच् तदंतात् कर्मणि क्तः शास्त्रे विहितः इत्यर्थः शास्त्रितः नियम इति संकल्पविशेषः वाचंयम इति वाचंयमपुरंदरौ चेति पू
र्वपदस्यामत्वं ततएव तर्हि निपातनात् प्रयोभविष्यति व्रतादन्यत्रापि तर्हि प्राप्नोतीति तत्रैव व्रतग्रहणं करिष्यते वाचंयमो व्रते पुरंदरश्चेति तदेतच्चिंत्यं प्रयो
जनं एतेन पुरंदरो व्याख्यातः वाग्याम इति यो शक्त्यादिना वाचं यच्छति तत्राणेव भवति॥ ॥८॥ ॥७॥ ॥ ॥ ॥

॥ पूः सर्वयोः॥ ॥ दारिदारणाइत्यस्य ग्रहणं नद् भयेदङः आदरे इत्यतयोरिसुपदेशः॥ असंज्ञार्थेसहित्ग्रहणं संज्ञायां तु वसति। सर्वंसहो राजेति। सर्वं
संपादयितुं समर्थ इत्यर्थः॥ ॥ मेघर्त्ति॥ ॥ करोतेरिति कृणोतेस्तु धर्वकदेवग्रहणं शिक्षकः इत्यपि छंदसि दृष्ट्वते शिवएकोध्येयः शिवंकरणात्
॥ ॥ आशिते॥ ॥ अत्रसुपीत्युपतिष्ठत इति न तु कर्मणीति भवतेरकर्मकत्वात् सोयमगसिस्याद्यर्थो वृत्त्वचान भवितमम न भिधानादिति भा
वः आशितशब्दोयमत्रा भोजनवृत्त्यस्मात् दासदृप्रभृतिदानविहितेकर्मणिकर्त्तरिक्तप्रत्ययो जोगत्यते आशितः कर्त्तेतियस्याघुदात्तत्वविधास्यते य

॥ पूः सर्वयोर्दारिसहोः॥ ॥ पुरसर्वइत्येतयोः कर्मण्युपपदयोर्यथासंख्यं दारिसहोर्धात्वोः खच्प्रत्ययो भवति। पुरंदरय
तिपुरंदरः सर्वंसहो राजा भगवद्दारैरितिवक्तव्यं भगंदरः॥४१॥ सर्वकूलाभ्रकरीषेषु कषः॥ सर्वकूलअभ्रकरीषइत्येतेषु
कर्मस्पुपपदेषु कषेर्धातोः खच्प्रत्ययो भवति। सर्वंकषतिसर्वंकषः खलः। कूलंकषा नदी। अभ्रंकषो गिरिः। करीषंक
षा वात्या॥४२॥ मेघर्त्तिभयेषु कृञः॥ ॥ मेघ ऋति भय इत्येतेषु कर्मस्पपदेषु कृञः खच्प्रत्ययो भवति। मेघंकरः। ऋतिं
करः। भयंकरः। उपपदविधौ भयादिग्रहणं तदन्तविधिं प्रयोजयति। अभयंकरः॥४३॥ क्षेमप्रियमद्रेऽण्च॥ ॥ क्षेमप्रियमद्र
इत्येतेषु कर्मस्पुपपदेषु करोतेरण्प्रत्ययो भवति चकारात्खच्च। क्षेमकारः। क्षेमंकरः। प्रियकारः। प्रियंकरः। मद्रकारः। मद्रंकरः।
वेति वक्तव्ये ण्ग्रहणं हेत्वादिषु टप्रतिषेधार्थं॥४४॥ आशिते भुवः करणभावयोः॥ ॥ अत्रसुपीत्युपतिष्ठते। आशित
शब्दे सुवन्त उपपदे भवतेर्धातोः करणे भावे चार्थे खच्प्रत्ययो भवति। आशितो भवत्यनेन आशितंभवः ओदनः। भावे
आशितस्य भवनम् आशितंभवं वर्त्तते॥४५॥ ॥

स्तु धीमतां गतिप्रसववसानार्थेभ्य इति भावकर्माधिकरणेषु क्तः। न तदन्तो गृह्यते अनभिधानादित्यादुः॥ अन्ये त्वशोर्व्यपि तान्यपोऽस्येकर्मणि क्तप्रसये
कृतेय आशितशब्दः संगृह्यते एव मा आशितः कर्त्तेति यस्याघुदात्तत्वं तत्रापि प्रयोज्य एव भूतपूर्वगत्या कर्त्तृत्वं भवतीति बुद्धिमत्यवसानार्थेति अणौ क
र्तुर्णौ कर्मसंज्ञाविधानात् तथा च कृषन्निस्फाल आशितं करणो नीति आघुदात्तस्याव ग्रहो न दृश्यते कर्तृग्रहणं तु तत्र भावनिवृत्त्यर्थमिति। आशि
तंभाव ओदन इतियावनोदनेनातिथ्यादिराशितो भवतिमप्येवमुच्यते॥ ॥

॥संज्ञायां॥ ॥संज्ञावशादित्यादि शत्रुंतप इत्यादौ यत्र कर्मार्थानुगमस्तत्र कर्मणीति संबध्यते यत्र तु न रथंतरमित्यादौ तत्र सुपीति। अरिंदम इति। अरिंतमं
वितरार्थी इति। सकर्मको भवति॥ ॥गमश्च॥ ॥गमश्च॥ ॥योगविभाग उत्तरार्थ इति उत्तरत्र गमेरेवानुवृत्तिर्यथा स्यात् भृ तॄ प्रभृतीनां मा भू
त्॥ ॥अंतात्यंत॥ ॥अनुबंधकरणसामर्थ्यादिति। श्रवणार्थत्वाड्डकारो न भवति पादस्य पद्यात्यातिगोपहातच्चिति कृतटिलोपस्य डप्रत्ययांत

॥संज्ञायां भृतॄवृजिधारिसहितपिदमः॥ ॥कर्मणीति च सुपीति च प्रकृतं संज्ञावशाद्यथासंभवं संबध्यते· भृ·तॄ·वृ·जि·धारि·
सहि·तपि·दम इत्येतेभ्यो धातुभ्यः संज्ञायां विषये खच् प्रत्ययो भवति· विश्वंभरा· वसुंधरा· रथंतरं साम· पतिंवरा कन्या· शत्रुंजयो ह
स्ती· युगंधरः पर्वतः· शत्रुंसहः· शत्रुंतपः· अरिंदमः· संज्ञायामिति किं कुटुंबं बिभर्त्तीति कुटुंबभारः॥४६॥ ॥गमश्च॥
गमेर्धातोः सुप्युपपदे संज्ञायां विषये खच् प्रत्ययो भवति· सुतंगमो नाम यस्य पुत्रः सौतंगमिः। योगविभाग उत्तरार्थः॥४७॥
॥अंतात्यंताध्वदूरपारसर्वानंतेषु डः॥ ॥संज्ञायामिति नानुवर्त्तते· अंत अत्यंत अध्वन् दूर पार सर्व अनंत इत्येतेषु कर्मस्युपप
देषु गमेर्डप्रत्ययो भवति। अंतगः· अत्यंतगः· अध्वगः· दूरगः· पारगः· सर्वगः· अनंतगः। डकारष्टिलोपार्थः· डित्यभस्या
प्यनुबंधकरणसामर्थ्यादिति· डप्रकरणे सर्वत्र पन्नपोरुपसंख्यानं· सर्वत्रगः· पन्नगः· उरसो लोपश्च· उरसा गच्छतीत्युरगः·
सुदुरोरधिकरणे· सुखेन गच्छत्यस्मिन्निति सुगः· दुर्गः· निरो देशे· निर्गो देशः। अपर आह डप्रकरणेऽन्येष्वपि दृश्यत इति·
स्त्र्यगारगः· ग्रामगः· गुरुतल्पगः॥४८॥ ९ ॥ ॥

स्य निर्देशात्· अत्यंतानंतयोर्ग्रहणमनर्थकं अंतशब्दोऽत्र गत्यनंतेन कर्मणो विशेषणात् तदंतविधिर्भविष्यति उपपदविधौ तु न सर्वत्र तदंतविधिः
उपपदविधौ तदाद्यादिग्रहणमिति नियमात् पन्नपतितं पथगच्छतीति पन्नगः सुदुरोरधिकरण इति कर्मणि खल्वेव भवति सुगमो दुर्गम इति।
अन्यत्रापि दृश्यत इति। एवं च सूत्रमपि प्रपंचार्थं॥ ॥९॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥ ॥, ॥छ॥ ॥ ॥

॥आशिषि॥ ॥दारावितिदारुशब्दृइत्यर्थः शत्रूयि क्षयाधुल्लिंगत्वात् विधानार्थं वचनम् अण्कर्मण्यणित्येवसिद्धः अंतग्रहणं विस्पष्टार्थं अलोत्पन्ने
एव सिद्धे॥ ॥कुमार॥ ॥सुप्यजातावितिसिद्धेः ताच्छील्यार्थमिदं वचनं शिरसः शीर्षभावार्थं च॥ ॥लक्षणे॥ ॥लक्षणवतीतिएतेनाईआ

॥आशिषि हनः॥ ॥इतिवर्तते· आशिषि गम्यमानायां हंतेर्धातोः कर्मण्युपपदे डप्रत्ययो भवति· तिमिं वध्यात्
तिमिहः· शत्रुहः· आशिषीतिकिं· शत्रुघातः· दाराबाहनोणंतस्य चटः संज्ञायां· दारावुपपदे आङ्पूर्वाद्धंतेरण्प्रत्ययो भ
वति अंतस्य च टकारआदेशो भवति संज्ञायां विषये। दारुमाहंतीति दार्वाघाटः· चार्वाघाटः· आङ्पूर्वाद्धंतेश्चारावुपपदे अ
ण् अंतस्य चाटकारादेशः। चार्वाघाटः चार्वाघातः। कर्मणि समि च· कर्मण्युपपदे संपूर्वाद्धंतेरण्प्रत्ययः अंतस्य च वा
टकारादेशः· वर्णान् संहंतीति वर्णसंघाटः वर्णसंघातः पदसंघाटः पदसंघातः॥ ॥अपे क्लेशतमसोः॥ ॥अपपूर्वाद्धंतेः
क्लेशतमसोः कर्मणोरुपपदयोर्डप्रत्ययो भवति· क्लेशापहः पुत्रः तमोपहः सूर्यः अनाशीरर्थ आरंभः॥ ॥कुमा
रशीर्षयोर्णिनिः॥ ॥कुमारशीर्षयोः कर्मणोरुपपदयोर्हंतेर्धातोर्णिनिप्रत्ययो भवति· कुमारघाती· शीर्षघाती·
निपातनाच्छिरसः शीर्षभावः॥ ॥लक्षणे जायापत्योष्टक्॥ ॥हंतेर्धातोर्जायापत्योः कर्मणोरुपपदयोर्लक्षण
वति कर्तरि टक्प्रत्ययो भवति· जायाघ्नो ब्राह्मणः पतिघ्नी वृषली· अथवा लक्षणे घोत्ये टक्प्रत्ययः॥ ॥छ॥ ॥

घन्प्रत्ययांतो लक्षणशब्द इति दर्शयति एतच्च मतत्रांतरं आदेवाव सीयते केवले हि लक्षणे उत्तरसोव सिद्धः प्रत्ययः। जायाघ्नो ब्राह्मण इत्यस्याति
लकालकादि जायामरणलिंगमस्तिमतांहंतीतिगौणोवादः एतेन पतिघ्नीव्याख्याताग्रमहनेसुपधालोपः टिताङीप्॥ ॥छ॥ ॥

का० पर०
७१

॥अमनुष्य॥ ॥अमनुष्यशब्दो रक्षःपिशाचादिषु रूढ इति पूर्वमुक्तमिह तु मनुष्यादन्यः सर्व एव गृह्यते। न तु यथा पूर्वस्मिन्सूत्रे लक्षणग्रहणं प्रत्ययार्थस्य कर्तुर्विशेषणं एवमिहाप्यमनुष्यग्रहणं भविष्यतीति नार्थः कर्तृग्रहणेन अमनुष्यस्तु अमानेउपपदत्वमपि विज्ञायेत तस्मात्कर्तृग्रहणं कृतघ्नशब्दो मूलविभुजादिषु द्रष्टव्यः॥ ॥शक्तौ हस्ति॥ ॥विषेण हस्तिनं हन्तीति। न ह्यत्राप्यशक्तस्य कर्तृत्वानुपपत्तेरस्त्येव

॥अमनुष्यकर्तृके च॥ ॥अमनुष्यकर्तृके धात्वर्थे वर्तमानात् हन्तेर्धातोः कर्मण्युपपदे टक्प्रत्ययो भवति। जायाघ्नस्तिलकालकः। पतिघ्नी पाणिरेखा। वातघ्नं तैलं। श्लेष्मघ्नं मधु। अमनुष्यकर्तृके इति किं। आखुघातः शूद्रः। इह कस्मान्न भवति। चौरघातो हस्ती। कृत्यल्युटो बहुलमिति बहुलवचनादणु भविष्यति॥ ॥शक्तौ हस्तिकवाटयोः॥ ॥शक्तौ गम्यमानायां हस्तिकवाटयोः कर्मणोरुपपदयोर्हन्तेर्धातोष्टक्प्रत्ययो भवति। मनुष्यकर्तृकार्थोयमारम्भः। हस्तिनं हन्तुं समर्थः हस्तिघ्नो मनुष्यः। कवाटघ्नश्चौरः। शक्ताविति किं। विषेण हस्तिनं हन्ति हस्तिघातः॥ ॥पाणिघताडघौ शिल्पिनि॥ ॥पाणिघताडघ इत्येतौ शब्दौ निपात्येते शिल्पिनि कर्तरि वाच्ये। पाणिताडशब्दयोः कर्मणोरुपपदयोर्हन्तेर्धातोष्टक्प्रत्ययो भवति तस्मिंश्च टिलोपो घत्वं च निपात्यते। पाणिघः। ताडघः। शिल्पिनीति किं। पाणिघातः। ताडघातः। राजघ उपसंख्यानं। राजानं हन्तीति राजघः॥ १० ॥ ॥

शक्तिः सत्त्वं शक्तिग्रहणसामर्थ्यात्प्रकर्षविज्ञानादन्यनिरपेक्षस्वबलेनैव हन्तुं या शक्तिः सा गृह्यते तद्दर्शयति हस्तिनं हन्तुं समर्थः हस्तिघ्नो मनुष्य इति एवं च हस्तिनं हन्तुमाज्ञावधीत् सामर्थ्ययोगात् हस्तिघ्नस्तु अनेकं यात्यतिप्रविशत इति कपाटशब्दं ब्रुवाणः कवाटमिति तु प्रसिद्धः तत्राटतेः पचाद्यच् कवत् चोष्णे इति योगविभागात् कोः कवादेशः॥ १०॥ ॥

राम०
७१

।। ।। आढ्यसुभग।। ।। आढ्यादिष्विति। अनेन आढ्यादीनामुपपदत्वं दर्शयति। करणे कारक इत्यनेनापि करणस्य प्रत्ययार्थत्वं। अथैवं कस्मान्न विग्र
हः करणे उपपदे आढ्यादिषु कर्तृष्विति उच्यते च्व्यर्थेष्वच्वाविति वचनात् आढ्यादिशब्दाः स्वरूपप्रधानाः न च शब्दानां कर्तृत्वमुपपद्यते ननु च
च्व्यन्तेन करोतिना सुखेनाढ्यशब्दस्य स्वतन्त्रस्यापि कर्तृत्वं संभवति एवं तर्हि आरम्भानात्र्थानां अभिपतेः अच्वाविति नत्वनेष्वोवक्तुं द्विर्वा अच्व्यन्त
स्यार्थः प्रत्येकं संबंधात्वेकवचनं। कथं पुनश्च्व्यर्था अच्व्यन्ताश्च भवंतीत्याह चेर्विकल्पेन विधानादिति। आढ्यंकरणमिति ख्युनः खकारो मुमर्थः लिं
गविशिष्टपरिभाषया स्त्रीलिंगे आढ्यादिषूपपदेषु कृत्स्वार्थश्च नकारः स्वरार्थः योस्यादेशः अमर्यं ज्ञापयंतीत्यर्थ इति। अनेकार्थत्वाद्धातूनां तेनात्र प्रा

।। आढ्यसुभगस्थूलपलितनग्नांधप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्।। ।। आढ्यादिषु कर्मसूपपदेषु च्व्यर्थेष्वच्व्यन्तेषु
करोतेः करणे ख्युन् प्रत्ययो भवति। च्वेर्विकल्पेन विधानाद्द्विविधाश्च्व्यर्थाश्च्व्यन्ता अच्व्यन्ताश्च तत्र अच्व्यन्ताः पर्युदस्यंते। अना
ढ्यमाढ्यं कुर्वंत्यनेन आढ्यंकरणं। सुभगंकरणं। स्थूलंकरणं। पलितंकरणं। नग्नंकरणं। अंधंकरणं। प्रियंकरणं। च्व्यर्थेष्वि
ति किं आढ्यं तैलेन कुर्वंति। आढ्यमभ्यंजयंतीत्यर्थः। प्रकृतेरविवक्षायामभूततद्भावेपि प्रत्युदाहरणं भवति। अच्वावि
ति किं आढ्यीकुर्वंत्यनेन। ननु च ख्युना मुक्ते ल्युडपि भवितव्यं ल्युटः ख्युनश्च विशेषो नास्ति किं प्रतिषेधेन। एवं तर्हि प्रति
षेधसामर्थ्यात् ख्युनि सति ल्युडपि न भवति। तेन ल्युटोप्ययमर्थतः प्रतिषेधः।। ।।

गनाढ्यः सन्नाढ्यः क्रियत इति अभूततद्भावाभावः भवतु वा भूततद्भावः तथापि युक्तमेवेदं प्रत्युदाहरणमित्याह प्रकृतेरविवक्षायामिति। प्र
कृतिरेव परिणामित्वेन यत्र विवक्ष्यते यथा तंतवः पटो भवंतीति तदा च्विप्रत्ययः तथा च वार्त्तिकं प्रकृतिविवक्षाग्रहणं चेति प्रकृतिः कार्य
स्य पूर्वावस्था अच्वाविति किमिति। अस्य च समाधानमभिप्रायः। आविष्करोति ननु चेति ल्युटात्र भवितव्यमिति। करणाधिकरणयोश्चेति न च ल्यु
टः ख्युनश्च विशेषोस्तीति ल्युटि तावदाढ्यीकरणमिति रूपं ख्युनोपि लित्स्वरेणोत्तरपदाद्युदात्तत्वं ख्युन्यपि नित्स्वरेणाद्युदात्तत्वं खित्सत्त्वमयप्य
अरुर्द्विषदजंतस्य मुमिति ह्रस्वत्वं मुम् च न भवत्यस्य विधीयते अंतोदात्तत्वमप्यूर्ध्वादिषु उच्चैरिति निपातनात् स्त्रियामप्युभयत्र टिड्ढाणञि
त्यादिना ङीप् भवति अतो रूपे स्वरे च नास्ति विशेषः।। ।।

का॰प॰
७२

॥उत्तरार्थश्चेति उत्तरसूत्रे खिष्णुच्खुकञ्भ्यां मुक्तेऽलङ्कारादिभिर्भवितव्यमित्यादि विशेषः कथं तर्हि पूर्वमुक्तं प्रतिषेधसामर्थ्यादिति अस्मिन् सूत्रे प्रतिषेधसामर्थ्यादिति भावः केवलोत्तरार्थत्वे हि तत्रैवाच्चाविति वक्तव्यं स्यात् यथा वक्ष्यते रहसि कि चित्रणोरिति। भाष्ये तूत्तरार्थत्वमेव स्थितं॥ ॥कर्त्तरि भुवः॥ ॥कर्त्तृग्रहणं करणनिवृत्त्यर्थं पुनरर्थं वा खकारो मुमर्थः चकारः स्वरार्थः ञकारो वृद्ध्यर्थश्च किमर्थो खिष्णुजिकारादिः क्रियते नन्वेतु इष्णे वो ज्येत तत्राप्यमप्यर्थः स्वार्थेश्च कारो न कर्त्तव्यो भवति प्रत्ययस्वरेणैव सिद्धं केनेति णी मिकारादित्वे सिद्धमिति तत्राह उदात्तत्वादिति भवति रयमुदात्तः तस्योदात्तत्वादिडू विष्यति। नजस्त्विति नजस्तिर्यं चमीत जश्न्तस्य खिष्णुजतेस्य स्वरसिद्ध्यर्थमित्यर्थः यद्ययमिकारादिर्न क्रियेत ततः स्तस्य

॥उत्तरार्थेव प्रतिषेधः क्रियते॥ ॥कर्त्तरि भुवः खिष्णुच्खुकञौ॥ ॥आढ्यादिषु सुबन्तेषु च्व्यर्थेषु च्वौ तेषूपपदेषु भवतेर्द्धातोः कर्त्तरि कारके खिष्णुच्खुकञौ प्रत्ययौ भवतः आढ्यंभविष्णुः आढ्यंभावुकः सुभगंभविष्णुः सुभगंभावुकः स्थूलंभविष्णुः स्थूलंभावुकः पलितंभविष्णुः पलितंभावुकः नग्नंभविष्णुः नग्नंभावुकः अन्धंभविष्णुः अन्धंभावुकः प्रियंभविष्णुः प्रियंभावुकः कर्त्तरीति किं करणे मा भूत् च्व्यर्थेष्वित्येव आढ्यो भविता अच्वावित्येव आढ्यीभविता उदात्तत्वाद्भुवः सिद्धमिकारादित्वमिष्णुचः नजस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्यते ११॥

ए॰म॰
७२

पीरिक्तसोके षणुच्चावर्वाद्यश्चेत्यस्य ग्रहणं न स्यात् अस्य च कारभागात् अथास्यापि चकारः क्रियेत एवमपि लाक्षणिकत्वात् खत्वणत्वयोश्चासिद्धत्वादिष्णुजिति रूपाभावाद्ग्रहणं न स्यादेवमतः इकारादित्वं क्रियते ननु च सत्यपीकारादित्वे नरदनुबन्धकग्रहणे नात दनुबन्धकस्य एकानुबन्धकग्रहणे न घ्यनुबन्धकस्येति वालंकृञादीष्णुच एव ग्रहणे न भवितव्यं नास्य इकारोच्चारणसामर्थ्यादस्यापि ग्रहणं भविष्यतीति मन्यते यद्येवं भ्राजजयमस्तु तत्र षत्वणत्वयोश्चकारस्य चकरणसामर्थ्याद्दृष्टि कृतेऽस्यापि ग्रहणं सिद्धमिति चिंत्यं प्रयोजनमिकारादित्वे॥ ११॥ ॥ ॥

॥स्पृशोनुदके॥ ॥ननुचेत्यादि॥ सुपिस्थ इत्यतोऽकर्मसकर्मकेषु कर्मण्येवोपतिष्ठते अन्यत्र सुपीति तिनत श्च सुबंत उपपदे क्विन प्रत्यय इत्युक्तमनुपपन्न
मिति भावः तत्कर्तृप्रचयार्थमिति कर्त्तरि क्विरित्येव कर्त्तरि क्विनः सिद्धत्वात्कर्त्रनुवृत्तेर्नास्ति प्रयोजनमस्तीति भावः कर्तृप्रचयो लभ्यत इति कर्मणि सुप
पदे एकः कर्त्ता कारणीभावाय इत्येवं प्रचयो भवति घृतस्पृगिति क्विन प्रत्ययस्य कुरिति शकारस्य खकारः सोऽसिद्धत्वेनांतरतेम्यात ज्झलां जशोंते

॥स्पृशोनुदकेक्विन्॥ ॥स्पृशेर्धातोरनुदके सुबंत उपपदे क्विन्प्रत्ययो भवति॥ ननु च सकर्मकत्वात्स्पृशेः कर्म
ण्युपपदत्वे प्राप्नोति॥ नैष दोषः कर्त्तरीति पूर्वसूत्रात्सनुवर्त्तिष्यते॥ तत्कर्तृप्रचयार्थं विज्ञास्यते॥ सुबंतमात्र उ
पपदे कर्तृप्रचयो लभ्यते। घृतं स्पृशतीति घृतस्पृक्॥ मंत्रेण स्पृशतीति मंत्रस्पृक्॥ अनुदके इति किं उदकस्पृ
र्शः॥ नकारः क्विन्प्रत्ययस्य कुरिति विशेषणार्थः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

क्विनः ककारो गुणवृद्धिप्रतिषेधार्थः इकारो वेरपृक्तस्येति विशेषणार्थः नकारः किमर्थः एकाज्भ्योस्य यं विधीयते तत्र धातुस्वरेणैव सिद्धं यस्त
र्हि नेकाच दधृगिति व स्त्येत दृषे र्द्विर्वचनं अंतोदात्तत्वं चेति एवं तर्हि क्विन्प्रत्ययस्य कुरिति विशेषणार्थः। क्विप्रत्यय सेत्युच्यमाने मह देहः स्यात
केः क्विपो वा निर्दिष्ट इति क्वेरपि निर्दिष्ट पकारस्यानुच्चिवेति द्विर्वचनं॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

का॰ पद॰

७३

॥ऋत्विक्॥ ॥ऋतौ यजतीति वसंतादिके ऋतुं यजतीति यस्मिन्योगे ऋतुर्हविर्दत्ता यथा वसंताय कपिंजलानालभते ग्रीष्माय कलविंकानित्यादि तुपशूनालभोते ग्रीष्मोहेमंत उत्तमो वसंतः शरद्वर्षा इत्यादौ तदृतिप्रापमेतत्। ऋतुप्रयुक्तो वेति वसंते ज्योतिषा यजेतेत्यादौ यष्टत्वमिति तदभिप्रा यमेतत् याज्यत्वं वेति। अन्यथा मासपर्यायोगीति निषेधः स्यात् सुबंतमात्र इति। अन्यथा सकर्मकत्वाल्कर्मण्येव स्यात्। केवलादेवेति एतत्तु क्विपि विधा नसामर्थ्यादपि लभ्यते न हि सोपपदाद्युजेः क्विनि क्विपि वा विशेषो स्ति कुत्वस्य चोः कुरित्यनेनैव सिद्धत्वात् अनुपपदे तु युजेरसमासइति तु

॥ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचां च॥ ॥ऋत्विगाद्याः पंच शब्दाः क्विन्प्रत्ययांता निपात्यंते अपरे त्र योधातवो निर्दिश्यंते ऋतुशब्द उपपदे यजेर्धातोः क्विन्प्रत्ययो भवति ऋतौ यजति ऋतुं वा यजति ऋतुप्रयुक्तो वा यजति ऋत्विक् हरिरेषा यथा कथंचिद्वलांतत्वात् धृषेः क्विन्प्रत्ययः द्विर्वचनमंतोदात्तत्वं च निपात्यते सृजेः कर्म णि क्विन् अमागमश्च निपात्यते स्रक् दिशेः कर्मणि क्विन्प्रत्ययो निपात्यते दिशंति तामिति दिक् उत्पूर्वात् ष्णिहेः क्विन्प्रत्ययः उपसर्गांतलोपः षत्वं च निपात्यते उष्णिक् अंचु युजि क्रुंच इत्येतेषां क्विन्प्रत्ययो भवति निपातनैः सह निर्देशात् नापि किंचिद्लाक्षणिकमस्ति अंचेः सुबंतमात्र उपपदे क्विन् प्राङ् प्रत्यङ् उदङ् युजेः क्रुंचेश्च केवलात् युङ् युंजौ युंजः सोपपदात्तु सत्सूद्विषेत्यादिना क्विप् अश्वयुक् क्रुङ् क्रुंचौ क्रुंचः नलोपः कस्मान्न भवति निपातनैः सह निर्देशात्॥ १२॥ ॥

मिद्धतेन क्रियाएककुत्वार्थं क्विनो विधानं भवति सार्थकं यदि तु निपातनसाहचर्यात्सोपपदादनुपपदाच्च युजेः क्विन्न भवती सुच्येत तदा सत्सूद्विषेत्य त्र युजिग्रहणं शक्यमकर्तुं नलोपः कस्मान्न भवतीति क्रुंचक्रुंचकौटिल्याल्पीभावयोरिति नोपधायेनोधातुः तथानिकुचितिरिति नलोपो दृश्यते चुन्दे नतु जकारस्य श्रवणात् तस्मासिद्धत्वाच्च कार्यस्य तश्चोः कुरिति कुत्वं न भवति कुंचौ कुंच इत्यादौ जकारे यथनुपदत्तां स्यात् तत्र सदि झलीति वच नालभवतीति वक्ष्ममसदि तिप्रसाहारः सनः सम्वत्सरान्मामहिडोड कारात् अमेतु कुंचिरेकस्य धातुः तस्य ककारास्मरेरेफो पिक्विन्सनि

॥ ॥त्यदादिषु॥ ॥पश्यन्त्यर्थेऽस्मिन्सत्त्रं वक्ष्यति आलोचनं चक्षुःसाधनं विज्ञानमात्रप्रतिषेधं मन्यते यादृक्तादृगिति दृशेः शब्दस्तुस्थितिवर्त्तमाने आसर्वनाम्न इत्यात्वं
न कर्मणि विशेषणार्थ इति। आद्युदात्तत्वस्य न कारणमपिति इत्युत्तरं कर्मणि पदोपधस्य प्रयोजनं विशेषणमेवेत्यर्थः ननु स्वरोऽनप्रयोजनमित्युच्यते तत्पश्यति तद्दर्शः
इति चक्षुर्विज्ञाने अशोभमानमिति कथं पुनः प्रयुज्यमानस्यैव दृशेरनालोचनार्थत्वमित्याह तादृगादयो रूढिशब्दा इति ततः किमित्याह नैवात्रेति रूढिशब्दा ह्यप
ताप्ययवार्थे न कुलाघाते पथा तैलया पिकादयः एतदर्थमेवानालोचन इत्युक्तं। इदम्पूर्वीभावे यं विधिः सति तु दृश्यर्थेऽलो भवतीति। भाष्ये तु कर्मकर्त्तरि

॥त्यदादिषु दृशोऽनालोचने कञ्च॥ ॥ दृशेर्धातोरनालोचनेऽर्थे वर्त्तमानात्त्यदादिषूपपदेषु कञ् प्रत्ययो भवति चकारा
त्क्विन् च। तादृकः तादृशः यादृक् यादृशः कञो ञकारो विशेषणार्थः टक्टञ्कञिति। अनालोचन इति किं। तं प
श्यति तद्दर्शः। तादृगादयो हि रूढिशब्दाः नैवात्र दर्शनक्रिया विद्यते। समानान्ययोश्चेति वक्तव्यम् सदृक् सदृशः अ
न्यादृक् अन्यादृशः। दृशेः क्सो वक्तव्यः। तादृक्षः यादृक्षः अन्यादृक्षः॥ ॥सत्सूद्विषद्रुहदुहयुजविदभिदच्छिद
जिनीराजामुपसर्गेऽपि क्विप्॥ ॥ सुपीति वर्त्तते कर्मणीति चानुवृत्तं तु स्पृशोऽनुदके क्विन्नित्यतः प्रभृति न संबध्यते सदा
दिभ्यो धातुभ्यः सुबन्ते उपपदे उपसर्गेऽप्यनुपसर्गेऽपि क्विप्प्रत्ययो भवति। उपसर्गग्रहणं ज्ञापनार्थम् अन्यत्र सुब्ग्रह
णे उपसर्गग्रहणं न भवतीति। वदः सुपि क्यप्चेति। सू इति द्विषा साहचर्यात्सूतेरादादिकस्य ग्रहणं॥ ॥छ॥ ॥

शुत्यादि दर्शितात्तमिवेमं पश्यन्ति जनाः सोऽयं सदृश इव दृश्यमानस्तमिवात्मानं पश्यतीति तत्र कर्मव्यापारमात्रे वा दृशेर्वृत्तिः कर्त्तस्थात्वर्थं आरोपेणाप्तो
कर्मणि तिष्ठति प्रतिपादनायेति द्रष्टव्यं समानान्ययोश्चेति समानस्य छन्दसि वचनबहुलं सम्भवविधानान्निरुक्तश्चेति सदादिषु समानान्ययोश्च। तादृक्षः सदृक्षः अ
न्यादृक्ष इति दृक्षे चेति वक्तव्यमित्यजिसभावेऽत्वं च॥ ॥सत्सूद्विष॥ ॥अनः प्रभृतीति भाष्यकारप्रयोगात्प्रभृतिशब्दयोगे पञ्चमी वदः सुपि क्यप्चेति। प्रयोज
नदृशितायं दर्शितो अत्र स्यनुपसर्ग इति वर्त्तते तस्मात्स्पृशोऽनुदके क्विन्नित्यादौ प्रयोजनं द्रष्टव्यं॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥सुवतेरितिन्यायस्य तुल्यत्वादैवादिकस्याप्यग्रहणं शुचिषदिति छांदसो ऽयं प्रयोगः हंसः शुचिषदिति पूर्वपदादिति षत्वं शुचिसदिति पाठे लौकिकः प्रयो
गः कथमत्र णत्वमिति ग्रामणीविषयः प्रश्नः प्रणीरित्यत्र तूपसर्गादसमासेपीति णत्वं प्राप्तमेव ज्ञापकादिति पूर्वपदस्थान्निमित्तादुत्तरस्य नयतेर्नकार
स्य संज्ञायामपि णत्वं भवतीति सामान्येन ज्ञापकमित्यर्थः तेनाग्रणीरित्यत्रापि भवति कर्मण्यण्णीतु न भवति नीरूपविषयत्वात् ज्ञापनस्याग्रमेत्यत्र ग्रा

॥न सुवतेस्तौ सादिकस्य युजिर् योगे युज समाधौ द्वयोरपि ग्रहणं विद ज्ञाने विद विचारणे विद सत्तायां त्रयाणामपि ग्रहणं न
लाभार्थस्य विदेः अकारस्य विवक्षितत्वात् शुचिषत् अंतरिक्षसत् उपसत् संसत् सू अंडसूः शतसूः प्रसूः द्विष मित्रद्वि
ट् प्रद्विट् द्रुह मित्रध्रुक् दुह गोधुक् युज अश्वयुक् विद वेदवित् ब्रह्मवित् निवित् निविन् निवित् भिद काष्ठभित् प्रभि
त् छिद रज्जुछित् जि शत्रुजित् प्रजित् नी सेनानीः प्रणीः अग्रणीः ग्रामणीः कथमत्र णत्वं स एषां ग्रामणीरि
ति नयतेः पूर्वपदात्संज्ञायामपि णत्वं राज विराट् सम्राट् मो राजि समः क्वाविति मत्वे अन्येभ्योपि दृश्यत इति सामा
न्येन क्विब् अस्त्येव तस्यैवायं प्रपंचः॥ ॥भजो ण्विः॥ ॥उपसर्गे सुपीति वर्तते भजेर्धातोः सुबंत उपपदे ण्विप्रत्ययो भव
ति अर्धं भजते अर्धभाक् पादभाक् उपसर्गेपि प्रभाक्॥ ॥छंदसि सहः॥ ॥उपसर्गे सुपीत्येव छंदसि विषये सहेर्धा
तोः सुबंत उपपदे ण्विप्रत्ययो भवति तुराषाट्॥ ॥वहश्च॥ ॥वहेर्धातोः सुप्युपपदे छंदसि विषये ण्विप्रत्ययो भवति प्र
ष्ठवाट् दित्यवाट् योगविभाग उत्तरार्थः॥ ॥कव्यपुरीषपुरीष्येषु ञ्युट्॥ कव्यपुरीषपुरीष्य इत्येतेषूपपदेषु छंदसि वि
षये वहेर्धातोर्ञ्युट् प्रत्ययो भवति कव्यवाहनः पितॄणां पुरीषवाहनः पुरीष्यवाहनः॥ ॥हव्येनंतः पादं॥ ॥हव्य
शब्द उपपदे छंदसि विषये वहेर्धातोर्ञ्युट् प्रत्ययो भवति अनंतः पादं चेद्वहिर्वर्तते अग्निश्च हव्यवाहनः अनंतः पादमि

त्यस्मान्न यतेरिति वक्तव्यमिति वचनात् ज्ञापनमपि तद्विषयं तत्रापि नीरूपविषयमिति स्थितम्॥ ॥छंदसि॥ ॥तुराषाडिति सहेः साडः षः इति षत्वं
अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घः तुरासाहं पुरो धायेत्यत्र नासाट् द्विषो यो हुं पुरुहूतः पृतनाषाडिति भाषायां प्रयोगाः ग्निदृताः पदस्य हयते
र्णिजंतात् क्विप्॥ ॥श्री॥ ॥

॥जनसन॥ ॥विशेषणार्थश्चेति· विड्वनोरित्युच्यमाने हि किं वादीनामपि ग्रहणं स्यात् अथात्र निरनुबंधकत्वात् वेरेव ग्रहणं वेरपृक्तस्येत्यत्राप्यस्यैव ग्र
हणं स्यात् अथात्र क्विबादीनामपि ग्रहणं स्याद्विड्वनोरनुनासिकस्यादित्यत्रापि स्यादिति समानं वचनं वचइति भावः· गोषाइति सनोतेरनइति षत्वं· अग्रेगाइति पृ
षोदरादित्वात्॥ ॥अदोनन्ने॥ ॥अन्नादइति भाषायामणेव भवति छंदसि लिककाणदनुपपदादिति प्राप्तेयचाघजिष्यते तेनान्नादइत्यत्र अद इत्यस्य ग्रहो भव

॥जनसनखनक्रमगमो विट्॥ ॥छंदसीत्युपसर्गेसुपीति वर्त्तते· जनजननने· जनीप्रादुर्भावे द्वयोरपि ग्रहणं· तथा
षणुदाने· वनषणसंभक्तावित्ति· जनादिभ्योधातुभ्यश्छंदसि विषये विट्प्रत्ययोभवति· टकारः सामान्यग्रहणाविघा
तार्थ वेरपृक्तस्येति· विशेषणार्थश्च विड्वनोरनुनासिकस्यादिति· अब्जाः गोजाः गोषादुं रोनषात्रसि· विसखाः कूप
खाः क्रम दधिक्राः· गम· अग्रेगानेतृणां॥ ॥अदोनन्ने॥ ॥छंदसीति निवृत्तं अदेर्द्धातोरनन्नेसुप्युपपदे विट्प्र
त्ययोभवति· आममत्ति आमात्· सस्यात्· अनन्न इति किं· अन्नादः॥ ॥क्रव्ये च॥ ॥क्रव्यशब्दउपपदे अदेर्द्धातोर्विट्
प्रत्ययोभवति क्रव्यमत्ति क्रव्यात्· पूर्वेणैव सिद्धे वचनमसरूपबाधनार्थं तेनाणनभवति· कथं तर्हि क्रव्यादः· कृत्तवि
कृत्तशब्दउपपदेणतस्य च पृषोदरादित्वात्क्रमभावः कृत्तविकृत्तपक्वमांसभक्षः क्रव्यादउच्यते· आममांसभक्ष
कः क्रव्यादिति॥ ॥छ॥ ॥छ॥ ॥

ति॥ ॥क्रव्ये च॥ ॥वासरूपबाधनार्थमिति तथा च वार्त्तिकं अदोनन्नेक्रव्यग्रहणं वासरूपनिवृत्त्यर्थमिति कथं तर्हीति· यदि वासरूपविधिबाधनार्थमि
तिभावः। कृत्तविकृत्तेति कृत्तं छिन्नं तदेव पुनर्विशेषतः कृत्तमिति पूर्वकालेति समासः· तस्य च कशब्देन पुनः सएव समासः ततो मांसशब्देन पुनर्विशेषण
समासः पृषोदरादित्वात् क्रमभाव इति यद्येवं क्रव्यादइत्यस्य रूपस्यावर्जनीयत्वात् लोके असरूपबाधनार्थेनानेन वचनेन वार्त्तिकविरोधश्चेवं वदरूढ्या शंक्या
ह कृत्तविकृत्ते सादि अर्थभेदादुभयमपि नास्ति किलेत्ययमभिप्रायः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥दुहः॥ ॥कामदुघेति काम्यंत इति कामाः तान् दुग्धे कामदुघा अर्घो मधुपर्कः॥ ॥मंत्रे॥ ॥एतेभ्य इति श्वेतादिपूर्वेभ्यो वहादिभ्यो धातुभ्य इत्यर्थः॥ धातूपपदसमुदाया इति किमर्थमिदमाह अलाक्षणिके ति श्वेतवा इत्यादिषु असुन्प्रत्ययः श्वेतवाः पुरोडाश्चेति निपातनाद्दुत्वं उभशा इति नलोपे अत उपधाया इति वृद्धिः रुत्वं ११ स्य दस्येति प्रत्येकमभिसंबध्यते भाविपदत्वाश्रयेण चेदमुच्यते यत्र डस्यतस्य पदत्वं भविष्यति तत्राविवजेऽपवादो डसप्रत्ययो वक्तव्य इत्यर्थः यद्येवमनेन डसि कृते आवत्वसंतस्येति दीर्घे रुत्वे च श्वेतवा इत्यादि सिद्धं नार्थोऽवयवाश्वेतवा इति निपातनेन एवं तर्हि संबुद्ध्यर्थं निपातनं हे श्वेत

॥दुहः कब्घश्च॥ ॥दुह इत्येतस्मात्सुप्युपपदे कप्प्रत्ययो भवति घकारश्चांतादेशः कामदुघा धेनुः घर्मदुघा॥ ॥मंत्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्॥ ॥श्वेतवह उक्थशास् पुरोडाश् इत्येतेभ्यो णिवन्प्रत्ययो भवति मंत्रविषये· धातूपपदसमुदाया एव निपात्यंते· अलाक्षणिककार्यसिद्ध्यर्थं प्रत्ययस्तु विधीयत एव· श्वेतशब्दे कर्तृवाचिनि सुपपदे वहेर्धातोः कर्मणि कारके णिवन्प्रत्ययो भवति श्वेता एनं वहंति श्वेतवाः इंद्रः· उक्थशब्दे कर्मणि करणे वा उपपदे शंसतेर्णिवन्प्रत्ययो भवति नलोपश्च उक्थानि उक्थैर्वा शंसति उक्थशाः यजमानः· दाशृ दाने इत्यस्य पुरः पूर्वस्य डत्वं कर्मणि च प्रत्ययः पुर एनं दाशंत एनमिति पुरोडाः· श्वेतवहादीनां डस्पदस्येति वक्तव्यं· श्वेतवोभ्यां· श्वेतवोभिः पदस्येति किं· श्वेतवाहौ श्वेतवाहः॥ ॥अवे यजः॥ ॥अवे उपपदे यजेर्धातोर्णिवन्प्रत्ययो भवति मंत्रे· त्वं यज्ञे वरुणस्यावया असि· योगविभाग उत्तरार्थः॥ ॥१४॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

वा इंद्र इति अत्वसंतस्येत्यत्र हि असंबुद्धाविति वर्त्तते डसप्यविकल्प उक्तार्थं श्वेतवोभ्यां पुरुक्थशोभ्यामिति एवं चोक्थशास्त्स्यपि संबुद्ध्यर्थं निपातनं कर्त्तव्यं यदि मंत्रे दर्शनमस्ति॥ ॥अवे यजः॥ ॥अवयाः इति· निपातनाद्दुत्वं योगविभाग उत्तरार्थ इति पुरोडाशावयज्ञो णिवन्नित्येकयोगे श्वेतवहादीनामप्युत्तरत्रानुवृत्तिः स्यात् यत्वेश्चावपूर्वस्यैवानुवृत्तिः स्यात् केवलस्यैव चेष्यते तदर्थो योगविभाग इत्यर्थः॥ ॥१४॥ ॥छ॥ ॥ ॥

॥ विजुपे ॥ ॥ अथ छन्दोग्रहणं किमर्थं यावता मन्त्र इत्यनुवृत्तेरेव भाषायां न भविष्यति तत्राह छन्दोग्रहणं ब्राह्मणार्थमिति मन्त्रव्यतिरिक्तो वेदभागो ब्राह्मणं
यथोक्तं तच्चोदकेषु मन्त्राख्या शेषे ब्राह्मणशब्द इति किमर्थं पुनरिदमिति उत्तरसूत्र एव विजग्रहणं छन्दोग्रहणं च क्रियतामिति प्रश्नः । नियमार्थमिति न
नु दृशिग्रहणाद्भाषायां न भविष्यति सत्यं तस्यैव प्रपञ्चार्थमिदं ॥ ॥ आतः ॥ ॥ अश्व इव तिष्ठतीति अश्वत्थामा पृषोदरादित्वात्सकारस्य तकारः सुधी

॥ विजुपे छन्दसि ॥ ॥ उपे उपपदे यजेर्धातोश्छन्दसि विषये विच् प्रत्ययो भवति । उपयड्भिरूर्ध्वं यजन्ति । नद्भुपयजामुपय
ड्भिः । छन्दोग्रहणं ब्राह्मणार्थं । विधानसामान्यग्रहणं विघातार्थं चेदं कस्येति । किमर्थमिदमुच्यते यावतान्येभ्योपि
दृश्यन्त इति यजेरपि विच् सिद्धः । नियमार्थमेतत् । उपे यजश्छन्दस्येव न भाषायामिति ॥ ॥ आतो मनिन्क्वनिब्वनिप
श्च ॥ ॥ छन्दसीति वर्त्तते । सुप्युपसर्गेपीति च । आकारान्तेभ्यो धातुभ्यश्छन्दसि विषये मनिन् क्वनिप् वनिप् इत्येते प्रत्य
या भवन्ति चकाराद्विच् । सुदामा । अश्वत्थामा । क्वनिप् । सुधीवा सुपीवा । वनिप् । भूरिदावा । घृतपावा । विच् खल्वपि ।
कीलालपाः शुभंयाः । यावस्मोपदाः ॥ ॥ अन्येभ्योपि दृश्यन्ते ॥ ॥ छन्दसीति निवृत्तं । अन्येभ्योपि धातुभ्योऽना
कारान्तेभ्यो मनिन् क्वनिप् वनिप् इत्येते प्रत्यया भवन्ति विच् च । मनिन् । सुशर्मा । क्वनिप् । प्रातरित्वा । प्रातरित्वानौ । प्रा
तरित्वानः । वनिप् । विजावा । अग्रेगावा । विच् खल्वपि । रेडसि पर्णं नयेः । अपिशब्दः सर्वविधिव्यभिचारार्थः । निरुप
पदादपि भवन्ति । धीवा । पीवा । दृशिग्रहणं प्रयोगानुसरणार्थं ॥ ॥

वा सुपीवेति सुमा स्यादिति त्वेणाईत्वं चकारो विचोनुकर्षणार्थः यद्येवमुत्तरत्रानुवृत्तिर्न स्यात् एवं तर्हि चकारोप्युत्तरत्रानुवर्त्तिष्यते ॥ ॥ अन्ये
भ्योपि ॥ ॥ विजावेति विजायत इति विजावा द्विर्नोरनुनासिकस्यात् इत्यात्वं एवं अग्रे गच्छतीत्यग्रेगावा । रेडिति रिषेर्हिंसायां । उणाधागुणः न
रत्वं च लेऽपि शब्दः सर्वविधिव्यभिचारार्थ इति विधीयतेनेनेति विधिः उपाधिः सर्वोपाधिव्यभिचारार्थ इति युक्तः पाठः दृशिग्रहणं प्रयोगानुस
रणार्थमिति तिर्यथा प्रयोगे दृश्यन्ते तथैव भवन्तीति वचनव्यक्त्याश्रयेणेति भावः ॥ ॥

॥क्विप्॥ ॥निरुपपदेभ्यश्चेति एतदपि शब्दस्य सर्वोपाधिव्यभिचारार्थस्यानुवृत्तेर्लभ्यते ननु सुपीत्यस्य निवृत्तेः उत्तरसूत्रे सुप्युपसर्गेऽपीति वर्त्तत इति व
चनप्रमाणत्वात्। छन्दसि भाषायां चेति सर्वसूत्र एव छन्दसीत्यस्य निवृत्तत्वात्। उखास्रदित्यादिषु सुध्वसु भ्रंशु अवस्रंसने आनिदितामित्युपधालोपः वसु
स्रंसिध्वंस्यादिना दत्वं। वहाभ्रडिति भ्रंशु अधःपतने व्रश्चादिना षत्वं अन्येषामपि दृश्यत इति दीर्घः उखायाः स्रंसते पर्णानि ध्वंसते वहाद्भ्रश्यतीति विग्रहः
ध्वंसिरन्तर्भावितण्यर्थः सकर्मकः क्वचित्तु हन्तावेव विग्रहं वा मानियच्छते॥ ॥स्थः क च॥ ॥केयं विभक्तिको निर्द्देशः अन्येभ्योऽपि दृश्यत इति क्विबिति

॥क्विप्॥ ॥सर्वधातुभ्यः सोपपदेभ्यो निरुपपदेभ्यश्च छन्दसि भाषायां च क्विप्प्रत्ययो भवति। उखायाः स्रंस
ते उखास्रत्। पर्णध्वत्। वहाद्भ्रश्यति वहाभ्रट्॥ ॥स्थः क च॥ ॥सुप्युपसर्गेऽपीति वर्त्तते। स्था इत्येतस्मा
द्धातोः सुप्युपपदे कप्रत्ययो भवति क्विप् च। किमर्थमिदं यावता सुपि स्थ इति कः सिद्धः अन्येभ्योऽपि दृश्यत इति
क्विप्। बाधकबाधनार्थं पुनर्वचनं। शमि धातोः संज्ञायामित्यचं बाधते। शंस्थः शंस्थाः॥ ॥१५॥ ॥

सिद्ध एवेत्यपेक्ष्यते न तु तच्छीलादिग्रहणं तत्रानुवर्त्तते न स्यात् क्विप् चेति क्विप् सिद्ध एवेति वक्तव्यं यस्मात्तच्छीलादिग्रहणं तत्र न संबध्यनीयमिति
मन्यते न चैवमपि सुपि स्थ इति विशेषविहितः कः सामान्यविहितं क्विपं बाधेत वासरूपविधिनासोऽपि भविष्यति शमि धातोः संज्ञायामचं बाधत इति
अन्यथा यथा लज्जो हेत्वादिषु टं बाधते धातुग्रहणान्तथा तिष्ठतेरपि कः क्विपौ बाधेत अतस्तमप्यचं बाधित्वा कः क्विपावेव यथा स्यातामिति पुन
र्वचनमित्यर्थः। शंस्था इति क्विपि लुप्ते प्रत्ययलक्षणेन घुमास्थादिसूत्रेणोत्वमत्र प्राप्नोति भाष्यकारप्रयोगात्तु न भवति केचित्त्वीत्वमवकारादावि
ति वचनं पठन्ति तेषां सुपीवा सुधीवा अत्रापि न स्यात्॥ १५ ॥

॥सुप्यजातौ॥ ॥ब्राह्मणानामंत्रयितेति ताच्छील्यस्याविवक्षितत्वात्तन्न प्रत्युदाहृतः नलोकाव्ययेति षष्ठीप्रतिषेधः उत्प्रतिभ्यामिति पुनः सुब्ग्रहणा
त्सोपसर्गनिवृत्त्यर्थत्वात् एव मारंभः साधुकारिणि चेति अताच्छील्यार्थमिदं तच्चेत् ज्ञापकात्सिद्धं यद्यपमाके स्तच्छीलेस्य तत्र तच्छीलेस्य इति धाय साधुकारिग्र
हणं करोति तत् ज्ञापयति साधुकारिण्यताच्छील्येपि णिनिर्भवतीति ब्रह्मणिवद इति ब्रह्मवेदः ररमप्यताच्छील्यार्थ॥ ॥कर्तरि॥ ॥उपमानस्योपमेयापे

॥सुप्यजातौ णिनिस्ताच्छील्ये॥ ॥अजातिवाचिनि सुबंत उपपदे ताच्छील्ये गम्यमाने धातोर्णिनिप्रत्ययो भवति·
उष्णभोजी· शीतभोजी· अजाताविति किं· ब्राह्मणानामंत्रयिता· ताच्छील्य इति किं· उष्णं भुंक्ते कदाचित्· सुपी
ति वर्तमाने पुनः सुग्रहणं सोपसर्गनिवृत्त्यर्थं· उत्प्रतिभ्यामाङि· सर्त्तेरुपसंख्यानं· उदासारिण्यः· प्रत्यासारिण्यः·
साधुकारिणि च· साधुकारी· साधुदायी· ब्रह्मणि वदः· ब्रह्मवादिनो वदंति·॥ ॥कर्तर्युपमाने॥ ॥कर्तृवाचिनि उ
पमाने उपपदे धातोर्णिनिप्रत्ययो भवति· उपपदकर्ता प्रत्ययार्थस्य कर्तुरुपमानं· उष्ट्र इव क्रोशति उष्ट्रक्रोशी·
ध्वांक्षविरावी॥ अताच्छील्यार्थ आरंभः· जात्यर्थो वा· कर्तरीति किं· अपूपानिव भक्षयति माषान्· उपमान इति किं·
उष्ट्रः क्रोशति·॥ ॥व्रते॥ ॥व्रत इति शास्त्रितो नियम उच्यते· व्रते गम्यमाने सुबंत उपपदे धातोर्णिनिप्रत्ययो
भवति· समुदायोपाधिश्चायं॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

स्यात् कर्तरि च प्रत्ययविधानात्तस्यैवोपपदकर्तोपमानं विज्ञायत इत्याह उपपदकर्तेति उष्ट्रक्रोशीति स्वशब्दे गतार्थत्वाद्वृत्तौ नैव प्रयुज्यते इ
माम्र उपमानानां शस्त्रीश्यामादिके यथा॥ ॥व्रते॥ ॥समुदायोपाधिश्चायमिति न प्रत्ययार्थविशेषणं तथा हि सति व्रत एव कर्तरि प्रत्ययः स्यान्न
तद्वतीति भावः समुदायोपाधित्वमेव स्पष्टयति॥ ॥छ॥ ॥

॥धातूपपदेत्यादि॥ कामचार इच्छाप्रवृत्तिः तस्याभावो नियमः स च द्विविधः संभवति स्थण्डिले शेते एव श्राद्धं भुङ्क्ते एवेत्येवंरूपो वा स्मात् स्थण्डि-
ल एव शेते श्राद्धमेव भुङ्क्त इत्येवंरूपो वा तत्र पूर्वके नियमे परदोषाभावत्वात् आदिना श्राद्धं न भुङ्क्ते तद्व्रतलोपः प्राप्नोति न चैवंविधं शास्त्रमस्ति स्थण्डि-
ले शायितव्यमेव श्राद्धं भोक्तव्यमेवेति अस्ति तु स्थण्डिल एव शयितव्यं श्राद्धमेव भोक्तव्यमिति व्रतमिति तु शास्त्रं तो नियमस्तु युक्तं तस्माद् द्वि-
यो नियमो विज्ञायत इत्याह व्रतमिति शयनस्यापि॥ ॥बहुलं॥ ॥आभीक्ष्ण्ये णिन् प्रत्ययमिति पुनः पुनर्भवितव्ये तेमानाभ्यामनयोर्भावेऽप्य

॥धातूपपदप्रत्ययसमुदायेन चेद्व्रतं गम्यत इति स्थण्डिलशायी श्राद्धभोजी कामचारप्राप्तो नियमः सति शयने
स्थण्डिल एव शेते नान्यत्र सति भोजने श्राद्धमेव भुङ्क्ते न श्राद्धमिति व्रत इति किं स्थण्डिले शेते देवदत्तः अन्तः शीला-
र्थमारम्भः तास्यार्थी वा॥ ॥बहुलमाभीक्ष्ण्ये॥ ॥आभीक्ष्ण्ये गम्यमाने सुबन्त उपपदे धातोर्बहुलं णिनिप्र-
त्ययो भवति आभीक्ष्ण्यं पौनःपुन्यं तात्पर्यमासेवा ताच्छील्यादन्यत् काषायपायिणो गान्धाराः क्षीरपायिण
उशीनराः सौवीरपायिणो वाह्लीकाः बहुलग्रहणात् कुल्माषखादः इत्यत्र न भवति॥ ॥मनः॥ ॥सुपीति
वर्त्तते मन्यतेर्धातोः सुबन्त उपपदे णिनिप्रत्ययो भवति दर्शनीयमानी शोभनमानी बहुलग्रहणानुवृत्ते
र्मन्यतेर्ग्रहणं न भवति उत्तरसूत्रे हि खश्प्रत्यये विकरणकृतो विशेषः स्यात्॥ ॥१६॥ ॥ ॥

ज्ञ अयमर्थ्याकर्ममात्रे दिलोपः ताच्छील्यादन्यदिति एते न सुप्यजातौ वित्यनेनागतार्थत्वं दर्शयति फलान्वये श्राप्रवृत्तिस्ताच्छील्यं गान्धारा इत्यस्तु
वा नादिस्वाम्यार्थे देशा वाग्वहनेन कषायादिपाने प्रवर्त्तन्ते उदाहरणेष्वात्तोपि उक्तं चिणकृतोपि तियुक्प्रातिपदिकान्त तु म्विभक्तिषु वेति णत्वं॥ ॥
मनः॥ ॥मन्यतेर्ग्रहणमिति मन ज्ञाने इत्यस्य दैवादिकस्य मनुते इति मनु अवबोधने इत्यस्य तानादिकस्य ति पि सुरोन भावितं यद्दिनेष्यते
संज्ञापूर्वको विधिरनित्यः किं पुनः कारणं प्रयत्नेन मन्यतेर्ग्रहणं निवार्यते यावता इह द्वयोरपि णिनि तद्रूपं न चार्थभेद इत्याह उत्तरसूत्रे

॥ ॥आत्ममाने॥ ॥चकारात् णिनिश्चेति वासरूपविधिना सिद्धो पि णिनिरविच्छेदाय समुच्चीयते तेन करणे यजइत्यत्र णिनेरेवानुवृत्तिर्भवति नानंतरस्य खशः आत्मशब्दो यं परमात्मवृत्तिं कुर्वाणोपि स्वात्मप्रतियोगिनमर्थमाचष्टे समस्तशब्दपर्यायोगस्तेन न चेतनद्रव्यवचनः मननं मानः भावे घञ् आत्मनो मानः आत्मानः कर्मणि षष्ठ्याः समासः तत्र कस्येत्यपेक्षायां प्रत्ययार्थस्य संनिहितस्य मंतुरेवात्मन इति गम्यते तदाह प्रत्ययार्थः कर्त्तेति दर्शनीयत्वादिना धर्मेणेति विशिष्टमिति विशेषः कर्त्तरि षष्ठ्याश्च समासो न भवति सर्वस्या एव मते र्मंतृकर्तृकत्वाव्यभिचारात् एवं चेतनद्रव्यवचने प्यात्मशब्दे केनचिद्विशिष्यामव्यभिचारविशेषणं कर्मणि षष्ठ्यां तु चेतनांतरे कर्मणि प्रत्ययप्रसंगः तस्मात् स्वशब्दपर्याय एवात्मशब्दः दर्शनीयंमन्य इति शरीरधर्ममपि दर्शनीयत्वादिकमात्मधर्ममेवमन्यते तस्य संसारिणः शरीरशरीरिणोरयःपिण्डगोलकयोरिवाभेदं मन्यमानाः पण्डितंमन्य इति एकस्यात्मनः स्वरूपेण कर्तृत्वं पण्डितत्वादिविशिष्टरूपेण कर्मत्वं च युक्तं तदेतदयथोक्तमाचार्यैः आत्मग्रहणं भिन्नज्ञानसेवत्वकर्त्तरि भवं तीतत्र प्रतिनिर्दिशेत्यात्मकर्तृकेति खशः खकारेमु

॥आत्ममाने खश्च॥ ॥आत्मनो मननमात्ममानः आत्ममाने वर्त्तमानात् मन्यतेर्धातोः सुप्युपपदे खश् प्रत्ययो भवति चकारात् णिनिश्च। प्रत्ययार्थः कर्त्ता आत्मानमेव दर्शनीयत्वादिना गुणेनायुक्तं मन्यते तदायं विधिः दर्शनीयमात्मानं मन्यते दर्शनीयंमन्यः दर्शनीयमानी। पण्डितंमन्यः पण्डितमानी। आत्मग्रहणमिति किं। दर्शनीयमानी देवदत्तो यज्ञदत्तस्य॥ ॥भूते॥ ॥भूत इत्यधिकारो वर्त्तमाने लडिति यावत्। यदित ऊर्ध्वमनुक्रमिष्यामः भूत इत्येवं तद्वेदितव्यं। धात्वधिकारश्च धात्वर्थे भूत इति विज्ञायते। वक्ष्यति। करणे यजः। अग्निष्टोमेनेष्टवान् अग्निष्टोमयाजी। भूत इति किं। अग्निष्टो-

मर्थः दर्शनीयंमन्या कुमारीत्यादौ मुमर्थः खशः शकारः सार्वधातुकसंज्ञार्थः दिवादित्वात् श्यन् स्यात् स्तुमतिशिष्टोपि विकरणस्वरः सार्वधातुकस्वरं न बाधत इति खश एव भवति न निस्वरः दर्शनीयमानी देवदत्तो यज्ञदत्तस्येति कर्मणि षष्ठीत द्योगे भूस्यापि दर्शनीयपदस्य गमकत्वसमासः॥ ॥भूते॥ ॥यस्मन्नात्मपदहरणात् सर्वे भूतशात शाद्वे नो अते तत्र न सायते कस्मिन् भूत इति किं साधने भूते किं वा धात्वर्थे ति आह धात्वधिकाराच्चेति च शब्दः पूर्वोक्तेनार्थेनास्य संगतिं द्योतयति धात्वर्थे भूत इति ननु धात्वधिकाराद्धातोर्भूत इति युक्तं न तु धात्वर्थे भूत इति उच्यते प्रयोगे प्रत्ययस्यपोसंभूतत्वमर्थस्यैव विशेषणं भवितुमर्हतीति विशेषणांतरवत्तन्न तु शब्दस्य तस्याभिधेयप्रतीत्यादने व्यग्रत्वाद्विशेषणासंबंधं प्रत्ययोपपत्वात्। किंच नित्यो धातुः अनित्यत्वे पि भूतास्य प्रयोगिरनुपपन्नः उच्चारितलक्षणो भूतत्वविशेषणं स्वार्थे न त्वनुच्चारिता प्रत्ययविधिः संभवतीति नित्यश्चायं भूतशब्दो निष्क्रांतवाची निनिष्ठास्यामिति तेना प्रयत्ता दप्रसिद्धिरित्यचोद्यं॥ १७ ॥ ॥

॥ ॥करणे॥ ॥णिनिरनुवर्त्तते नखश्चेति॰ अत्रोक्तो हेतुः अनिरनुवर्त्तते नखश्चेति अत्रोक्तो हेतुः अग्निष्टोमयाजीति ननु चाग्निष्टोमशब्दः कर्मना
मधेयं तत्कथमग्निष्टोमस्य यज्ञिं प्रति करणत्वं न हि तदेव तत्र करणं भवति इदं तु युक्तमुदाहरणं सोमेनेष्टवान् सोमयाजी मन्त्रेणेष्टवान् मन्त्रयाजीति
तत्राह अग्निष्टोमः फलभावनायां करणं भवतीति॰ससंयाग एवाग्निष्टोमः यागोपि फलभावनायां करणं फलस्य स्वर्गादेर्भवितो या भावना ऽसाद नानस्मा
न्निरपर्थः ननु दीक्षणीयादि रूढवसानीयांतो ज्योतिष्टोमाख्यो याग एव स्वर्गभावना न तद्व्यतिरिक्तः कश्चिद्व्यापारो यजमानस्यास्ति यत्र यागः करणमश्नुते
उच्यते द्विविधो यजमानव्यापारः सामान्यरूपो विशेषरूपश्चेति तत्र सामान्यरूपश्चोदासीनप्रच्युतिरूपः कृतिप्रयत्नादिपदाभिलप्यः वाच्यस्तु दीक्षणी

॥करणेयजः॥ ॥णिनिरनुवर्त्तते॰ नखश्च॰ यजेर्द्धातोः करणउपपदे णिनिः
प्रत्ययो भवति॰ अग्निष्टोमयाजी॰ वाजपेययाजी॰ अग्निष्टोमः फलभावनायां
करणं भवति॥ ॥छ॥ ॥

यादि रूढवसानीयांतः प्रसिद्ध एव एवमोदनं पचतीत्यादिष्वपि तण्डुलाः प्रयत्नो व्यापाराधिश्रयणादिरिष्टः फलं हि प्रेप्सन् तदर्थं प्रयतते नो
दासीन एवोपायमुपायं जिज्ञासते ज्ञानीते च ज्ञात्वा चोपायमनुतिष्ठति सैषा स्वर्गादिफलोद्देशेन प्रवृत्ता कृतिर्भवितेत्युच्यते सा च भाव्यं करणमितिक
र्त्तव्यता चेति त्रितयमपेक्षते रम् अनेनेत्थं भावयेदिति पृष्ठाह भावनापेक्ष्यमाणा हि साधनं किंफलस्य मे साधनानुग्रहः कोवेस्य नुइस्मतमपेक्षतइ
तिसैषा सामान्यरूपा कृतिर्न शास्त्रकटाक्षमपेक्षते विशेषरूपा त्वपेक्षते न तथा हि फलार्थी तदुपायं जिज्ञासते न तदुपायं जिज्ञासमानः शृणोति
ज्योतिष्टोमेन स्वर्गकामो यजेतेति तत्र च पुरुषप्रवर्तनारूपो विधिः श्रूयते॥ ॥

न चापुरुषार्थे पुरुषः प्रवर्त्तत इति विध्यवरुद्धाभावनाभामापेक्षायां समानपदोपात्तमपि तु स्वरूपं धात्वर्थमपहाय पदान्तरोपात्तमपि पुरुषोपस
र्जनमपि सुखरूपं स्वर्गमेवावलंबते ततः करणापेक्षायां समानपदोपात्तो धात्वर्थः करणं भवति यथा स्त्तं निखिममास्ना तं दीक्षणीयादीति कर्त्तव्यतया
त्वे तीत्येषा मीमांसक मर्यादा यत्र तु न विध्यवरोधो भावनायास्तत्र धात्वर्थ एव भामो भवति यथा पचति पाकं करोति गच्छति गमनं करोतीत्यादि निर्दि
श्यते न नुभावनयाऽसंपद्यमानस्य बाह्यव्यापारस्य कथं तत्र करणत्वं को दोषः करणं खलु सर्वत्र कर्तृव्यापारगोचरः कुठारेणाछिनत्तीत्यत्रापि तद्यम
न निपातनरूपेण कर्तृव्यापारेणाप्यमानस्यैव कुठारस्य तत्र करणत्वं न स्वकथं छिदाभावनरूपेणाफलेनाग छिन्नयोस्तयोश्छेदनरूपत्वं न स्वरूपेण ।

॥ कर्मणि हनः ॥ ॥ कर्मण्युपपदे हन्तेर्धातोर्णिनिप्रत्ययो भवति भूते । पितृव्य
घाती । मातुलघाती । कुत्सितग्रहणं कर्त्तव्यमिह माभूत् चोरं हतवान् ॥ १८ ॥

उद्यमेर्दर्शनात् सोऽपि हि विस्रम्भमुद्यच्छते निपातयति कस्य च छिदाभावनाभावान्नाछिनत्तीत्युच्यते तदेवमुद्यमननिपातयोश्छेदरूपत्वं कुठारगोचर
त्वनिबंधनमिति तस्य तत्र करणत्वं तथेहापि भावनायां स्वर्गभावनारूपत्वमग्निष्टोमाख्ययागगोचरत्वनिबंधनमिति तस्य तत्र करणत्वं तदिदमु
क्तं फलभावनायां करणमिति यं हि फलं धात्वर्थं च संपादयति तत्र फलभावनारूपत्वे व्यापारः करणमित्यर्थः । नन्वेवमपि पश्यार्थे प्रतिकृ
ग्निष्टोमः करणं न भवति मा भूत् तत्र करणत्वं करणं तावत् संबंधि यजिना सामानाधिकरण्येन श्रथ वा भावनापि धातोरेव वाच्या न प्रत्ययस्य तत्र
धात्वर्थैकदेशे एकदेशान्तरस्य करणं ज्योतिष्टोमशब्दश्च तत्रैकदेशान्तरे वर्त्तत इति न किंचिदनुपपन्नं ॥ ॥ कर्मणि हनः ॥ ॥ कुत्सितग्रहणमिति
पितृव्यवधादिनायः कर्त्ता कुत्स्यते तत्रायं प्रत्ययः इति कर्त्तव्यमित्यर्थः ॥ १९ ॥ ॥

॥ब्रह्मा॥ ॥चतुर्विधश्चात्रेतिधातूपपदकालप्रत्ययविषयः भाष्ये धातूपपदविषयं नियमचतुष्टयं प्रदर्शितं तत्तदुपलक्षणं न तु नियमान्तरस्याव्यवच्छेदार्थमिति
गम्यते ब्रह्मादिष्वेव हन्तेरिति धातुनियमः अत्रापि नियमे भूत इत्याश्रयणात् कालान्तरे उपपदान्तरेऽपि भवत्येव पुरुषं हन्ति हनिष्यति वा पुरुषहेति। ब्रह्मा
दिषु हन्तेरेवेत्युपपदनियमः अत्रापि भूत इत्याश्रयणात् कालान्तरे धात्वन्तरादपि भवत्येव शत्रुं जयति जेष्यति वा शत्रुजिदिति भूतकाल एव क्विबेवेति कालनि

॥ब्रह्मभ्रूणवृत्रेषु क्विप्॥ ॥कर्मणीति वर्त्तते· ब्रह्मादिषु कर्मसूपपदेषु हन्तेर्धातोः क्विप्प्रत्ययो भवति· ब्रह्महाः
वृत्रहा· किमर्थमिदमुच्यते· यावतापर्वधातुभ्यः क्विब्विहित एव· ब्रह्मादिषु हन्तेः क्विप्वचनं नियमार्थं· चतुर्वि
धश्चात्र नियम इष्यते· ब्रह्मादिष्वेव हन्तेः नान्यस्मिन्नुपपदे पुरुषं हतवानिति· ब्रह्मादिषु हन्तेरेव नान्यतः ब्रह्मा
धीतवानिति· ब्रह्मादिषु हन्तेर्भूते क्विबेव नान्यः प्रत्ययः। तथाभूत एव नान्यस्मिन्काले· ब्रह्माणं हन्ति हनि
ष्यति वा इति· तदेतद्बहुसमासग्रहणाद्बहुलग्रहणाद्वा पुरस्तादपकर्षाल्लभ्यते·॥ ॥बहुलं छन्दसि॥ ॥पूर्वेण
नियमात् प्राप्तः क्विब्विधीयते· छन्दसि विषये उपपदान्तरेऽपि हन्तेर्धातोर्बहुलं क्विप्प्रत्ययो भवति· योमातृहा·
न च भवति· पितृघातः॥ ॥छ॥ ॥

यमः नान्यः प्रत्यय इति यथा कर्मणीति हनः कर्मण्युपपदे उपपदान्तरे तु भूतेऽपि प्रत्ययान्तरं भवत्येव पितृव्यं हतवान् पितृव्यघातीति सोपपदस्य प्रत्ययो निय
मेन व्यावर्त्तते निष्ठा तु भवत्येव शत्रुं हतवानिति तथा भूत एवेति प्रत्ययनियमः अत्रापि ब्रह्मादिषु हन्तेरित्याश्रयणादुपपदान्तरे धात्वन्तरे च कालान्त
रेऽपि भवत्येव कथं पुनरेकस्मिन्नेव योगे चतुर्विधो नियमो लभ्यत इत्याह तदेतदिति अग्रहणमाग्विशेषलाभेव चतुर्विधो नियमो लब्धुं शक्यतेऽनेनैव त
थो दुर्लक्ष्यमेतदुक्तं वेदितव्यम्॥ ॥छ॥ ॥

॥सुकर्मा॥ ॥स्वादिष्विति सुशब्दं वर्जयित्वेत्यनंतरमेवाभिधानादेतदुक्तं संविज्ञानो बहुव्रीहिः वा कुत्साश्रयणे नैव मुक्तं आद्योऽसामर्थ्य इति वक्तव्ये
विधश्चेति एतद्बहुलग्रहणानुवृत्तेर्लभ्यते कालोपपदप्रत्ययविषय इति तत्र कालनियमात् कर्म कृतवान् कर्मकार इत्यण् न भवति उपपदनियमात् मंत्र
मधीतवान् मंत्राध्याय इत्यणेव भवति ननु क्विप्प्रत्ययनियमात् मंत्रं करोतीति करिष्यतीति वेति विवक्षायामणेव भवति ननु क्विप् शास्त्रकृदिति क्विप् चेति
क्विप्॥ ॥सोमे॥ ॥कालधातूपपदप्रत्ययविषय इति तत्र भूतकालस्य क्विपि नियतत्वात् सोमं सुतवान् सोमं साव इत्यण् न भवति तथा धातोः सोम

॥सुकर्मपापमंत्रपुण्येषु कृञः॥ ॥कर्मणीति वर्तते तदसंभवात् सुशब्दं वर्जयित्वा परिशिष्टानां विशेषणं
स्वादिषु कर्मसूपपदेषु करोतेर्धातोः क्विप्प्रत्ययो भवति सुकृत् कर्मकृत् पापकृत् मंत्रकृत् पुण्यकृत् अ
यमपि नियमार्थ आरंभः त्रिविधश्चात्र नियम इष्यते धातुनियमं वर्जयित्वा कालोपपदप्रत्ययविषयः धातोरनि
यतत्वादन्यस्मिन्नप्युपपदे भवति शास्त्रकृत् भाष्यकृत्॥ ॥सोमे सुञः॥ ॥कर्मणीत्येव सोमे कर्मण्युपपदे
सुनोतेर्धातोः क्विप्प्रत्ययो भवति सोमसुतौ सोमसुतः अयमपि नियमार्थ आरंभः चतुर्विधश्चात्र नियम इष्य
ते कालधातूपपदप्रत्ययविषयः॥ ॥अग्नौ चेः॥ ॥कर्मणीत्येव अग्नौ कर्मण्युपपदे चिनोतेर्धातोः क्विप्प्रत
ययो भवति अग्निचित् अग्निचितौ अग्निचितः अत्रापि पूर्ववच्चतुर्विधो नियम इष्यते॥ ॥१९॥ ॥ ॥

एवोपपदे नियतत्वात् सुरां सुतवान् सुरासाव इत्यणेव भवति तथा सोमस्य सुनोतावेव धातोर्नियतत्वात् सोमं क्रीतवान् सोमक्रीरिति क्विप् न भवति अणेव
तु भवति तथा क्विपो भूते नियतत्वात् सोमं सुनोति सोष्यति वेति विवक्षायां क्विप् न भवति अणेव तु भवति॥ ॥अग्नौ चेः॥ ॥अत्रापीत्यादि तत्र भूतका
लस्य क्विपि नियतत्वादग्निं चितवान् अग्निचाय इत्यण् न भवति धातोरग्नावुपपदे नियतत्वात् इष्टकाचिदिति न भवति अग्नेश्चिनोतावेव नियतत्वादग्निम
दिति न भवति क्विपश्च भूत एव नियतत्वादग्निं चिनोति चेष्यति वेत्यत्राभावः॥ ॥१९॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

कर्मणि॥ ॥कर्मणीह वर्त्तत इत्यनुवृत्तेः कर्मग्रहणमुपपदं द्रष्टुं कर्मप्रत्ययार्थं इत्याह कर्मणोपेक्षकारक इति एवकारः पौनरुक्त्यनिरासार्थः उपपदं तावत्कर्म
प्रत्ययार्थोपि कर्मैवेति आख्याग्रहणं रूढिसंप्रत्ययार्थमिति अग्निश्चाग्नौ लोके ज्वलनेरूढः वेदे तत्र यर्थ इष्टकाचये पिप्रचुरः प्रयोगः य एवं विद्वानग्निं चि
नुते अग्निं चेष्यमाणाः इति समुखो ज्वलनो वा भवतु इह तत्र सत्याख्याग्रहणो लोकप्रसिद्धिवशेन ज्वलन एव गृह्येत मा ग्राहि इष्टकाचय एव गृह्यतामित्याख्या
ग्रहणमित्यर्थः॥ ॥कर्मणि॥ ॥कर्मणीति वर्त्तमान इति कर्मणीह वर्त्ततः कर्तुः कुत्सानिमित्ते कर्मणीति यत्कर्मक्रियासंबद्धं कर्तुः कुत्सामाव

॥कर्मण्यग्न्याख्यायां॥ ॥चेः कर्मणीति वर्त्तते कर्मण्युपपदे चिनोतेर्धातोः कर्मण्येवकारके क्विप्प्रत्ययो भव
ति अग्न्याख्यायां· धातूपपदप्रत्ययसमुदायेन चेदग्न्याख्या गम्यते· श्येन इव चीयते स्म श्येनचित्· कंकचित्· आ
ख्याग्रहणं रूढिसंप्रत्ययार्थं· असमर्थो हीष्टकाचय उच्यते श्येन चिदिति॥ ॥कर्मणीनिविक्रियः॥ ॥कर्मण्युप
पदे विपूर्वात्क्रीणातेर्धातोरिनिप्रत्ययो भवति· कर्मणीति वर्त्तमाने पुनः कर्मग्रहणं कर्तुः कुत्सानिमित्ते कर्मणि
यथा स्यात्कर्ममात्रे माभूत्· सोमविक्रयी· घृतविक्रयी· तैलविक्रयी· इह न भवति धान्यविक्रायः॥ ॥दृशेः क्व
निप्॥ ॥कर्मणीत्येव· दृशेर्धातोः कर्मण्युपपदे क्वनिप्प्रत्ययो भवति· मेरुदृश्वा· परलोकदृश्वा· अन्येभ्यो
पि दृश्यत इति क्वनिपि सिद्धे पुनर्वचनं प्रत्ययान्तरनिवृत्त्यर्थं॥ ॥राजनि युधिकृञः॥ ॥कर्मणीत्येव· राजनश
ब्दे कर्मण्युपपदे युधातेः करोतेश्च धात्वोः क्वनिप्प्रत्ययो भवति· ननु च युधिरकर्मकः· अन्तर्भावितण्यर्थः सक
र्मको भवति· राजयुध्वा· राजानं योधितवानित्यर्थः·

ह इति तत्रेत्यर्थः सोमादीनां विक्रयः शास्त्रे निषिद्धः॥ ॥दृशेः॥ ॥प्रत्ययान्तरनिवृत्त्यर्थमिति प्रत्ययान्तरं सह निर्दिष्टं मनिनादि अण्णिः सोपपदान्नि
ष्ठानुभवत्येव परलोकं दृष्टवानिति॥ ॥राजनि॥ ॥ननु च युधिरकर्मक इति तत्कथं राजन् शब्दे कर्मवाचिन्युपपदे इत्युक्तमिति भावः अन्तर्भावितण्य
र्थ इति अनेकार्थत्वाद्धातूनां लक्षणया वा यदा ण्यर्थमपि युधिरेवान्तर्भावयति तदा प्रयोज्येन कर्मणा सकर्मको भवतीत्यर्थः॥ ॥छ॥ ॥छ॥

॥सहे च॥ ॥असत्त्ववचनत्वान्नोपपदं कर्मणा विशेष्यत इति अनन्तरश्च कर्मणीति नानुवर्त्तत इति भावः न पुनस्तु वर्त्तमाने सेवात्रासंबंधः उत्तरत्रान्नुपयोगात॥ सप्तम्यां॥ ॥मंदुरज इति वाजिशाला तु मंदुरा स्यात्॥ गोः संज्ञाछंदसोर्बहुलमिति ह्रस्वः॥ ॥पंचम्यां॥ ॥बुद्ध्यादयस्त्रात्मगुणाः खेदो

॥सहे च॥ ॥सहशब्दे चोपपदे युधेः कृञश्च धातोः क्वनिप् प्रत्ययो भवति· असत्त्वाभिधानाल्लोपपदं कर्मणा विशेष्यते· सहयुध्वा· सहकृत्वा· ॥सप्तम्यां जनेर्डः॥ ॥सप्तम्यंत उपपदे जनेर्धातोर्डः प्रत्ययो भवति· उपसरे जातः उपसरजः· मंदुरजः॥ ॥पंचम्यामजातौ॥ पंचम्यंत उपपदे जातिवर्जिते जनेर्धातोर्डः प्रत्ययो भवति· बुद्धिजः· संस्कारजः· खेदजः· दुःखजं· अजाताविति किं· अश्वाज्जातः· हस्तिनो जातः॥ ॥उपसर्गे च संज्ञायां॥ ॥उपसर्गे चोपपदे संज्ञायां विषये जनेर्धातोर्डः प्रत्ययो भवति· समुदायोपाधिः संज्ञा· अथेमा मानवीः प्रजाः॥ ॥अनौ कर्मणि॥ ॥अनुपूर्वाज्जनेर्धातोः कर्मण्युपपदे डः प्रत्ययो भवति· पुमांसमनुजाता पुमनुजा· स्त्रियमनुजातः स्त्र्यनुजः॥ ॥अन्येष्वपि दृश्यते॥ ॥अन्येष्वप्युपपदेषु कारकेषु च जनेर्धातोर्डः प्रत्ययो दृश्यते सप्तम्यामित्युक्तं असप्तम्यामपि दृश्यत इत्यर्थः· न जातः अजः· द्विर्जाताः द्विजाः· पंचम्यामजाताविन्युक्तं जातावपि दृश्यते· ब्राह्मणजो धर्मः· क्षत्रियजं युद्धं· उपसर्गे च संज्ञायामित्युक्तं असंज्ञायामपि दृश्यते· अभिजाः· केशाः· अनौ कर्मणीत्युक्तं अकर्मण्यपि दृश्यते अनुजातः अनुजः· अपि शब्दः सर्वोपाधिव्यभिचारार्थः तेन धात्वंतरादपि भवति· काकांतरेऽपि परितः खाता परिखा· आखा· २० ॥

रागः खेदात् स्त्रीषु प्रवृत्तिरिति तिरर्थगात॥ ॥उपसर्गे॥ ॥प्रजेति प्राणिजातस्यैषा संज्ञा॥ ॥अनौ॥ ॥पुमांसमनुजात इति· पुमांसमनुरुध्य जात इत्यर्थः तेनास्य सकर्मकत्वं पुमनुज इति पुंसः संयोगान्तलोपः॥ ॥अन्येषु॥ ॥द्विर्जात इति मातुरग्रे विजननं द्वितीयं मौञ्जिबंधनं तत्रास्य माता
सावित्री पिता त्वाचार्य उच्यते॥ २० ॥ ॥

॥निष्ठा॥ ॥क्तक्तवतू निष्ठेत्युक्तमिति ककारः कित्कार्यार्थः उकार उगित्कार्यार्थः अत्वसंतस्येति विशेषणार्थश्च निष्ठायामित्यादि। अप्रसिद्धिर्निष्प
त्तिः कस्य संज्ञायाः संज्ञिनो वा कथमित्याह संज्ञयेति। यदि हि क्तक्तवतू इत्यहणं क्रियेत इह वस्त्रं ज्ञा विधोच्यत नोन स्यादितरेतराश्रयत्वमिति संज्ञयेत्युक्तं
मतोऽश्वत्थयोरिति लोके शास्त्रे वा नता कस्ब्लोके सानुबंधावेतौ स्तः शास्त्रे पि यथा पित्रीतः कः नपुंसके भावे क्त इति क्तः स्वरूपेण विहितो सिद्धे तु काले

॥निष्ठा॥ ॥क्तक्तवतू निष्ठा १ स्तुक्तं स निष्ठासंज्ञकः प्रत्ययो भूते भवति॰ कृतः कृतवान्॰ भुक्तः
भुक्तवान्॰ निष्ठायामितीतरेतराश्रयत्वादप्रसिद्धिः॰ संज्ञया क्तक्तवतू भाव्येते भूतोऽश्वत्थयोः संज्ञ
या भवितव्यं॰ नैष दोषः॰ भाविनी संज्ञा विज्ञायते॰ स भूते भवति यस्योत्पन्नस्य निष्ठेति संज्ञा भवती
ति॰ सामर्थ्यात् क्तक्तवत्वोर्विधानमेतत्॥ ॥छ॥ ॥छ॥ ॥श्री॥ ॥छ॥

नास्ति क्तवतुस्तु न कार्यस्तीति भावः भाविनी संज्ञेति संज्ञिनो भावित्वात् संज्ञापि भाविनी सूत्रशाटकवत्तद्यथा कस्मैचित्सूत्रस्य शाटकं वयेति तंतुवाय उक्तः स
पश्यति यदि शाटको न वातव्यः अथ वातव्यो न शाटको वातव्यश्चेति विप्रतिषिद्धं मन्ये स वातव्यः यस्मिन्नुते शाटक इत्येतद्भवतीति सामर्थ्यादिति क्तक्त
वतू निष्ठेति वचनात् अन्यस्योत्पन्नस्य निष्ठेति संज्ञाया अभावः सामर्थ्य॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥सुकर्म॥ ॥स्वादिष्विति सुशब्दं वर्जयित्वेत्यनंतरमेवाभिधानात् तद्गुणसंविज्ञानो बहुव्रीहिः बाहुल्याश्रयणेनैवमुक्तं आद्यो ऽप्रामश्तिवक्तव्ये
विधश्चेति एतद्बहुलग्रहणानुवृत्तेरेव लभ्यते कालोपपदप्रत्ययविषय इति तत्र कालनियमात् कर्म कृतवान् कर्म कारयति इत्यत्र न भवति उपपदनियमात् मंत्र
मधीतवान् मंत्राध्याय इत्यत्रैव भवति न तु क्विप् प्रत्ययनियमात् मंत्रं करोति करिष्यति वेति विवक्षायामणेव भवति न तु। किं च शास्त्रकृदिति क्विप् चेति
क्विप्॥ ॥सोमे॥ ॥कालधातूपपदप्रत्ययविषय इति तत्र भूतकालस्यापि नियतत्वात् सोमं सुतवान् सोमं सावयति इत्यत्र न भवति। तथा धातोः सोम

॥सुकर्मपापमंत्रपुण्येषु कृञः॥ ॥कर्मणीति वर्त्तते। तदसंभवात्तु सुशब्दं वर्जयित्वा परिशिष्टानां विशेषणं। स्वादिषु कर्मसूपपदेषु करोतेर्द्धातोः क्विप्प्रत्ययो भवति। सुकृत्। कर्मकृत्। पापकृत्। मंत्रकृत्। पुण्यकृत्। अयमपि नियमार्थ आरंभः। त्रिविधश्चात्र नियम इष्यते धातुनियमं वर्जयित्वा। कालोपपदप्रत्ययविषयः। धातोरनियतत्वादन्यस्मिन्नप्युपपदे भवति शास्त्रकृत्। भाष्यकृत्॥ ॥सोमे सुञः॥ ॥कर्मणीत्येव। सोमे कर्मण्युपपदे सुनोतेर्द्धातोः क्विप्प्रत्ययो भवति। सोमसुतौ। सोमसुतः। अयमपि नियमार्थ आरंभः। चतुर्विधश्चात्र नियम इष्यते कालधातूपपदप्रत्ययविषयः॥ ॥अग्नौ चेः॥ ॥कर्मणीत्येव। अग्नौ कर्मण्युपपदे चिनोतेर्द्धातोः क्विप्प्रत्ययो भवति। अग्निचित्। अग्निचितौ। अग्निचितः। अत्रापि पूर्ववच्चतुर्विधो नियम इष्यते॥ ॥१९॥ ॥ ॥

एवोपपदे नियतत्वात् सुरां सुतवान् सुरासाव इत्यत्राणेव भवति तथा सोमस्य सुनोतावेव धातोर्नियतत्वात् सोमं क्रीतवान् सोमक्रीरिति क्विप् न भवति अणेव
तु भवति तथा क्विप एव भूते नियतत्वात् सोमं सुनोति सोष्यति वेति विवक्षायां क्विप् न भवति अणेव तु भवति॥ ॥अग्नौ चेः॥ ॥अत्रापीत्यादि तत्र भूतका
लस्यापि नियतत्वादग्निं चितवान् अग्निं चाययति इत्यत्र न भवति धातोश्चाग्नावुपपदे नियतत्वात् इष्टकाचिदिति न भवति अग्नेश्चिनोतावेव नियतत्वादग्निमि
दिति न भवति क्विपश्च भूत एव नियतत्वादग्निं चिनोति चेष्यति वेत्यत्राभावः॥ ॥१९॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥